ननु जीवस्याऽविद्याश्रयत्वं ब्रह्मणः सर्वज्ञत्वमिति वदता जीवब्रह्मणोर्विभागो वक्तव्य एवेति चेत्, किं वास्तवविभाग आपाद्यते, उताऽविद्याकृतः? आद्येऽपि किमन्तःकरणकृतावच्छेदाद् विभागः, उत स्वाभाविकादतिरेकाद् अथवा स्वाभाविकादंशांशिभावात्? नाऽऽद्यः, सादेरन्तःकरणस्याऽनाद्यवच्छेदकत्वायोगात्। न चाऽन्तःकरणमप्यनादि, सुषुप्त्यादावभावात्। सूक्ष्मावस्थं तत्त्राप्यस्तीति चेत्, किं सूक्ष्मता नाम निरवयवत्वापत्तिः उतावयवापचयमात्रं किं वा कारणात्मनाऽवस्थितिः अथवा संस्कारशेषत्वम्? नाऽऽद्यः,

---

भावरूपताकी सिद्धि करेंगे। भावरूप आवरणके बिना विद्यमान सर्वज्ञत्वादिका तथा उन सर्वज्ञत्वादि गुणोंसे युक्त ब्रह्मका अप्रकाश उपपन्न नहीं हो सकता है। ज्ञानाभावमात्रसे तो जीवसे पृथक् जड़ और असर्वज्ञ घटादिका ही अप्रकाश होता है इसके विपरीत चेतन और सर्वज्ञ—नित्य ज्ञानवाले—ब्रह्मका नहीं।

यदि ऐसा कहो कि 'जीव अविद्याश्रय है और ब्रह्म सर्वज्ञ है' इस पक्षको माननेवाले वादीको जीव और ब्रह्मका भेद कहना ही होगा, तो यह कहना ठीक नहीं है, क्योंकि यदि ऐसा पर्यनुयोग करते हो, तो हम पूछेंगे कि क्या जीव और ब्रह्ममें वास्तविक भेदकी आपत्ति दी जा रही है अथवा अविद्याकृत भेदकी? वास्तविक माननेमें भी क्या अन्तःकरणके कारण उत्पन्न हुए अवच्छेद (भेद) से विभाग है? अथवा स्वाभाविक ही भेदसे विभाग है? किं वा स्वाभाविक अंशांशिभावसे? इनमें पहला पक्ष तो बन नहीं सकता, क्योंकि अन्तःकरणका भेद प्रयोजक नहीं हो सकता। अन्तःकरण अनादि है यह भी नहीं कह सकते, कारण कि सुषुप्ति आदि अवस्थामें उसका अभाव हो जाता है। सुषुप्ति आदिमें भी वह सूक्ष्म अवस्थामें रहता ही है, यदि ऐसा कहो, तो क्या निरवयव हो जाना सूक्ष्मता है या अवयवोंका घट जाना ही सूक्ष्मता है अथवा कारणके स्वरूपसे रहना है या संस्कारका शेष रह जाना सूक्ष्मता

सावयवस्याऽवयवाभावे स्वरूपनाशात्। न द्वितीयः, अवशिष्टावयविनोऽकार्यत्वप्रसङ्गात्, कदाचिदप्यनपायात्। संपूर्णकार्यत्वे वा जागरणवद्व्यवहारापत्तेः। तृतीयेऽपि किं कारणमेव तिष्ठत्युत कार्यमपि? आद्ये, अन्तःकरणाभावापत्तिः। द्वितीये, व्यवहारापत्तिः। नापि चतुर्थः, संस्कारस्याऽवच्छेदानुपादानत्वेन सुप्तावनवच्छिन्नस्य जीवस्य मुक्तिप्रसङ्गात्। अथावच्छिद्यमानमेव काष्ठवदवच्छेदोपादानम्, अन्तःकरणं तु कुठारवन्निमित्तमेवेति चेत्, तर्हि नाऽवच्छेदसिद्धिः; निरवयवस्य चैतन्यस्य परमार्थतः काष्ठवद्विदारणोपादानत्वायोगात्।

अस्माकं त्वविद्यैवावच्छेदोपादानम्। द्वैधीभावोऽप्यविद्यानिष्ठ एव सन् आत्मनि परमध्यस्यते। अन्तःकरणस्याऽप्यविद्याकार्यस्याऽविद्याद्वारैवाऽऽत्मा-

---

है। इनमें पहला मत ठीक नहीं है, क्योंकि सावयव पदार्थके अवयवोंका नाश होनेपर स्वरूपका ही नाश हो जाता है। द्वितीय मत भी उचित नहीं है, क्योंकि अवशिष्ट अवयवोंवाला अन्तःकरण अकार्य (नित्य) हो जायगा। अतः उसका नाश कभी भी नहीं हो सकेगा। यदि सम्पूर्णको कार्य ही मानो, तो जागरणके तुल्य सुषुप्तिमें भी व्यवहार होना चाहिए। [सुषुप्तिमें कुछ कम हुए अवयव यदि कार्यरूप ही हैं तो सुषुप्तिसे प्रथम जागरादिमें विद्यमान अन्तःकरण और इस अवस्थाके अन्तःकरणमें व्यवहाराभावके प्रयोजक हेतुकी सिद्धि नहीं होगी और यत्किञ्चिदवयवाभाव व्यवहारसामान्याभावका नियामक नहीं हो सकता, यह तात्पर्य है] तृतीय विकल्पमें भी क्या कारण ही रह जाता है? या कार्य भी रहता है? पहले पक्षमें तो अन्तःकरणका अभाव ही आया और द्वितीयमें व्यवहार होनेकी आपत्ति है। चतुर्थ भी ठीक नहीं है, क्योंकि संस्कारके अवच्छेद (भेद) का उपादान न होनेसे सुषुप्तिमें अनवच्छिन्न जीवकी मुक्ति हो जायगी। यदि कहो कि सुषुप्तिमें अवच्छेदक काष्ठके समान अवच्छेद्य (जीव) ही अवच्छेदका उपादान है अन्तःकरण तो कुठारके समान निमित्त ही है, तो ऐसी दशामें अवच्छेद (भेद) की सिद्धि नहीं हो सकेगी। परमार्थमें अवयवशून्य चैतन्य सावयवय काष्ठकी भाँति विदारणका उपादान नहीं बन सकता।

हमारे मतमें तो अविद्या ही भेदका उपादान है। भेद भी अविद्यामें स्थित ही आत्मामें अध्यस्त—आरोपित—होता है। अन्तःकरण भी अविद्याका कार्य होनेसे अविद्या द्वारा ही आत्माका भेदक है साक्षात्

वच्छेदकत्वम्, न साक्षात्; ततो न कोऽपि दोषः। नाप्यतिरेकादिति द्वितीयः पक्षः, क्लृप्ताविद्यासामर्थ्यादेव जीवब्रह्मविभागसिद्धावतिरेककल्पनावकाशाभावात्। न च वाच्यं जीवस्य ब्रह्मविषयाऽविद्येति निरूपणीयत्वेन विभागाधीनाऽविद्या न विभागस्य हेतुरिति, भेदाधीनस्याऽपि धर्मिप्रतियोगिभावस्य भेदहेतुत्वदर्शनात्। अन्यथा तवापि जीवाद् ब्रह्मणो व्यतिरेक इति विभागाधीनोऽतिरेकः कथं विभागहेतुः स्यात्? अपि च नाऽविद्याऽऽश्रयविषयभेदमपेक्षत इत्युपपादितमधस्तात्। नापि तृतीयः, निरवयस्य स्वत एवांऽशांशिभावायोगात्। तस्मादविद्याकृत एव विभाग आपादनीयः, स चेष्ट एव।

नहीं है, इससे कोई दोष नहीं आता। [अर्थात् जीवको अविद्याका आश्रय और आत्माको सर्वज्ञ माननेपर जीव और ब्रह्मकी वास्तविक विभागकल्पना आदि दोष नहीं आते] अतिरेकसे (भेदसे) ही विभाग है, ऐसा द्वितीय विकल्प भी नहीं बन सकता, क्योंकि मानी गई अविद्याकी सामर्थ्यसे ही जीव और ब्रह्मके विभागकी सिद्धि होनेसे अतिरेककी कल्पना करनेका अवकाश नहीं आता। ब्रह्मविषयिणी जीवकी अविद्या है, ऐसा निरूपण करना है, इसलिए विभागाधीन अविद्या भेदका कारण नहीं हो सकती [जबतक जीव और ब्रह्मका भेद सिद्ध न हो जाय तबतक 'जीवाश्रित ब्रह्मविषयक अविद्या है' इसका निरूपण ही नहीं होगा, अतः इसकी सिद्धिके लिए अविद्याके पूर्व ही विभाग मानना चाहिए। ऐसी अवस्थामें अविद्या पूर्वसिद्ध विभागको कैसे सिद्ध कर सकती है? इससे अतिरेकको ही भेदहेतु मानना चाहिए। मानी गई अविद्यासे काम नहीं चलेगा] यह शङ्का भी उचित नहीं है, क्योंकि भेदाधीन भी धर्मिप्रतियोगिभाव भेदका हेतु देखा गया है। अन्यथा व्यतिरेकवादी तुम्हारे मतमें भी जीवसे ब्रह्मका व्यतिरेक (भेद) है इस प्रकारका विभागाधीन व्यतिरेक भी विभागका हेतु कैसे बनेगा? और वस्तुतः अविद्या आश्रय और विषयके भेदकी अपेक्षा नहीं रखती है, इस विषयका पहले ही उपपादन किया जा चुका है। तृतीय पक्ष भी नहीं बन सकता, क्योंकि अवयवशून्य आत्मामें अपने-आप अवयवावयविभाव नहीं बन सकता। इसलिए अविद्यानिमित्तक ही विभाग मानना पड़ेगा। वह इष्ट ही है।

यद्यप्यसावविद्या चिन्मात्रसम्बन्धिनी जीवब्रह्मणी विभजते, तथापि ब्रह्मस्वरूपमुपेक्ष्य जीवभाग एव पक्षपातिनी संसारं जनयेद्। यथा मुखमात्रसंबन्धि दर्पणादिकं बिम्बप्रतिबिम्बौ विभज्य प्रतिबिम्बभाग एवातिशयमादधाति तद्वत्। नन्वहमज्ञ इत्यहङ्कारविशिष्टात्माश्रितमज्ञानमवभासते न चिन्मात्राश्रितमिति चेद्, मैवम्; यद्वत् 'अयो दहति' इत्यत्र दग्धृत्वायसोरेकाग्निसम्बन्धात् परस्परसम्बन्धावभासः तद्वदज्ञानान्तःकरणयोरेकात्मसम्बन्धादेव सामानाधिकरण्यावभासो न त्वन्तःकरणस्याऽज्ञानाश्रयत्वात्। अन्यथाऽविद्यासम्बन्धे सत्यन्तःकरणसिद्धिरन्तःकरणविशिष्टे चाऽविद्यासम्बन्ध इति स्यादन्योन्याश्रयता। न चाऽन्तःकरणमन्तरेणाऽविद्यासम्बन्धो न दृष्टचरः, सुषुप्ते संमतत्वात्। अथासङ्गस्य चैतन्यस्याऽऽश्रयत्वानुपपत्तेर्विशिष्टाश्रयत्वं

यद्यपि यह अविद्या शुद्ध चिद्धनके साथ ही सम्बन्ध रखती हुई जीव और ब्रह्मके विभागको करती है तथापि ब्रह्मस्वरूपकी उपेक्षा करके जीवभागमें ही पक्षपात रखती हुई संसारको उत्पन्न करती है। जैसे मुखसे सम्बद्ध दर्पण आदि बिम्ब और प्रतिबिम्बका विभागकर प्रतिबिम्बभागमें ही अतिशय (दर्पणादि उपाधिगत मालिन्य आदिके सम्बन्ध) का आरोप करता है, वैसे ही अविद्या भी चिन्मात्रसे सम्बन्ध रखती हुई जीव और ब्रह्मका भेद करके प्रतिबिम्बस्थानीय जीवमें ही असर्वज्ञत्व आदि अतिशयका उपाधिगत दोषके संसर्गसे आरोप करती है। 'अहम् अज्ञः' (मैं अज्ञानी हूँ) इस प्रकारकी प्रतीतिसे अहङ्कारविशिष्ट आत्मामें रहनेवाला ही अज्ञान प्रतीत होता है, चिन्मात्राश्रित प्रतीत नहीं होता, ऐसी शङ्का भी नहीं करनी चाहिए, क्योंकि जैसे लोहा जलाता है, इस प्रतीतिमें दाहकर्तृत्व और लोहा इन दोनोंका एक अग्निके साथ सम्बन्ध होनेसे परस्पर सम्बन्धके अवभासकी प्रतीति होती है वैसे ही अज्ञान और अन्तःकरणका एक आत्माके साथ सम्बन्ध होनेसे ही सामानाधिकरण्यकी प्रतीति होती है, अन्तःकरणके अज्ञानका आश्रय होनेसे उक्त प्रतीति नहीं होती है। अन्यथा अविद्यासे सम्बन्ध होनेपर अन्तःकरणकी सिद्धि और अन्तःकरणविशिष्टमें अविद्याका सम्बन्ध होता है, ऐसा अन्योन्याश्रय दोष आ जायगा। यह कहना भी सङ्गत नहीं है कि अन्तःकरणके बिना अविद्याका सम्बन्ध कहीं देखा ही नहीं गया है, क्योंकि सुषुप्तिमें ऐसा देखा गया है, जो सर्वसम्मत है। और असङ्ग आत्मा अविद्याका आश्रय नहीं हो सकता, अतः विशिष्ट (अन्तःकरण

कल्प्यत इति चेत्, तदाऽप्यन्तःकरणचैतन्यतत्सम्बन्धानामेव विशिष्टत्वे चैतन्यस्याऽऽश्रयत्वं दुर्वारम्। अन्यदेव तेभ्यो विशिष्टमिति चेत्, तथापि जड़स्य तस्य नाऽज्ञानाश्रयत्वम्। अन्यथा भ्रान्तिसम्यग्ज्ञानमोक्षाणामपि जड़ाश्रयत्वप्रसङ्गात्। अज्ञानेन सहैकाश्रयत्वनियमात्। न च चैतन्यस्य काल्पनिकेनाऽऽश्रयत्वेन वास्तवमसङ्गत्वं विहन्यते। अतश्चिन्मात्राश्रितमज्ञानं जीवपक्षपातित्वाज्जीवाश्रितमित्युच्यते।

यस्तु भास्करोऽन्तःकरणस्यैवाऽज्ञानाश्रयत्वं मन्यते तस्य तावदात्मनः सदा सर्वज्ञत्वमनुभवविरुद्धम्। असर्वज्ञत्वे च कदाचित् किंचिन्न जानातीत्यज्ञानमात्मन्यभ्युपेयमेव। अथाऽग्रहणमिथ्याज्ञानयोरात्माश्रयत्वेऽपि भावरूपमज्ञानमन्तःकरणाश्रयमिति मन्यसे, तदाऽपि ज्ञानादन्यच्चेदज्ञानं काचकामलाद्येव तत् स्यात्। अथ ज्ञानविरोधि, तन्न; आत्माश्रितज्ञानेनाऽन्तःकरणा-

---

विशिष्ट) में अविद्याके आश्रयत्वकी कल्पना करते हैं; यदि ऐसा है, तो अन्तःकरण, चैतन्य और इनका सम्बन्ध इन तीनोंका ही जब विशिष्टत्व प्राप्त है, तब चैतन्यका अविद्याका आश्रय होना नहीं हटाया जा सकता*। यदि विशिष्ट इन तीनोंसे भिन्न ही माना जाय, तो भी वह जड़ है, अतः वह अज्ञानका आश्रय नहीं हो सकता। अन्यथा भ्रमज्ञान, यथार्थज्ञान और मोक्षको भी जड़ाश्रित मानना पड़ेगा, क्योंकि वे अज्ञानके साथ एक ही आश्रयमें रहते हैं, यह एक नियम है। काल्पनिक आश्रयत्व माननेसे चैतन्यका पारमार्थिक सङ्गराहित्यमें कोई विरोध भी नहीं आता। इसलिए अज्ञान चिन्मात्रमें आश्रित है। वह जीवका पक्षपाती होनेसे जीवाश्रित है, ऐसा कहा जाता है।

भास्करके मतका खण्डन करते हैं—जो भास्कर अन्तःकरणको ही अज्ञानका आश्रय मानते हैं। उनके मतमें प्रथम तो अनुभवविरुद्ध आत्माके सर्वदा सर्वज्ञ होनेका प्रसङ्ग आ जायगा और अनुभवके अनुरोधसे आत्माको असर्वज्ञ माननेपर कदाचित् 'वह कुछ नहीं जानता है' ऐसा अज्ञान आत्मामें मानना ही पड़ेगा। [अर्थात् जब आत्मामें सदैव सर्वज्ञत्व नहीं है, तो उसके असर्वज्ञ होनेसे 'कुछ नहीं जानता' ऐसा कादाचित्क अज्ञानका सद्भाव आत्मामें आ ही गया, तब अज्ञानाश्रय अन्तःकरण ही है, यह कैसे बन सकता है।] आत्माको ज्ञानाऽभाव और मिथ्याज्ञानको—

---

* इस मतमें विशिष्ट प्रत्येकसे अतिरिक्त नहीं है।

श्रितस्याऽज्ञानस्य विरोधासंभवात् । एकस्मिन्नपि विषये देवदत्तनिष्ठज्ञानेन यज्ञदत्तनिष्ठस्याऽज्ञानस्याऽनिवृत्तेः । अन्यत्र भिन्नाश्रययोरविरोधेऽपि करणगतमज्ञानं कर्तृगतज्ञानेन विरुध्यत इति चेद्, न; यज्ञदत्तोऽयम् अन्तःकरणलयहेत्वदृष्टवान्, सुषुप्तौ लीयमानान्तःकरणत्वादित्यनुमातरि देवदत्ते स्थितेनाऽनेन ज्ञानेनाऽनुमितिकरणभूते सुषुप्तयज्ञदत्तान्तःकरणे स्थितस्याऽज्ञानस्याऽनिवृत्तेः । ज्ञातृसंबन्धिन्यन्तःकरणे स्थितस्य निवृत्तिरस्त्येवेति चेद्, न; अज्ञानस्याऽन्तःकरणगतत्वे मानाभावात् । विमतं करणगतं भ्रान्तिनिमित्तदोषत्वात् काचादिकवदिति चेत्, तर्हि चक्षुरादिषु तत्प्रसज्येत । सादित्वात्तेषामनाद्यज्ञानाश्रयत्वानुपपत्तिरिति चेद्, अन्तःकरणेऽपि तुल्यम् । सत्कार्य-

---

विपर्ययका आश्रय माननेपर भी भावरूप अज्ञानका अन्तःकरण ही आश्रय है, यदि ऐसा मानते हो, तो भी यदि अज्ञानशब्दसे ज्ञानसे भिन्न अर्थका ग्रहण है, तो वह काचकामल आदि (रोग) ही होगा । यदि अज्ञानशब्दका ज्ञानविरोधी अर्थ कहो, तो उसे कह नहीं सकते, क्योंकि आत्मामें रहनेवाले ज्ञानसे अन्तःकरणमें स्थित अज्ञानके विरोधका असम्भव है । एक विषयमें भी देवदत्तके ज्ञानसे यज्ञदत्तका अज्ञान निवृत्त नहीं होता । [ज्ञान और अज्ञानका सामानाधिकरण्यसे ही विरोध होता है ।] दूसरे स्थलोंमें भिन्न-भिन्न अधिकरणमें स्थित ज्ञान और अज्ञानका विरोध न होनेपर भी करण (साधन) में विद्यमान अज्ञान कर्तामें स्थित ज्ञानसे विरुद्ध होता ही है, यदि ऐसा कहो, तो यह कहना भी उचित नहीं है, क्योंकि 'यह यज्ञदत्त अन्तःकरणविनाशक अदृष्टवाला है, सुषुप्तिमें इसके अन्तःकरणका लय हो जानेसे इस तरहका अनुमान करनेवाले देवदत्तमें (प्रमातामें) विद्यमान इस (पूर्वोक्त अनुमानरूप) ज्ञानसे अनुमितिके साधनभूत सुषुप्त यज्ञदत्तके अन्तःकरणमें स्थित अज्ञानकी निवृत्ति नहीं होती है । ज्ञाताके ही अन्तःकरणमें स्थित अज्ञानकी निवृत्ति होती ही है, ऐसा भी नहीं कह सकते, क्योंकि अज्ञान अन्तःकरणका आश्रयण करता है, इसमें कोई प्रमाण नहीं है । विमत (अज्ञान) करणमें रहता है, भ्रान्तिके कारणस्वरूप दोष होनेसे, काच आदि रोगके समान । यह अनुमान प्रमाण होगा, यदि ऐसा मानो, तो चक्षुरादि इन्द्रियोंमें उस अज्ञानकी प्रसक्ति हो जायगी । यदि कहो कि नेत्र आदि सादि हैं, इससे वे अनादि अज्ञानके आश्रय नहीं बन सकते, तो अन्तःकरण भी सादि है, अतः वह भी अज्ञानका

वादाश्रयणान्न साद्यन्तःकरणमिति चेत्, चक्षुरादावपि तुल्यम्। अतो नाऽन्तःकरणाश्रयमज्ञानम्, किन्तु आऽत्माश्रयम्।

तदुक्तमाक्षेपपूर्वकं विश्वरूपाचार्यैः—

'नन्वविद्या स्वयंज्योतिरात्मानं ढौकते कथम्।
कूटस्थमद्वितीयं च सहस्रांशुं यथा तमः॥
प्रसिद्धत्वादविद्यायाः साऽपह्नोतुं न शक्यते।
अनात्मनो न सा युक्ता विना त्वात्मा तया नहि॥' इति।

तस्याश्चाऽविद्याया जीवब्रह्मविभागहेतुत्वं पुराणेऽभिहितम्—

'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥' इति।

आश्रय नहीं बन सकता। यदि कहो कि सत्कार्यवादके आश्रयणसे अन्तःकरण सादि नहीं है, तो चक्षु आदिमें भी यही बात लागू हो सकती है। इसलिए अज्ञान अन्तःकरणका आश्रयण नहीं करता, किन्तु आत्माका ही आश्रयण करता है।

इस निर्णयको विश्वरूपाचार्यने आक्षेपपूर्वक कहा है—जैसे सूर्यका आच्छादन अन्धकार नहीं कर सकता वैसे ही स्वयंज्योति (स्वतः प्रकाशमान), कूटस्थ (नित्य) तथा अद्वितीय आत्माका अविद्या आच्छादन नहीं कर सकती है [अर्थात् जैसे अन्धकार सूर्यको नहीं ढक सकता वैसे ही जड़स्वरूप अविद्या भी चेतनात्मक आत्माको नहीं ढक सकती। यदि आत्मा घटादिके समान परप्रकाश होता अथवा स्वप्रकाश होता हुआ कादाचित्क प्रकाशवाला होता, अथ च सावयव या परिणामी होता, तो शायद यह सम्भव होता, परन्तु आत्मा ऐसा है नहीं यह स्वयंज्योति और कूटस्थ विशेषणोंसे दर्शाया गया है। किञ्च, सूर्यको जैसे बादल ढक लेते हैं, वैसे ही अविद्या भी उसे ढक लेती है, यह भी नहीं कह सकते, क्योंकि वह तो अद्वितीय है। उसके अतिरिक्त बादलके स्थानमें और कोई दूसरा पदार्थ तो है ही नहीं, यही अद्वितीय विशेषणका अभिप्राय है]।

दूसरे श्लोकसे अविद्या ही न मानी जाय, इस पक्षका खण्डन करते हैं—अविद्या प्रसिद्ध है [स्वयंप्रकाश आत्माके ब्रह्मस्वरूपका भान न होनेसे] इससे उसका अपह्नव नहीं कर सकते। वह अविद्या अनात्माश्रित है (अर्थात् उसका आश्रय अनात्मा है) यह कहना युक्तिसंगत नहीं हैं, क्योंकि उस अविद्याके बिना अनात्माकी आत्मा—सत्ता—ही नहीं है।

अविद्याया अनादित्वादेवाऽनादिविभागहेतुत्वमविरुद्धम् । अविद्याऽनादित्वं च 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' इति स्मृतावुक्तम् । प्रकृतिर्नाम माया, 'मायां तु प्रकृतिम्' इति श्रुतेः । मायाविद्ययोश्चैकत्वमवोचाम ॥

नन्वेवं स्वप्रकाशस्याऽविद्याश्रयत्वेऽपि नाविद्याविषयत्वं संभवति, सदा भासमानत्वात् । नहि भासमाने घटे घटं न जानामीत्यज्ञानविषयत्वं व्यवहरन्ति । त्वदुक्तमर्थं न जानामीति भासमानस्यैवाऽर्थस्याऽज्ञानं प्रति व्यावर्त्तकतया विषयत्वं व्यवह्रियत इति चेद्, न; तत्राप्यनवगतस्यैवाऽर्थगतविशेषाकारस्य विषयत्वात् । अनवगतस्य व्यावर्त्तकतया प्रतीतिर्न युक्तेति चेद्, एवं तर्हि त्वदुक्तमर्थं न जानामीत्यत्रापि गतिस्त्वयैव वाच्येति ।

और वह अविद्या जीव और ब्रह्मके विभागका कारण पुराणमें कही गई है—

जब ज्ञानदशामें भेदको उत्पन्न करनेवाला अज्ञान अत्यन्त नष्ट हो गया, तब आत्मा (जीव) और ब्रह्मका असद् (स्वतः न होनेवाला) भेद कौन करेगा ?

अविद्या अनादि है, इसलिए इसको अनादि भेद (जीव-ब्रह्म भेद) का हेतु होनेमें विरोध नहीं है । अविद्याकी अनादिता 'प्रकृतिं०' (प्रकृति (माया-अविद्या) और पुरुष इन दोनोंको ही अनादि समझो,) इस स्मृतिमें कही गई है । प्रकृति मायाका नाम है, क्योंकि 'मायां तु प्रकृतिं' (प्रकृतिको ही माया समझो) इस तरह श्रुतिमें कहा है । माया और अविद्याके एकत्वका प्रतिपादन तो हम पहले ही कर चुके हैं ।

शङ्का—इस पूर्वोक्त विवेचनके अनुसार स्वप्रकाश ब्रह्मके अविद्याश्रय सिद्ध होनेपर भी उसके सदैव भासमान होनेसे वह अविद्याका विषय नहीं हो सकता । घटके प्रकाशित होनेपर 'मैं घटको नहीं जानता हूँ' इस प्रकार घटमें अज्ञानविषयताका कोई व्यवहार नहीं करता । 'तुम्हारे कहे हुए अर्थको मैं नहीं जानता हूँ' इस प्रतीतिसे भासमान अर्थके ही अज्ञानके प्रति व्यावर्तक होनेसे अज्ञानविषयत्वका व्यवहार होता है, ऐसा कहना भी नहीं बनता, क्योंकि उक्त प्रतीतिमें भी जो ज्ञात नहीं हुआ है वही (अर्थमें रहनेवाला विशेषाकार) अज्ञानका विषय है । ['त्वदुक्त अर्थका सामान्य ज्ञान होनेपर भी विशेष ज्ञान नहीं हुआ' यह 'त्वदुक्तमर्थं न जानामि' इस वाक्यका तात्पर्य है] जो ज्ञात

उच्यते--प्रमाणेन हि प्रकाश्यमानोऽर्थो नाऽज्ञानस्य विषयः, प्रमाणस्याऽज्ञाननिवर्त्तकत्वात् । यत्तु साक्षिप्रत्यक्षगम्यं घटादिकं चैतन्यमेव वा न तस्याऽज्ञानविषयत्वे काचिद्धानिः । नहि साक्षिचैतन्यमज्ञान-निवर्त्तकं प्रत्युत तत्साधकमेव । अन्यथैतदज्ञानं सर्वैः प्रमाणैर्न्यायैश्च विरुध्यमानं कथं सिध्येत् । तदुक्तम्--

'सेयं भ्रान्तिर्निरालम्बा सर्वन्यायविरोधिनी ।
सहते न विचारं सा तमो यद्वद्दिवाकरम् ॥' इति ।

विचारासहत्वं चाऽविद्याया अलङ्कार एव । तदप्युक्तम्--

नहीं है, उसकी विशेषणतया प्रतीति नहीं हो सकती, यदि ऐसा कहो तो 'तुम्हारे अर्थको मैं नहीं जानता' इस वाक्यकी संगति भी आप ही (वेदान्ती) करें ? [अर्थात् अनवगत तो विशेषण हो ही नहीं सकता, परन्तु अवगत भी जब अज्ञानका विशेषण नहीं हो सकता तब जैसे सदाभास भाव ब्रह्म अज्ञानका विषय नहीं बन सकता वैसे ही 'त्वदुक्तम्' इत्यादि वाक्यकी भी पूर्वोक्त रीतिसे असङ्गति नहीं हट सकती, शङ्काका यही तात्पर्य है]

उत्तर देते हैं—प्रमाण द्वारा प्रकाशित होनेवाला अर्थ अज्ञानका विषय नहीं हो सकता, क्योंकि प्रमाण अज्ञानका निवर्तक होता है । किन्तु जो केवल साक्षि-प्रत्यक्षसे ज्ञात होनेवाला घटादि अथवा चैतन्य ही है उसके अज्ञानका विषय होनेमें कोई हानि नहीं है । साक्षि-चैतन्य अज्ञानका निवर्तक नहीं होता है, बल्कि इसके विपरीत अज्ञानका साधक ही होता है । अन्यथा यह अज्ञान सब प्रमाण या न्यायोंसे विरुद्ध होता हुआ कैसे सिद्ध हो सकेगा ? वह इस प्रकार कहा गया है—

वह यह भ्रान्ति (अज्ञान) आलम्बन रहित होती हुई (प्रमाणरूपी या विषयरूपी आलम्बशून्य) सब न्यायोंसे विरोध रखनेवाली विचारयुक्तिके सामने नहीं ठहर सकती, जैसे कि सूर्यके सन्मुख अन्धकार नहीं ठहर सकता ।

और विचारोंके युक्तियोंके—सामने न टिक सकना अविद्याका अलंकार ही है । ऐसा भी कहा है—

'अविद्याया अविद्यात्वमिदमेवात्र लक्षणम् ।
यद्विचारासहिष्णुत्वमन्यथा वस्तु सा भवेत् ॥' इति ।

न चाऽविचारितरमणीयाया आत्मानमाच्छादयितुमसामर्थ्यं शङ्कनीयम्,

'अहो धाष्टर्यमविद्याया न कश्चिदतिवर्त्तते ।
प्रमाणं वस्त्वनादृत्य परमात्मेव तिष्ठति ॥' इत्युक्तत्वात् ।

युक्त्येकशरणेनाऽप्यनुभवो नाऽपलपितुं शक्यते, अनुभवनिष्ठत्वाद्युक्तेः । अन्यथा युक्तिरप्रतिष्ठितैव स्यात् । अनुभूयते हि स्वयंज्योतिषोऽपि भोक्तृदेहादिसंघाताद्व्यावृत्तत्वमज्ञानतिरोहितमेव ।

नन्वहमित्यात्मप्रतीतौ तद्भेदोऽपि प्रतीयत एव भेदस्य वस्तुस्वरूपत्वात् ।

युक्तियोंके सामने न ठहर सकना ही अविद्याका अविद्यात्व है और वही लक्षण है, अन्यथा (यदि युक्तियोंसे वह सिद्ध हो सके) तो वह यथार्थ वस्तु ही हो जाय ।

इस प्रकार अविचारितरमणीय (बिना विचारके ही सुन्दर मालूम पड़नेवाली, विचार करनेपर कुछ नहीं) अविद्यामें आत्माको आच्छन्न करनेकी सामर्थ्य नहीं है, यह शङ्का नहीं करनी चाहिए, क्योंकि—

'आश्चर्य है ! अविद्याकी कितनी प्रबल धृष्टता है जिसका अतिक्रमण कोई कर नहीं सकता । जो अविद्या प्रमाण वस्तुका भी तिरस्कार करके परमात्माके ऊपर आसन जमा बैठी है ।' यह कहा गया है ।

केवल युक्तियोंका सहारा लेनेवाला पुरुष भी अनुभवका अपलाप नहीं कर सकता है, क्योंकि युक्ति भी अनुभवपर ही निर्भर है । नहीं तो युक्ति प्रतिष्ठित (प्रसिद्ध) नहीं हो सकती है । [अर्थात् केवल युक्तिसे, जिसमें अनुभवका संवाद न हो वस्तुसिद्धि नहीं मानी जाती है, ऐसी युक्तियां केवल प्रलाप कहलाती हैं] स्वयंज्योति—स्वप्रकाश—आत्माका देहादिसंघातरूप भोक्तासे भेद अज्ञानसे आच्छन्न है, यह अनुभव सिद्ध है ।

शङ्का—'अहं' इस प्रकारकी आत्मप्रतीतिमें देहादिसंघातसे आत्मामें भेद भी प्रतीत ही होता है (इससे भेद अज्ञानसे आच्छन्न है ऐसा कहना नहीं बनता), क्योंकि भेद वस्तुका स्वरूप ही है [अर्थात् आत्मा और देहादिसङ्घातका भेद उसका स्वरूप ही है । तब 'अहम्' इस स्वरूपके भानके साथ-साथ तत्स्वरूप

न चाऽहं मनुष्य इति मिथ्याभूतदेहतादात्म्याभिमानेन भेदस्तिरोहित इति वाच्यम्, ऐक्याभिमानस्य भेदप्रतीत्यनुसारेणापि गौणतयोपपत्तौ भेदप्रतीतिविरुद्धमिथ्यात्वकल्पनायोगात्। यदि देहसमानाधिकृतत्वादहमिति प्रत्ययो नाऽऽत्मनो देहव्यतिरिक्तत्वं गृह्णीयात्तदा तन्नैव सिध्येत्, प्रमाणाभावात्। आगमानुमानयोरपि तद्विरोधे प्रमाणत्वायोगात्। न चाऽहंप्रत्ययस्य द्विचन्द्रादिबोधवन्मिथ्यात्वादविरोध इति वाच्यम्, आगमानुमान-

---

भेदका भी भान हो ही गया, यह भाव है]। 'मैं मनुष्य हूँ' इस प्रकारकी प्रतीतिसे देहके साथ मिथ्याभूत तादात्म्य (अभेद) का अभिमान होनेसे भेदप्रतीति तिरोहित हो गई है, ऐसा भी नहीं कह सकते, क्योंकि भेदप्रतीतिका अनुसरण करनेसे भी ऐक्य (अभेद) का अभिमान गौणलक्षणासे भी उपपन्न हो सकता है, इससे भेदप्रतीतिके विरुद्ध मिथ्यात्वकी कल्पना नहीं की जा सकती। [जैसे सिंह और माणवकके भेदके सर्वप्रसिद्ध होनेसे भी 'सिंहो माणवकः' ऐसा सामानाधिरण्यनिर्देशसे लक्षणाके द्वारा सिंह और माणवकमें अभेदकी प्रतीति होती है जिससे शौर्यातिशयका बोध होता है वैसे ही 'अहं मनुष्यः' इति प्रतीतिमें भी लक्षणाके द्वारा अभेदकी प्रतीति होती है।] यदि 'मैं मनुष्य हूँ' इस प्रतीतिमें मनुष्यपदसे बोधित होनेवाले देहके साथ समानाधिकरण होनेसे 'मैं' यह प्रत्यक्ष प्रतीति आत्मासे देहके भेदका ग्रहण न करा सके, तो वह (देह और आत्माका भेद) सिद्ध ही नहीं हो सकेगा, इसमें दूसरा कोई प्रमाण ही नहीं है। [वस्तुमात्रकी सिद्धि प्रायः प्रत्यक्षसे ही होती है और दूसरे आगम, अनुमान आदि भी प्रत्यक्षका विरोध न करते हुए ही प्रमाण होते हैं। एवं प्रकृतमें आत्माका प्रत्यक्ष 'अहम्' (मैं) ऐसी प्रतीति है। वह प्रतीति मनुष्य (देह) के साथ समानाधिकरण होनेसे देह और आत्माके भेदका ग्रहण नहीं कराती, प्रत्युत अभेदका बोधन कराती है, इसलिए प्रत्यक्ष ही अभेदका ग्राहक है, तद्विपरीत भेदका ग्राहक और कोई दूसरे प्रमाण नहीं माने जा सकते। अतः प्रमाणाभाव है, यह तात्पर्य है।] आगम—शास्त्र और अनुमान न्यायवाक्यप्रयोग भी प्रत्यक्षके—विरोधमें प्रमाण नहीं माने जाते हैं। 'अहम्' प्रत्यक्ष भी (जो देहादिसे अभिन्नविषयक-सी प्रतीति है) द्विचन्द्रादिज्ञानके तुल्य मिथ्या है, ऐसा नहीं

प्रामाण्यसिद्धौ तन्मिथ्यात्वं तन्मिथ्यात्वे चेतरप्रामाण्यमित्यन्योन्याश्रयत्वात्। द्विचन्द्रादिबोधस्य प्रमाणबलाबलचिन्तायाः प्रागेव झटिति बाध्यत्वात्तन्मिथ्यात्वसिद्धिः। अत्र तु प्रमाणबलाबलचिन्तायामसञ्जातविरोधितयाऽहंप्रत्यय एव बलीयानिति तद्विरुद्धाभ्यामागमानुमानाभ्यां देहव्यतिरिक्तत्वं न सिध्येत्। तस्मादहंप्रत्ययेनैव देहव्यतिरिक्तत्वसिद्धौ मनुष्यत्वाभिमानो गौणो न मिथ्येति।

नैतत्सारम्, किमर्थतो देहव्यतिरिक्तात्मविषयोऽहंप्रत्ययः किं वा प्रतिभासतः? नाऽऽद्यः, अर्थतो भेदसत्ताया अप्रयोजकत्वात्। सिंहो देवदत्त इत्यादौ हि भेदप्रतिभास एव गौणत्वप्रयोजको दृष्टः। अन्यथा इदं

कहना चाहिए, क्योंकि 'आगम और अनुमानके प्रामाण्यकी सिद्धि होनेपर उसका मिथ्यात्व और उसका (देह और आत्माके तादात्म्यका) मिथ्यात्व सिद्ध होनेपर आगम आदिका प्रामाण्य सिद्ध होगा' इस प्रकार अन्योन्याश्रय दोषका प्रसङ्ग होगा। द्विचन्द्रादिप्रत्यय तो मिथ्या सिद्ध हो जायगा, क्योंकि वहाँपर एकचन्द्रप्रतिपादक आगमादि प्रमाण प्रबल है, द्विचन्द्रके प्रत्यक्ष आदि दुर्बल हैं, इस विचारके पहले ही शीघ्र द्विचन्द्रप्रत्यक्ष बाधित हो जाता है। (इससे द्विचन्द्रादिस्थलमें अन्योन्याश्रयका अवसर नहीं है) 'अहम्' प्रत्यक्षमें तो प्रमाणकी बलाबल चिन्ताका अवसर आनेपर कोई विरोध न होनेसे 'अहं' प्रत्यक्ष ही बलवान् हो जाता है, इसलिए 'अहं' प्रत्यक्षसे विरुद्ध आगम और अनुमान दोनोंसे आत्मामें देहका भेद सिद्ध नहीं हो सकेगा। अत एव 'अहं' प्रत्यक्ष द्वारा ही देहका भेद सिद्ध हो जानेपर अहंमें मनुष्यत्वाभिमान गौण लक्षणाके द्वारा ही है, मिथ्या नहीं है।

उत्तर—यह कथन ठीक नहीं है। क्या 'अहम्' यह ज्ञान वस्तुतः देहसे भिन्न आत्माको विषय करता है अथवा क्या प्रतिभाससे? ['अहं' इस प्रतीतिमें जैसे आत्मा भासता है वैसे ही भेद भी भासता है। यह द्वितीय विकल्पका तात्पर्य है और प्रथम विकल्पका यह तात्पर्य है कि प्रतिभास केवल आत्माका ही होता है और वह आत्मा देहसे भिन्न है, 'अहं' प्रत्ययमें भेद नहीं भासता] पहला विकल्प उचित नहीं है, क्योंकि वस्तुतः भेदका रहना किसी अर्थका साधक नहीं है। 'सिंहो माणवकः' यहांपर भी भेदका ज्ञान ही

रजतमित्यत्राऽप्यर्थतो भेदसद्भावेन गौण एव व्यवहारः स्याद्, न भ्रान्तः। द्वितीयेऽपि किमहंप्रत्ययो विचारात् प्रागेव व्यतिरेकमवभासयति उत पश्चात् ? नाऽऽद्यः, विचारशास्त्रवैयर्थ्यात्। न द्वितीयः, प्राप्ताप्राप्तविवेकेन विचारस्यैव व्यतिरेकबोधकत्वात्। ननु विचारो नाम युक्त्यनुसन्धानम्, नहि युक्तिः स्वातन्त्र्येण ज्ञानजननी किन्तु प्रमाणानुग्राहिका सती व्यतिरिक्तात्मविषयत्वमहंप्रत्ययस्य प्रमाणस्य विवेचयति। मैवम्, किं युक्तिर्विषयविशेषे प्रमाणं नियमयति एतावदेव त्वया ग्रहीतव्यं नाऽधिकं नाऽपि न्यूनमिति किं वा स्वतःसिद्धे विषये ग्रहणाय प्रवृत्तस्य प्रमाणस्य प्रसक्तं प्रतिबन्धं निरस्यति ? नाऽऽद्यः, पुरुषबुद्धिवैचित्र्येण युक्तीनामव्यवस्थिततया

गौण व्यवहारका साधक है। [स्वरूपतः भेद रहते हुए भी यदि उस भेदकी प्रतीति नहीं होती है, तो वहांपर भेदप्रतीति स्वतः छिपी हुई है उसके छिपानेके लिए लक्षणा या उपचारका अवसर ही नहीं है, इस दशामें उक्त 'सिंहो माणवकः' प्रतीतिको भ्रम ही कह सकते हैं गौण या औपचारिक नहीं]। अन्यथा (भेदज्ञानके बिना भी यदि गौणव्यवहार माना जाय) तो 'यह रजत है' यहांपर भी अर्थतः भेद रहनेसे (शुक्ति और रजत दोनों वस्तुओंमें स्वतः भेद होनेसे) गौणव्यवहार ही होना चाहिए भ्रमव्यवहार नहीं। द्वितीय विकल्प भी ठीक नहीं है, क्योंकि 'अहम्' यह ज्ञान विचार होनेके पूर्व ही भेदका भी बोध करा देता है अथवा विचारके अनन्तर ? पहला पक्ष उचित नहीं है, क्योंकि इससे विचारशास्त्र व्यर्थ हो जायगा। द्वितीय विकल्प भी नहीं माना जा सकता, क्योंकि प्राप्ताऽप्राप्त विवेकसे विचार ही भेदबोधक सिद्ध होता है। युक्तियोंके अनुसंधानको विचार कहते हैं। युक्तियां स्वतन्त्र होकर ज्ञानको उत्पन्न नहीं कर सकतीं, किन्तु प्रमाणोंका अनुग्रह करती हुई (अर्थात् प्रमाणोंको सहायता देती हुई—प्रमाणित करती हुई ही) प्रमाणभूत 'अहम्' प्रत्ययका देहसे भिन्न आत्मा है, ऐसा विवेचन करती हैं, यदि ऐसी शङ्का की जाय, तो वह उचित नहीं है, क्योंकि क्या युक्तियाँ प्रमाणका विषयविशेषमें नियम कर देती हैं इतना ही तुम्हें ग्रहण करना चाहिए, न तो इससे अधिक और न इससे कम ? या स्वतः सिद्ध विषयमें उसका ग्रहण करनेके लिए प्रवृत्त हुए प्रमाणके आये हुए प्रतिबन्धको दूर कर देती हैं ? इनमें प्रथम पक्ष ठीक नहीं है, क्योंकि पुरुषबुद्धियोंके विचित्र (परस्पर भिन्न-भिन्न होनेसे) अव्यवस्थित होनेसे

प्रमाणानामव्यवस्थितविषयत्वापत्तेः नन्विष्टापत्तिरेषा प्रमाणानां नियतविषयत्वे शास्त्रकाराणां मतभेदासंभवादिति चेद्, नः विरुद्धस्थले स्वमतमेव प्रामाणिकं नाऽन्यदिति सर्वैरङ्गीकारात्। अव्यवस्थितविषयत्वे च परमतान्यपि प्रामाणिकत्वेनाऽऽदर्तव्यानि स्युः। न च प्रबलयुक्तीनां बह्वीनां प्रमाणनियामकत्वं वाच्यम्, नहि सहस्रमपि युक्तयः सकलशास्त्राभिमतबुद्धिप्रभवा अपि चक्षुषः शब्दविषयत्वं सम्पादयेयुः रूपविषयत्वं वा निवारयेयुः। द्वितीये तु किमहंप्रत्ययस्य देहादिप्रतियोगिकात्मभेदोऽपि स्वतःसिद्धो विषयः किं वाऽऽत्ममात्रम्। आद्ये लौकायतिकस्य प्राकृतानां च विवेकः प्रसज्येत। अथ तेषां शास्त्रीययुक्तिभिः

युक्तिको भी अव्यवस्थितविषयत्व होनेकी आपत्ति होगी। [बुद्धिके अनुसार ही युक्ति होती है जब बुद्धि अव्यवस्थित है तो युक्ति भी अव्यवस्थित अवश्य होगी] प्रमाणोंका अनियत होना इष्ट ही है। उन्हें नियतविषय माननेपर, तो शास्त्रकारोंका मतभेद नहीं होगा, ऐसा भी कहना उचित नहीं है, क्योंकि विरुद्ध स्थलमें अपने मतको ही प्रामाणिक और दूसरेके मतको अप्रमाणिक सब लोग मानते हैं। प्रमाणोंको अव्यवस्थित विषय माननेपर तो दूसरोंके मत (सिद्धान्त) भी प्रमाण मानकर आदर करने योग्य हो जायंगे अर्थात् दूसरोंके मतोंको मानना पड़ेगा। बहुत-सी प्रबल युक्तियाँ प्रमाणकी नियामक होंगी, ऐसा भी नहीं कह सकते, क्योंकि हजारों भी युक्तियां, जो सकलशास्त्रसम्मत बुद्धियोंसे भी उत्पन्न हुई हों, शब्दको वे आंखोंका विषय नहीं बना सकतीं और न उनकी रूपविषयताका ही निवारण कर सकती हैं। [यदि युक्तियां ऐसा कर सकतीं तो हम मानते कि युक्तियाँ प्रमाण (इन्द्रियादि) की नियामक हैं। परन्तु वे ऐसा कर नहीं सकतीं; अतः युक्तियोंमें प्रमाणनियामकत्व नहीं बन सकता। द्वितीय पक्ष भी नहीं जँचता, क्योंकि 'अहं' प्रत्ययका स्वतःसिद्ध देहादिप्रतियोगिक आत्मामें भेद भी विषय है ? किं वा केवल आत्मा ही विषय है ? पहले पक्षका स्वीकार करनेपर लौकायतिक (नास्तिक) और साधारण जनोंको भी विवेकज्ञान होनेका प्रसङ्ग आ जायगा। यद्यपि कह सकते हो कि उनको (नास्तिक और साधारण जनोंको) शास्त्रीय युक्तियों द्वारा

प्रतिबन्धानिरसनादविवेकस्तथापि शास्त्राभिज्ञेन त्वया न कदाचिदपि देहादिव्यतिरिक्तोऽहमिति प्रत्येतुं वक्तुं वा शक्येत। अहमित्यनेनैव भेदोक्तौ देहादिव्यतिरिक्त इत्यस्य पौनरुक्त्यप्रसङ्गात्। अथाऽत्ममात्रं विषयः तर्हि सुखेन युक्तयोऽहंप्रत्ययस्याऽऽत्मग्रहणे प्रसक्तं प्रतिबन्धं निरस्यन्तु नैतावताऽहंप्रत्ययस्य देहादिविषयत्वमनुभूयमानमपोढुं शक्यम्।

नन्वेवमहं मनुष्य इति प्रत्ययः स्वविषयमेव गृह्णातीति भ्रमो न स्यात्। मैवम्, नहि स्वविषयग्राहि प्रमाणमन्यविषयग्राह्यप्रमाणमित्यस्मद्व्यवस्था, किन्तु सत्यग्राहि प्रमाणं सत्यानृतग्राहि चाऽप्रमाणमिति। अहंप्रत्ययश्च सत्यमात्मानमसत्यं देहादिकं चैकीकृत्य गृह्णातीति भ्रम एव। न च स्वप्रकाशे निरंशे आत्मन्यगृहीतविशेषांशासंभवादभ्रम इति

प्रतिबन्धका निरसन न होनेसे विवेक नहीं हो पाता, तो भी शास्त्रको जाननेवाले आप तो देहादिसे अतिरिक्त ही 'अहम्' है ऐसा प्रत्यय कभी भी नहीं कर सकते और न कह ही सकते हैं, क्योंकि 'अहम्' इतनेसे ही भेदका बोध हो ही गया पुनः 'देहसे भिन्न है' ऐसा कहना पुनरुक्त दोष हो जायगा। यदि 'अहम्' यह प्रत्यय केवल आत्माको ही विषय करता है, तो 'अहं' प्रत्ययके आत्माके ग्रहणमें प्राप्त हुए प्रतिबन्धको युक्तियां आनन्दसे भले ही हटावें, किन्तु इतनेसे ही (प्रतिबन्धमात्रके हटा देनेसे ही) 'अहं' प्रतीतिका देहादिविषयत्व जो अनुभवमें आ रहा है वह नहीं हटाया जा सकता। 'अहं स्थूलः' इस प्रतीतिमें 'अहम्' ज्ञानका विषय देह आदि है, ऐसा अनुभवमें आता है; इसका अपलाप नहीं हो सकता।

पूर्वोक्त प्रकारसे 'मैं मनुष्य हूँ' यह ज्ञान अपने विषय (देहादि) का ही ग्रहण करता है, तब 'अहं मनुष्यः' यह भ्रम नहीं कहा जा सकता, यदि ऐसा कहें, तो यह कहना ठीक नहीं है, क्योंकि जो अपने विषयका ग्रहण करता है वह प्रमाण और जो दूसरेके विषयका ग्रहण करता है वह अप्रमाण, इस प्रकार प्रमाण और अप्रमाणकी व्यवस्था हमारे मतमें नहीं है, किन्तु सत्य पदार्थका ग्रहण करनेवाला प्रमाण और सत्य अनृत-असत्य पदार्थका ग्रहण करनेवाला अप्रमाण माना जाता है। और 'अहम्' प्रतीति तो सत्य आत्मा और असत्य—अनात्मा देहेन्द्रियादि इन दोनोंका एकरूपसे (अभेदसे) ग्रहण

वाच्यम्, यद्वदकारादिवर्णेषु निरवयवेषु साकल्येन भासमानेषु ध्वनिगतं ह्रस्वदीर्घत्वादिकमारोप्यते न च ह्रस्वत्वादिकं वर्णधर्मः, स एवाऽयमकार इत्यादिप्रत्यभिज्ञया वर्णानां सर्वगतत्वावगमाद् वर्णसर्वगतत्वज्ञानवतामपि तद्युक्त्यननुसन्धानेन ह्रस्वत्वादिभ्रमोऽनुवर्त्तत एव तद्वदात्मन्यप्याबालपण्डितमनुभवसिद्धं देहादितादात्म्यभ्रमं शास्त्रजन्यब्रह्मात्मतत्त्वसाक्षात्कारेण विना बाधरहितं को निवारयेत्। गौणत्वं चाऽहं मनुष्य इति प्रत्ययस्योत्तरत्र समन्वयसूत्रे निराकरिष्यते।

तदेवं स्वयंप्रकाशमानो निरंशोऽप्यात्मा मिथ्याभिमानतिरोहितो ब्रह्मतत्त्वाकारेणाऽगृहीत इत्याकारभेदेन सामान्यग्रहणविशेषाग्रहणयोः संभवादधिष्ठानत्वमविरुद्धम्। ततः सत्यस्याऽधिष्ठानस्य मिथ्यावस्तुसंभेदावभास

करती है, अतः भ्रम ही है। दृष्टान्त देते हैं—जैसे अवयवशून्य अकारादि वर्णोंका पूर्ण भान होनेपर भी व्यञ्जक ध्वनिमें विद्यमान ह्रस्वत्व, दीर्घत्व आदि धर्मोंका आरोप होता है। ह्रस्वत्व आदि तो वर्णके धर्म हैं नहीं, क्योंकि 'यह वही अकार है, इस प्रकार प्रत्यभिज्ञाबुद्धिसे वर्णोंका सर्वगतत्व प्रतीत होता है। वर्णोंके इस सर्वगतत्वका ज्ञान रहते हुए भी 'उन युक्तियोंका अनुसन्धान किये बिना ह्रस्वत्व आदिकी अनुवृत्ति होती ही रहती है। दार्ष्टान्तिकमें समन्वय करते हैं—इसी तरह आत्मामें भी बालकसे लेकर धुरन्धर विद्वान् तक सबके अनुभवसे सिद्ध देह आदिका आत्मासे तादात्म्यका भ्रम शास्त्र द्वारा उत्पन्न हुए ब्रह्मात्मतत्त्वके साक्षात्कारके बिना बाध रहित होता है, ऐसी दशामें तब उसकी निवृत्ति कौन कर सकता है? 'अहं मनुष्यः' (मैं मनुष्य हूँ) यह प्रतीति गौण है, इसका समन्वयसूत्रमें खण्डन करेंगे।

इस पूर्वोक्त विवेचनसे स्वयंप्रकाश अवयवशून्य भी आत्मा मिथ्या (अहम्) अभिमानसे आच्छन्न हुआ ब्रह्मतत्त्वाकारसे गृहीत नहीं होता है। इस प्रकार आकारका भेद होनेसे ('आत्माऽस्मि' इस सामान्य आकार और ब्रह्मतत्त्वात्मक विशेषाकारका) भेद होनेसे सामान्य अंशका ग्रहण और विशेष अंशका अग्रहण—इन दोनोंका सम्भव होनेसे ब्रह्मतत्त्वका अधिष्ठान होना विरुद्ध नहीं है। ऐसी अवस्थामें 'सत्य अधिष्ठानका मिथ्यावस्तुके संसर्गसे भान होना' (अर्थात् सत्य पदार्थमें अनृत पदार्थका तादात्म्य प्रतीत होना) अध्यासका स्वरूपलक्षण भी (अहंकारादि

इति स्वरूपलक्षणमस्त्येव। विषयकरणद्रष्ट्राख्यत्रितयस्थानीये आत्मन्यविद्यादोषस्य समर्थितत्वादात्मचैतन्यस्यैवाधिष्ठानग्राहकप्रमाणत्वादनादौ संसारे पूर्वपूर्वाध्याससंस्कारस्य सुलभत्वाच्च कारणत्रितयजन्यत्वं तटस्थलक्षणमपि सुसंपादम्। यद्यप्यत्राधिष्ठानाध्यस्यमानयोरात्मानात्मनोरेकीकरणेनावभासकं चैतन्यं स्वरूपतो न जायते तथापि विशिष्टविषयोपरक्ताकारेण तस्य जन्म न विरुद्धम्। एवं च सति यत्तु पूर्वं लक्षणमुक्तं तत्र स्मृतिसमानशब्देन कारणत्रितयजन्यत्वं विवक्षितम्। अन्यस्याऽन्यात्मतावभास इत्यनेन च सत्यस्य मिथ्यासंभेदावभास इति व्याख्येयम्। तस्मादात्मन्यहङ्कारादिभ्रमो वा सोपाधिकभेदभ्रमो वा लक्षणलक्षित एवेति सिद्धम्।

अध्यासमें) है ही। एवं विषय, इन्द्रिय तथा द्रष्टा इन तीनोंके स्थानापन्न आत्मामें अविद्या दोषका समर्थन पहले किया गया है, इससे आत्मचैतन्य ही अधिष्ठानग्राहक प्रमाण है और संसारके अनादि होनेसे पूर्व-पूर्व अध्यासका संस्कार भी सुलभ है, इस प्रकार अधिष्ठान, प्रमाण और संस्कार इन तीन कारणोंसे जन्यत्वरूप तटस्थलक्षण भी (उक्त अध्यासमें) सुगमतासे घटता है। ['इदं रजतम्' यह ज्ञान अध्यस्यमान रजत और अधिष्ठान शुक्ति दोनोंको विषय करने वाला और उक्त तीन कारणोंसे जन्य है, और अहङ्काराध्यासमें जो आत्मचैतन्य ही आत्मा और अनात्माके सम्भेदका अवभासी है वह तो जन्य नहीं है, इस अभिप्रायसे शङ्का करके समाधान करते हैं] यद्यपि अहंकारादि अध्यासमें अधिष्ठान अध्यस्यमान स्वरूप आत्मा तथा अनात्माका ऐक्यसे अवभास करानेवाला चैतन्य (आत्मचैतन्य) स्वरूपतः जन्य नहीं है, तथापि विशिष्टविषयसे सम्बलित आकारवान्‌का जन्म होना विरुद्ध नहीं है। ऐसी स्थितिमें जो पूर्व लक्षण किया गया है उसमें स्मृतिसमानशब्दसे "कारणत्रितयजन्यत्व" (तीन कारणोंसे उत्पन्न होना) ऐसा विवक्षित है। 'अन्यका अन्य स्वरूपसे अवभास होना।' इस लक्षणसे 'सत्यवस्तुका मिथ्या वस्तुके संभेदका अवभास' ऐसा व्याख्यान करना चाहिए। इससे आत्मामें अहङ्कारादिका भ्रम अथवा सोपाधिक (जीव और ब्रह्मका) भेद भ्रम लक्षणोंसे—स्वरूप और तटस्थ इन दोनों लक्षणोंसे लक्षित ही सिद्ध होता है।

ननु कथं प्रत्यगात्मन्यध्यासः संभाव्यते, सर्वत्र ह्यध्यस्यमानेन समानेन्द्रियविज्ञानविषयत्वमेवाऽधिष्ठानस्य दृष्टम् । न च युष्मत्प्रत्ययापेतस्याऽऽत्मनस्तदस्ति । उच्यते—एकस्मिन्विज्ञानेऽधिष्ठानाध्यस्यमानयोः संभिन्नतयाऽवभास एवाऽध्यासेऽपेक्ष्यते नाऽधिष्ठानस्य विषयत्वं केवलव्यतिरेकाभावात् । अस्ति चाऽत्राऽऽत्मानात्मसंभेदावभासकमहमित्येकं ज्ञानम् । यद्यप्यात्मा निरंशत्वादविषयत्वाच्चांशेन वा स्वरूपेण वा नाऽस्य ज्ञानस्य विषयस्तथाप्याकाशप्रतिबिम्बगर्भितदर्पणवदात्मन्यध्यस्तमन्तःकरणमात्मप्रतिबिम्बगर्भितमहंप्रत्ययरूपेणाऽवभासते । अस्ति चेदं रजतमितिवदिदमित्यध्यासे द्वैरूप्यम् । यथाऽयो दहतीत्यत्र दग्धृत्वविशिष्टस्याऽग्नेरयसश्च द्वैरूप्यावभासस्तथाऽहमु-

शङ्का—प्रत्यगात्मामें अध्यासकी कैसे सम्भावना हो सकती है ? क्योंकि सर्वत्र शुक्तिरजत आदि अध्यास स्थलमें जिस इन्द्रियसे अध्यासके विषय रजतादिका ज्ञान होता है उसी इन्द्रियसे अधिष्ठानका भी ज्ञान होता है, इससे अधिष्ठानको सर्वत्र समानेन्द्रियविज्ञानविषयत्व ही देखा गया है। ऐसा समानेन्द्रियविज्ञानविषयत्व युष्मत्प्रत्ययके विषय न होनेवाले आत्माका नहीं है।

समाधान—एक विज्ञानमें अधिष्ठान और अध्यस्यमान दोनोंके ऐक्यसे अवभास होना ही अध्यासमें अपेक्षित है, 'अधिष्ठानका निरुक्तज्ञानविषयत्व होना' अपेक्षित नहीं है, ऐसा माननेमें केवलव्यतिरेकका अभाव है। (जो विषय नहीं है उसमें अध्यास नहीं होता ऐसा केवल व्यतिरेक नहीं है, क्योंकि विषय न होनेवाली—स्वतःप्रकाश संवित्में क्षणिकका अध्यास देखा गया है। और आत्मा तथा अनात्मा दोनोंके तादात्म्यका बोधक 'अहम्' इस आकारवाला एक ज्ञान देखा ही गया है। यद्यपि आत्मा अवयवशून्य एवं अविषय होनेसे अंशसे अथवा स्वरूपसे भी 'अहम्' इस ज्ञानका विषय नहीं है तथापि आकाशप्रतिबिम्बसे युक्त दर्पणके सदृश आत्मामें अध्यस्त हुआ अन्तःकरण जिसमें आत्माका प्रतिबिम्ब पड़ा हुआ है 'अहम्' इस आकारके ज्ञानसे प्रकाशित होता है। 'इदं रजतम्' इस अध्यासके समान 'अहम्' अध्यासमें भी दो रूप हैं ही। जैसे 'अयो दहति' (लोहा जलाता है) इस प्रतीतिमें दाहकर्तृत्वविशिष्ट अग्निका और लोहेका दो रूपसे अवभास होता है, (अग्निका लोहके आकारसे चतुष्कोणादि आकार और लोहेका दाहकर्तृत्व आदि जैसा कि पहले

पलभ इत्यत्राप्युपलब्धृत्वविशिष्टस्याऽऽत्मनोऽन्तःकरणस्य च द्वैरूप्यावभासात्। तत्र दुःखितया परिणामितया जड़तया विषयेन्द्रियादिव्यावृत्ततया वाऽनुभूयमानोंऽशोऽन्तःकरणम्, प्रेमास्पदतया कूटस्थतया साक्षितया विषयेन्द्रियाद्यनुवृत्तचैतन्यरूपतया चाऽनुभूयमानोंऽश आत्मा। तस्मादिदमनिदमात्मकोऽहंप्रत्ययः।

नन्वेतत् प्राभाकरो न सहते। तथाहि––घटमहं जानामीत्यत्र स्वप्रकाशविज्ञानं घटादीन्विषयत्वेनाऽऽत्मानं चाऽऽश्रयत्वेन स्फोरयति। ततोऽहमित्यात्मैव भासते न तत्रेदमंशः। न च वाच्यम् अयो दहतीत्यादावयःपिण्डादेर्दग्धृत्वव्यतिरेकवदहं जानामीत्यत्राऽहङ्कारस्य ज्ञातृव्यतिरेकोऽस्त्विति, यथा शीतलायःपिण्डो दीपज्वालाद्यात्मकश्च दग्धा, विविक्तो क्वचिदुपलभ्येते

प्रतिपादन किया गया है) वैसे ही 'अहमुपलभे' (मैं जानता हूं) इस प्रतीतिमें उपलब्धिकर्तृत्वविशिष्ट आत्मा और अन्तःकरणके दो रूपका प्रकाश होता है। [उपलब्धि स्फुरणरूप होनेसे जड़धर्म नहीं है अतः तद्रूप आत्मा अन्तःकरणसे सम्बद्ध हुआ-सा परिणामी अन्तःकरणके संभेदसे प्रतीत होता है।] इसमें दुःखी, परिणामी, जड़ तथा विषय और इन्द्रियसे पृथक् रूपसे प्रतीतिमें—अनुभवमें—आनेवाला अंश अन्तःकरण है और प्रेमके आलम्बनरूपसे, कूटस्थ-(अपरिणामी) रूपसे, साक्षिस्वरूपसे एवं विषय और इन्द्रियादिमें अनुवृत्त चैतन्यरूपसे अनुभवमें आनेवाला अंश आत्मा है, इससे 'इदम्' तथा 'अनिदम्'—जड़ तथा चेतन दोनोंसे सम्मिलित अवभासवाला अहंप्रत्यय है।

शङ्का—प्राभाकर (मीमांसक) इस निर्णयको सहन नहीं कर सकता। [उसके मतका उपपादन करते हैं—] 'मैं घटको जानता हूं' इस ज्ञानमें स्वतः प्रकाशमान विज्ञान (संविद्रूप ज्ञान) घटादिको विषयरूपसे और आत्माको आश्रयरूपसे स्पष्ट ही प्रकाशित करता है। इससे 'अहम्' इस आकारसे आत्मा ही प्रकाशित होता है। उसमें इदम्—जड़ अंश नहीं है। जैसे 'लोहा जलाता है' इस प्रतीतिमें लोहेके गोलेमें दाहकर्तृत्वका अभाव है वैसे ही 'मैं जानता हूं' इस प्रतीतिमें भी अहङ्कारमें ज्ञातृत्वका अभाव है, यह कहना भी उचित नहीं है, क्योंकि ठण्डा लोहा और दीपज्वालादिके रूपमें विद्यमान दाहक अग्नि ये दोनों जैसे किसी स्थलमें पृथक्-पृथक् पाये जाते हैं वैसे ही

तथाऽहङ्कारज्ञात्रोः क्वचिदपि विवेकानुपलम्भात्। ततोऽहङ्कार एवाऽऽत्मा स च संविदाश्रयत्वेनाऽपरोक्षः।

यस्तु सांख्य आत्मानमनुमिमीते जडेऽन्तःकरणे चित्प्रतिबिम्बस्तादृशबिम्बपुरःसरः, प्रतिबिम्बत्वाद्, मुखप्रतिबिम्बवदिति। तथाऽन्येऽपि स्वस्वप्रक्रियानुसारेण येऽनुमिमते तेषामात्मनो नित्यानुमेयत्वमहमित्यपरोक्षावभासविरुद्धम्। अथ परावबोधनार्थान्यनुमानानि तर्हि सन्तु नाम।

यत्तु तार्किकैरात्मनो मानसप्रत्यक्षविषयत्वमुक्तं तदसत्, प्रमाणाभावात्। मनोन्वयव्यतिरेकयोर्विषयानुभवेनैवाऽन्यथासिद्धेः। विषयानुभवं प्रत्याश्रयत्वसम्बन्धादेवाऽऽत्मसिद्धावात्मनि ज्ञानान्तरकल्पने गौरवात्।

अहङ्कार और ज्ञानका कहींपर भी विवेक (पृथक्-पृथक् स्वरूप) नहीं पाया जाता है, इसलिए अहंकार ही आत्मा है, वह संविद् (ज्ञान) का आश्रय होनेसे प्रत्यक्ष है।

मीमांसक सांख्यमतका खण्डन करता है—जड़ अन्तःकरणमें चित्का प्रतिबिम्ब चिद्रूप बिम्बपुरःसर है अर्थात् जैसा प्रतिबिम्ब चिद्रूप है वैसा ही बिम्ब भी चेतनस्वरूप है, प्रतिबिम्ब होनेसे (हेतु), मुखके प्रतिबिम्बके तुल्य (दृष्टान्त), इस प्रकार जो सांख्यवादी आत्माका अनुमान करते हैं और अन्यवादी भी जो अपनी-अपनी प्रक्रियाके अनुसार आत्माका अनुमान करते हैं उन सबके मतमें अत्माका नित्यानुमेय होना 'अहम्' इस प्रत्यक्षज्ञानसे विरुद्ध है। यदि वे लोग कहें कि हमारा अनुमान दूसरोंको समझानेके लिए है, तब तो रहे अनुमान, कोई हानि नहीं है।

नैयायिकोंने जो आत्माको मानस प्रत्यक्षका विषय कहा है, वह भी संगत नहीं है; क्योंकि ऐसा माननेमें कोई प्रमाण नहीं है। मनके साथ अन्वय और व्यतिरेक तो विषयके अनुभवसे अन्यथासिद्ध हैं। विषयानुभवके प्रति आश्रयत्वसम्बन्धसे ही आत्माकी सिद्धि होनेपर आत्मामें ज्ञानान्तरकी कल्पनामें गौरव होगा। [यदि मन है और उसका आत्माके साथ संयोग होता है तो आत्माका प्रत्यक्ष होता है। सुषुप्तिमें मन नहीं है और मनका आत्माके साथ संयोग नहीं है तो आत्मप्रत्यक्ष भी नहीं होता। इस अन्वय और व्यतिरेकसे घटादिप्रत्यक्ष ही आत्माका प्रत्यक्ष

नन्वस्तु तर्हि भाट्टमतम् । आत्मा ज्ञानकर्म, प्रत्यक्षत्वाद्, घटवत् । न च कर्मकर्तृत्वविरोधः, द्रव्यांशस्य प्रमेयत्वं बोधांशस्य प्रमातृत्वमिति व्यवस्थितत्वात् । नाऽपि गुणप्रधानभावविरोधः, प्रमेयांशः प्रधानं प्रमात्रंशो गुणभूत इति सुवचत्वात् । नैतद्युक्तम्, द्रव्यांशस्याऽचेतनस्याऽऽत्मत्वायोगात् ।

नहीं करा सकता, किन्तु आत्ममनःसंयोग ही आत्माका प्रत्यक्ष करा सकता है, यह नैयायिकका अभिप्राय है । मीमांसक खण्डन करता है—प्रदर्शित अन्वय और व्यतिरेक घट, पट आदि ज्ञानके ही साधक हैं । आत्म-मनःसंयोगके बिना कोई भी ज्ञान नहीं हो सकता । इससे जैसे विषय और ज्ञानके सम्बन्धसे विषयका प्रत्यक्ष होता है उसके प्रकाशके लिए ज्ञानान्तरकी कल्पना नहीं की जाती, वैसे ही आत्माका भी विषयानुभवके साथ आश्रयत्व-सम्बन्धसे ही आत्माका प्रत्यक्ष हो जायगा, इसलिए आत्मविषयक अतिरिक्त ज्ञानकी कल्पना गौरवग्रस्त है ।]

भाट्टमत (प्रभाकरसे भिन्न कुमारिलभट्टके अनुयायियोंका मत) ही मान लिया जाय ? उनके मतमें 'आत्मा ज्ञानका कर्म है, प्रत्यक्ष होनेसे, घटके तुल्य' इस अनुमानसे आत्मा ज्ञानका कर्म है, यह सिद्ध है । [जैसे ज्ञानसे घटादिमें प्राकट्यनामक फल उत्पन्न होता है और उस फलके आश्रय होनेसे घटादि ज्ञानके कर्म हैं वैसे ही आत्मा भी आत्मज्ञानका कर्म है और स्वप्रकाशज्ञान उसमें प्राकट्यरूप फल उत्पन्न करता है, यह तात्पर्य है ।] इस प्रकार भाट्टमतका स्वीकार करनेपर कर्मकर्तृविरोध होगा [अर्थात् जो आत्मा स्वयं ज्ञानकर्ता है वह ज्ञानकर्म नहीं हो सकता । यद्यपि 'तण्डुलः पच्यते स्वयमेव' के समान कर्म आदि भिन्न-भिन्न कारक भी कर्ता हो सकते हैं तथापि एकको एक ही कालमें भिन्न-भिन्न कारकत्वकी प्राप्ति नहीं हो सकती ।] यदि ऐसा कहो, तो ऐसा भी नहीं कह सकते, क्योंकि द्रव्यांशको प्रमेयत्व (कर्मत्व) और बोधांशको प्रमातृत्व (कर्तृत्व) माननेसे व्यवस्था बन सकती है । [अर्थात् इस मतमें द्रव्य और बोध उभयस्वरूप ही आत्मा है, इसमें द्रव्यस्वरूप बोधाकारको प्रधान माननेसे आत्मामें कर्तृत्वकी और बोधस्वरूप द्रव्याकारको प्रधान माननेसे कर्मत्वकी उपपत्ति हो जायगी, इससे एकके एककालमें शक्तिद्वय माननेमें विरोध नहीं आता ।] इससे गुण-प्रधानभावमें भी विरोध नहीं आता, क्योंकि प्रमेय अंश प्रधान और प्रमातृ

बोधांशस्यैव कर्मत्वे पूर्वोक्तविरोधद्वयानिस्तारात् । न च बोधो युगपत्प्रमेयत्वेन प्रमातृत्वेन च परिणामार्हो निरवयत्वात्, कथञ्चित्प्रधानादिवत्परिणामेऽपि प्रमातृभागस्य स्वप्रकाशत्वेन संविदाश्रयत्वेन चाऽप्रतीतावपसिद्धान्तापत्तेः; विषयत्वेन प्रतीतौ घटवदनात्मत्वप्रसङ्गात् । तस्मात् संविदाश्रयतयैवाऽऽत्मा प्रत्यक्षः, घटादयस्तु संविद्विषयतया प्रत्यक्षाः ।

यस्तु सौत्रान्तिको घटादीननुमिमीते—संवेदनेषु विषयप्रतिबिम्बाऽवभासस्तथाविधबिम्बपुरःसरः, अतस्मिंस्तदवभासत्वाद्, दर्पणगतमुखावभासवदिति,

---

अंश अप्रधान होगा, ऐसा कह सकते हैं । पूर्वोक्त यह भाट्ट मत युक्त नहीं है, क्योंकि जड़ द्रव्यांशको आत्मा मानना नहीं बन सकता। और यदि बोधरूप अंशको ही कर्म भी माना जाय, तो पूर्वोक्त कर्तृ, कर्म या गुणप्रधानभावमें विरोध बना ही रहा । बोधका प्रमातृत्वरूपसे और प्रमेयत्वरूपसे एक ही साथ परिणाम नहीं हो सकता, क्योंकि वह अवयवशून्य है; [अपरिणामी पदार्थका परिणाम नहीं हो सकता] साम्यावस्थामें निरवयव होते हुए भी कथंचित् प्रधान (सांख्याभिमत प्रकृति) के समान निरवयव बोधका परिणाम माननेमें भी प्रमातृभागकी स्वप्रकाशरूप तथा संविदाश्रयत्वरूपसे प्रतीति न होनेसे [उक्त प्रकारसे आत्माकी प्रतीति ज्ञानकर्मत्वरूपसे ही होती है यह कहा गया है] अपसिद्धान्तकी आपत्ति होगी । [इस मतमें बोध स्वप्रकाश और आत्मा संविदाश्रय माना गया है, उक्त विवेचनसे इस सिद्धान्तकी सिद्धि नहीं होगी ।] और बोधका विषयरूपसे प्रकाश होनेसे तो घटादिके समान अनात्मत्वका प्रसङ्ग आ जायगा । इससे संविदाश्रय आत्मत्वरूपसे ही प्रत्यक्ष है और घटादि तो ज्ञानके विषयत्वरूपसे प्रत्यक्ष हैं ।

जो सौत्रान्तिक (बौद्धैकदेशी) घटादिका अनुमान द्वारा ज्ञान होता है ऐसा कहता है, [अनुमानका स्वरूप दिखाते हैं—] ज्ञानोंमें विषयके प्रतिबिम्बका अवभास (पक्ष) उस आकारवाले बिम्बके सामने रहनेसे होता है (साध्य), जो जिस प्रकारका नहीं है उसमें उस प्रकारका अवभास (ज्ञान) होनेसे (हेतु), दर्पणमें दिखाई देनेवाले मुखप्रतिभासके तुल्य (दृष्टान्त), (दर्पण स्वतः मुखस्वरूप नहीं है, परन्तु मुख दिखाई देता है, अतः सिद्ध होता है कि

स व्यक्तव्यः किमस्मिन्ननुमानज्ञाने प्रतिबिम्बभावमन्तरेण साक्षाद्विषयभूता विषया अवभासेरन् न वा। आद्ये, अत्रैवाऽनैकान्तिको हेतुः। द्वितीये, प्रतिज्ञातार्थस्य बिम्बपुरःसरत्वस्याऽप्रतिभासाद् अनुमानानुदय एव। अतोऽनुभूयमानं विषयापरोक्ष्यं नाऽपलपनीयम्।

यत्तु विज्ञानवादिना विज्ञानरूपत्वेनैव विषयाणामापरोक्ष्यमुक्तम्, तदसत्; अविज्ञानरूपस्य बहिष्ठस्याऽप्यापरोक्ष्यदर्शनात्। तस्याऽपि विज्ञानरूपत्वे रजत-

---

दर्पणके सामने विद्यमान बिम्बभूत देवदत्तादिके मुखका ही प्रतिभास उसमें दिखाई दे रहा है वैसे ही ज्ञानमें भी विषय प्रतिभास है)। उस (सौत्रान्तिक) अनुमानकर्तासे कहना चाहिए कि क्या इस आपके निर्दिष्ट अनुमानज्ञानमें प्रतिबिम्बभावके बिना ही साक्षात् विषय होते हुए घट, पट आदि विषय प्रतीत होंगे या नहीं? यदि पूर्व कल्प मानते हो, तो इस पूर्वोक्त अनुमानमें ही हेतुका व्यभिचार हो गया। [अर्थात् यदि अनुमानमें घट, पट आदि साक्षात् विषय हो गये, तो वह अनुमानज्ञान तद्वान् ही हो गया। तब अतस्मिन् तदवभासरूप हेतु नहीं गया और इस अनुमानज्ञानके तुल्य प्रत्यक्षज्ञानमें भी घटादि साक्षात् विषय हो ही जायंगे, इससे हानि ही क्या होगी] द्वितीय पक्षमें तो आपके प्रति ज्ञानबिम्बपुरस्सरत्वका प्रतिभास न होनेसे अनुमानका ही उदय नहीं होगा। [अर्थात् यदि अनुमानज्ञानमें बिम्बभावको प्राप्त विषय भासित ही हो गया, तो विषयका ज्ञान हो ही गया, तब निष्प्रयोजन अनुमानका उदय क्यों होगा? और घटाकारज्ञानमें घटको विषय न मानना तो प्रत्यक्ष विरुद्ध ही है] इससे अनुभवमें आनेवाले घट, पट आदि विषयोंका प्रत्यक्ष नहीं होता, इस प्रकारका अपलाप करना उचित नहीं है।

विज्ञानवादी (दूसरे बौद्धैकदेशी) ने जो यह कहा है कि विज्ञानके साथ विषयका अभेद होनेसे घट, पट आदि विषयोंका प्रत्यक्ष होता है, तो उसका ऐसा कहना भी तुच्छ है, क्योंकि विज्ञानसे भिन्न बहिष्ठका भी प्रत्यक्ष देखा गया है। [अर्थात्* घटके प्रत्यक्षमें वह विषय होता है वैसे ही 'अयं घटः' (यह बाह्य पदार्थ

---

* नैयायिक प्रत्यक्षादि ज्ञानकी प्रक्रिया इस प्रकार मानते हैं—'आत्मा मनसे और मन इन्द्रियसे और इन्द्रिय घट, पट आदि विषयोंसे संयुक्त होती है' इस प्रक्रियाके अनन्तर समवाय सम्बन्धसे आत्मामें ज्ञान उत्पन्न होता है। इस मतमें ज्ञान आत्माका गुण है। गुण और गुणीका समवाय सम्बन्ध होता है। आत्मामें उत्पन्न हुए इस ज्ञानका प्रत्यक्ष मनः-संयुक्त

बद्धाधो न स्यात्। अतो घटादि प्रमेयं विषयत्वेन प्रत्यक्षम्। प्रमितिस्तु स्वप्रकाशत्वेन न प्रत्यक्षा।

यत्तु तार्किका मनःसंयुक्तात्मनि समवेता प्रमितिः संयुक्तसमवायसम्बन्धेन ज्ञानान्तरप्रत्यक्षेत्याहुः। यच्च भाट्टाः विषयनिष्ठा प्राकट्याख्या प्रमितिः

घट है), इस प्रकार इदन्तारूप बहिर्भाव भी विषय होता है जो विज्ञानस्वरूप नहीं है, उस बहिर्भावको भी विज्ञानस्वरूप माननेसे रजतके तुल्य उसका भी बाध नहीं होगा †। इसलिए घटादि प्रमेयोंका विषयत्वरूपसे ही प्रत्यक्ष होता है, और प्रमिति तो स्वप्रकाश है, अतः उसका विषयत्वरूपसे प्रत्यक्ष नहीं होता है।

यत्तु ग्रन्थसे ज्ञानको ज्ञेय माननेवालोंके पूर्वपक्षका उपपादन करके खण्डन करते हैं—तार्किक मनःसंयुक्त आत्मामें समवायसम्बन्धसे विद्यमान ज्ञानका संयुक्तसमवायसम्बन्धसे दूसरे ज्ञान द्वारा प्रत्यक्ष होता है, ऐसा कहते हैं। और भट्टानुयायी मीमांसक विषयमें रहनेवाला प्रकटतानामक ज्ञान संयुक्त-तादात्म्यसम्बन्ध द्वारा दूसरेसे ज्ञेय है, ऐसा कहते हैं ‡। उपरोक्त दोनों मत

आत्मामें उक्त ज्ञानके समवायसे उत्पन्न ज्ञानान्तर (अनुव्यवसाय) से होता है। निरुक्त पूर्वज्ञान स्वयं प्रत्यक्ष नहीं है। और भाट्ट मीमांसक ज्ञानको विषयसमवेत मानते हैं, उनका कहना है कि ज्ञानसामग्रीसे विषयमें प्रकटतारूप ज्ञान उत्पन्न होता है उसका प्रत्यक्ष स्वयं नहीं होता, परन्तु इन्द्रियसे संयुक्त घटादिमें होनेवाली प्रकटताके साथ घटादितादात्म्यसे उसका ग्रहण होता है।

† विज्ञानवादी "इदं रजतम्" इस भ्रममें "नेदं रजतम्" इस बाधज्ञानसे केवल इदंता—बहिर्भावमात्रका बाध मानता है, क्योंकि वह बहिष्ठ विज्ञानसे भिन्न वस्तु है। रजतका, विज्ञान स्वरूप होनेसे, बाध नहीं मानता। एवं 'अयं घटः' इत्यादि प्रत्यक्षस्थलमें भी इदन्ताको भी यदि विज्ञानस्वरूप मान लिया जाय, तो उसका भी बाध प्राप्त नहीं होगा। इसलिए इदन्ता—बहिष्ठको विज्ञानस्वरूप नहीं मान सकते, और इदन्ताका 'अयं घटः' इत्याकारक प्रत्यक्ष होता ही है। इस प्रकार बहिर्भावका जो कि विज्ञानस्वरूप नहीं है, जब प्रत्यक्ष हो ही रहा है तब यह व्याप्ति कि विज्ञानस्वरूप होनेसे ही विषयका प्रत्यक्ष है नहीं मानी जा सकती।

‡ ज्ञानग्राहक दूसरा ज्ञान माननेमें यदि ग्राह्य और ग्राहक इन दोनों ज्ञानोंका एक कालमें होना मानते हो, तो उन दोनोंका फल भी एक कालमें ही होना चाहिए जो कि सम्भव नहीं है। घटादि ज्ञानकालमें सर्वप्रथम मनमें एक प्रकारकी क्रिया होती है, उससे अनन्तर विभाग और तदन्तर पूर्व संयोगका नाश, तत्पश्चात् उत्तर संयोग इस प्रकार अनेक क्षणोंके विलम्बसे होनेवाले द्वितीय ज्ञानकाल तक प्रथम क्षणमें ही नष्ट होनेवाला प्रथम ज्ञान कैसे रह सकता है ?

संयुक्ततादात्म्येनाऽन्यवेद्येत्याहुः, तदुभयमप्यसत् ; प्रमितिगोचरप्रमित्यन्तराङ्गीकारेण युगपद्ज्ञानद्वयावस्थानप्रसङ्गात् । विनश्यदविनश्यतोः फलयोर्यौगपद्यमिष्टमेवेति चेत्, तथापि संयुक्ते वस्तुनि समवायस्य तादात्म्यस्य वा ग्रहणप्रयोजकत्वे प्रमित्याश्रयगतपरिमाणरसादीनामपि प्रमितिग्राहकेणैव ज्ञानेनाऽपरोक्षता प्रसज्येत ।

अथोच्यते--आत्मनिष्ठपरिमाणादीनां घटादिगतरसादीनां च प्रमितिप्रत्यायकज्ञानेनाऽपरोक्षत्वयोग्यता नास्तीति । एवमपि प्रमितेः स्वसत्तायां प्रकाशव्यतिरेकादर्शनाद् न घटादिवदन्यवेद्यता युज्यते ।

तुच्छ हैं, क्योंकि ज्ञानविषयक दूसरे ज्ञानके माननेपर एक कालमें ज्ञानरूप दो फलोंकी अवस्थितिका प्रसङ्ग हो जायगा। *यदि नष्ट होते हुए और नष्ट नहीं होनेवाले दो फलोंका एक कालमें रहना माना जाय† तो भी सयुंक्त हुई वस्तुमें समवाय अथवा तादात्म्यके ग्रहणप्रयोजक होनेसे प्रमितिके आश्रयमें विद्यमान परिमाण तथा रसादिके भी प्रमिति (ज्ञान) का ग्रहण करनेवाले दूसरे ज्ञानसे प्रत्यक्षका प्रसङ्ग हो जायगा‡ ।

यदि कहा जाय कि आत्मनिष्ठ परिमाणादि तथा विषयगत रसादिमें प्रत्यक्ष ज्ञानग्राहक ज्ञानविषयत्वकी योग्यता नहीं है। [इससे उक्त दोष नहीं आता] ऐसा माननेपर तो प्रमिति (ज्ञान) की अपनी सत्तामें प्रकाशका व्यतिरेक न होनेसे उसकी घटादिके तुल्य अन्यवेद्यता युक्त नहीं है× ।

---

* यहांपर इस दोषका अभ्युपगम माल्र्म होता है, क्योंकि आगे तथापिसे संयुक्तसमवाय या संयुक्ततादात्म्यके ग्राहक माननेमें अन्य दोष दे रहे हैं, परन्तु तत्त्वदीपन इस दोषका भी खण्डन करता है इसलिए तत्त्वदीपनका पाठ दिया जाता है—"न च विनश्यदविनश्यतोः सहावस्थानमिष्यते इति शङ्क्यम्, पूर्वोत्तरवेदनयोर्निवर्त्यनिवर्तकभावेन विरोधाद् भास्यभासकवत्ताऽनुपपत्तेरित्यर्थः ।.........दूषणान्तरमाह—संयुक्तेति ।" नष्ट होते हुए और नष्ट नहीं होनेवालेका साथ रहना इष्ट है, ऐसी शङ्का भी नहीं कर सकते, क्योंकि पूर्वोत्तर ज्ञानोंमें निवर्त्यनिवर्तकभाव होता है, अतः विरोध होनेसे भास्यभासक (ग्राह्यग्राहक) भाव नहीं बन सकता । आगे संयुक्तादिसे दूषणान्तर कहते हैं ।

† योग्यविभुविशेष गुणोंमें स्वोत्तरवर्तिविशेषगुणनाश्यत्व माना गया है ।

‡ जिस प्रकार संयुक्तसमवाय आत्मसमवेत ज्ञानका ग्रहण करा देता है उसी प्रकार आत्मसमवेत परिमाणका भी वही ग्रहण करा देगा । तथा संयुक्ततादात्म्यसे भी प्राकट्यके तुल्य विषयके रसादिका भी ग्रहण चक्षुसे ही होने लगेगा ।

× अनुभव आदि ज्ञान प्रकाशस्वरूप है, अतः ज्ञानान्तरसे गम्य नहीं हो सकता । यदि घट, पट आदिके तुल्य अन्यसे ज्ञेय होता, तो जैसे कभी घटादिकी सत्ताका सन्देह होनेपर जिज्ञासा होती है

न च वाच्यं प्रमाणाख्यादात्मव्यापाराद् घटादिषु जायमानस्य प्राकट्यस्य घटगतरूपादिवदन्यवेद्यतेति कोऽसावात्मनो व्यापारः परिस्पन्दः परिणामो वा ? नाऽऽद्यः, सर्वगतस्य तदसंभवात् । द्वितीये तु मृत्परिणामफलस्य घटस्य मृदि चाऽऽत्मपरिणामफलस्य प्राकट्यस्याऽऽत्मैवाश्रयः स्यात् । केशपलितत्वपरिणामाच्छरीरे वार्द्धकवदात्मपरिणामाद्विषये प्राकट्यमिति चेत् , तथापि किं प्राकट्याश्रयत्वं चेतनत्वं किं वा प्राकट्यजनकत्वम् उत तज्जनकज्ञानाख्यव्यापाराधारत्वम् । आद्ये घटादयश्चेतनाः स्युः । द्वितीये, पुनश्चक्षुरादयश्चेतना-

प्रमाणनामक आत्माके व्यापारसे घटादि विषयमें होनेवाली प्रकटता घटादि गतरूपकी भाँति अन्यवेद्य* है, ऐसा भी नहीं कहना चाहिए, क्योंकि यह आत्माका प्रमाणनामक व्यापार कौन वस्तु है ? परिस्पन्द या परिणाम ? इनमें प्रथम परिस्पन्द नहीं कह सकते, क्योंकि सर्वव्यापक आत्मामें उसका सम्भव नहीं है† । द्वितीय परिणाम पक्ष लें, तो जैसे मिट्टीका परिणामरूप फल घटका आश्रय मिट्टी ही है वैसे ही आत्मपरिणामरूप फल—प्राकट्यका भी आश्रय आत्मा ही होगा। जैसे केशपलितत्व (बालोंका पक जाना) रूप परिणामसे जनित बुढ़ापा शरीरमें रहता है, वैसे ही आत्मपरिणामसे उत्पन्न फल (प्रकटता) विषयमें रहेगा‡ यदि ऐसा कहा जाय, तो भी क्या प्राकट्य (ज्ञान) का आश्रयत्व चेतनत्व है, अथवा प्राकट्यका जनकत्व है ? किंवा प्राकट्यके जनक ज्ञाननामक व्यापारका आश्रय होना है ? इनमें प्रथम कल्प माननेमें तो घटादि विषयोंको भी चेतनत्वका प्रसङ्ग होगा। यदि द्वितीय (प्राकट्यजनकत्व) माना जाय, तो चक्षुरादि इन्द्रिय भी चेतन (संवित्के

वैसे ही ज्ञानकी सत्तामें भी सन्देह होनेसे जिज्ञासा होती; परन्तु अनुभव होनेपर उसकी सत्तामें न तो सन्देह ही होता है और न जिज्ञासा अतः अनुभव स्वसत्तामें प्रकाशस्वरूप ही है, यह भाव है ।

* प्रकटताको स्वप्रकाश माननेसे उसका जन्म नहीं हो सकता, यह शङ्का करनेवालेका आशय है ।

† परिस्पन्द-स्वचलन, प्रादेशिक पदार्थमें सम्भव है जैसे कुठार जमीनमें पड़ा है, तक्षाने हाथमें उठाया, काष्ठके ऊपर गिराया और काष्ठका छेद हुआ इस प्रकार कुठार में उत्पन्न स्पन्दने काष्ठच्छेद किया इस तरह स्पन्दका सर्वव्यापक आत्मामें सम्भव नहीं है, जिसके द्वारा विषयमें प्राकट्यने जन्म लिया, ऐसा मानते हो ।

‡ सकर्मक क्रियाविषयमें ही अतिशय उत्पन्न करती है ।

स्तथा स्युः । न तृतीयः, आत्मा ज्ञानक्रियावान्, तज्जन्यफलसम्बन्धित्वात्, यथा भुजिजन्यतृप्तिसम्बन्धी भुक्तिक्रियावान् देवदत्तः, इति हि त्वया ज्ञानाधारत्वमात्मनोऽनुमातव्यम्, तत्राऽसिद्धो हेतुः स्याद्, आत्मनः फलसम्बन्धाभावात् । 'मया घटोऽनुभूयते' इति फलसम्बन्धः प्रतीयत इति चेत्, तर्हि विषये एव फलं नाऽऽत्मनीति वदतस्तव मते प्रतीतिविरोधस्त्वयैव संपादितः स्यात् । अतोऽतिदुष्टौ तार्किकभाट्टपक्षावुपेक्ष्य प्रमातृव्यापारस्य प्रमाणस्य फलभूतायाः प्रमितेः स्वप्रकाशत्वमादर्तव्यम् ।

यत्तु सौगतेन संवेदनमेव प्रमाणं तदेव तत्फलं चेत्युक्तम्, तत्र स्फुट एव स्वात्मनि वृत्तिविरोधः । यद्यपि प्रमातुरात्मनो नाऽस्ति कश्चिद् व्यापारस्तथाप्यात्ममनश्चक्षुर्विषयाणां चतुर्णां संनिकर्ष एव प्रमाणरूपः सन् प्रमातृ-

---

जनकस्वरूप) हो जायँगे । तृतीय पक्ष भी नहीं बनता, क्योंकि आत्मा ज्ञानक्रियावाला है, उससे (ज्ञानक्रियासे) जन्य फलसम्बन्धी होनेसे, भोजन क्रियाजनित तृप्तिके सम्बन्धी भोजनक्रियावान् देवदत्तके समान, इस प्रकार ही तुम आत्मामें ज्ञानाधारत्वका अनुमानसे उपपादन करोगे । इस अनुमानमें हेतु असिद्ध है, क्योंकि आत्मामें फलसम्बन्धका अभाव *है ।

तथापि मन्त्रोंसे ही स्मरण होनेमें अदृष्टविशेष—पुण्य—की कल्पना मानी जाती है । अन्यथा मन्त्र अनर्थक हो जायँगे । [मन्त्रोंको अनर्थक मानना इष्ट नहीं है] कारण कि अध्ययनविधिसे प्राप्त हुए मन्त्रोंका आनर्थक्य नहीं बन सकता । इस सिद्धान्तके अनुसार प्रयोगोंका विधान सम्पूर्ण अङ्गोंके द्वारा प्रधान, अपूर्वका उपकार कराता हुआ मन्त्रोंसे [द्रव्यदेवतारूप] अर्थज्ञान-लक्षण उपकार कराता है । [निष्कर्ष कहते हैं—] जैसे प्रयोगविधानका कथन मन्त्रस्थलमें मन्त्रोंके द्वारा अध्ययनकालमें उत्पन्न हुए अर्थज्ञानके अतिरिक्त अपूर्वके उपकारी दूसरे ज्ञानका अनुष्ठान कराता है, वैसे ही प्रकृतमें भी मोक्षके उपकारी ब्रह्मज्ञानसे भिन्न दूसरे ज्ञानका अनुष्ठान कराना सम्भव होगा । प्रकृत दार्ष्टान्तिकमें—ब्रह्मज्ञानमें—दृष्टान्त मन्त्रोंमें जैसी प्रयोगविधि है वैसी प्रयोग-विधि नहीं है, ऐसी शङ्का नहीं करनी चाहिए, क्योंकि प्रकृतमें भी प्रयोगविधिका सम्पादन हो सकता है ।

शङ्का—कर्मके उत्पन्न—उत्पत्तिविधिसे सिद्ध—होनेपर विनियोग होता है अनन्तर अधिकारीका सम्बन्ध होनेपर प्रयोगविधिकी अपेक्षा होती है । अर्थात् प्रयोगविधिके पूर्व उत्पत्तिविधि, विनियोगविधि तथा अधिकारविधिका होना आव-श्यक है । प्रकृत ब्रह्मज्ञानमें उत्पत्ति आदि तीनों विधियोंके न होनेसे सर्वप्रथम ही प्रयोगविधिका सम्पादन कैसे हो सकेगा ?

समाधान—उत्पत्ति आदि तीनों विधियोंका भी सम्पादन किया जा सकता

त्वात्। तथाहि—'वेदान्तवाक्येनाऽऽत्मज्ञानं कुर्यात्' इत्येवं वेदान्तशब्दलक्षणकरणेन विशिष्टस्याऽऽत्मज्ञानस्य स्वरूपबोध उत्पत्तिविधिस्तावदध्याह्रियते। न च वाच्यं विशिष्टप्रतीतौ नोत्पत्तिविधित्वं सम्भवति, स्वरूपमात्रबोधकत्वादुत्पत्तिविधेरिति, 'सोमेन यजेत' इत्यत्र विशिष्टोत्पत्तिविधेरङ्गीकृतत्वात्। तत्र हि सोमशब्दो यागविशेषनामधेयं गुणवाची वेति विचार्य वल्लीविशेषे रूढस्य यागनामत्वासम्भवाद्गुणवाचित्वं निर्धारितम्। तत्र यद्यपि 'दध्ना जुहोति' इतिवत् 'सोमेन यजेत' इत्युक्ते गुणसम्बन्धः प्रतीयते, तथापि 'अग्निहोत्रं जुहोति' इतिवत् पृथगुत्पत्त्यश्रवणात् सोमगुणविशिष्टयागोत्पत्तिविधिरिति अङ्गीकर्त्तव्यम्। तद्वत् प्रकृतेऽपि विशिष्टोत्पत्तिविधिः किं न स्यात्?

है। क्योंकि 'वेदान्तवाक्यसे आत्मज्ञान करना चाहिए' इस प्रकार वेदान्तशब्दरूप करणसे विशिष्ट आत्मज्ञानकी स्वरूपबोधात्मक उत्पत्तिविधिका अध्याहार किया जाता है। विशिष्टप्रतीतिके विषयमें उत्पत्तिविधिका सम्भव नहीं है, कारण कि उत्पत्तिविधि स्वरूपमात्रका बोध करानेवाली है, ऐसी शङ्का नहीं करनी चाहिए, क्योंकि 'सोमयागसे इष्टका सम्पादन करे' इस वाक्यमें विशिष्टकी उत्पत्तिविधि मानी गई है। यहांपर सोमशब्द यागविशेषका नाम है अथवा गुणवाची है? इसका विचार करके एक लताविशेषमें रूढ़ सोमशब्द यागका नाम नहीं हो सकता, इसलिए सोमशब्द गुणवाची है, ऐसा निश्चित किया है। यद्यपि 'दहीसे हवन करना चाहिए' इस विधिके समान 'सोमसे याग करना चाहिए' ऐसा कहनेसे गुणका सम्बन्ध ही प्रतीत होता है, [उत्पत्तिविधि प्रतीत नहीं होती] तथापि 'अग्निहोत्र करता है' इस विधिके तुल्य प्रकृतमें पृथक् उत्पत्तिविधिका श्रवण नहीं है। इसलिए सोमगुणविशिष्ट यागकी ही उत्पत्तिविधि माननी चाहिए। [जैसे 'दध्ना जुहोति' यह वाक्य केवल 'अग्निहोत्रं जुहोति' इस उत्पत्तिविधिको उद्देश्य करके दधिरूप गुणमात्रका बोध कराता है वैसे प्रकृतमें कोई अन्य उत्पत्तिविधि नहीं है, जिसके द्वारा ज्ञातका अनुवाद करके सोमगुणका विधान किया जाय। दूसरी बात यह है कि प्रसिद्धिरूप रूढिके बलवान् होनेसे यागका नाम भी वल्लीविशेष सोम नहीं माना जा सकता, अतः उसके विशिष्टविधि होनेमें कोई क्षति नहीं है।] ठीक इसीके तुल्य प्रकृत—ब्रह्मज्ञानविधि—में भी उत्पत्तिविधि क्यों नहीं होगी?

स एवोत्पत्तिविधिः पर्यालोचितो विनियोगाधिकारप्रयोगाख्यविधित्रयाकारेण सम्पद्यते। प्रथमं तावदुत्पत्तिविधिबोधितमात्मज्ञानं कथमिति जिज्ञासायाम् 'फलवत्संनिधावफलं तदङ्गम्' इति न्यायेन फलवदात्मज्ञानप्रकरणपठितशमादीनि निष्फलानि इतिकर्त्तव्यत्वेन विनियोजयन्नङ्गाङ्गिसम्बन्धबोधकत्वादुत्पत्तिविधिरेव विनियोगविधिः सम्पद्यते। ततः शमादीतिकर्त्तव्यतानुगृहीतैर्वेदान्तवाक्यकरणैरात्मज्ञानं कुर्यादित्येवंरूपेण निष्पन्नः स एव विनियोगविधिः साङ्गे कर्मणि 'ममेदं कर्त्तव्यम्' इति प्रतिपत्तारमधिकारिणमाकाङ्क्षन्नर्थवादगतं मोक्षं फलत्वेन रात्रिसत्रन्यायेनोपसंहृत्य 'मोक्षकामः कुर्यात्' इत्येवमधिकारविधिः सम्पद्यते। 'रात्रिसत्रे' ह्येवमर्थवादः श्रूयते—'प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्ति' इति। तत्राऽश्रुतत्वादधिकारी कल्पनीयः। स किं

इस प्रकारकी कल्पनासे सिद्ध वही उत्पत्तिविधि विचार करनेसे नियोग, अधिकार तथा प्रयोग नामक तीनों विधियोंके रूपमें परिणत हो जाती है। [विधित्रयकी स्वरूपसम्पत्ति दिखलाते हैं—] सर्वप्रथम उत्पत्तिविधिसे बोधित आत्मज्ञान कैसे सम्पन्न हो, ऐसी जिज्ञासा होनेपर 'फलवान्‌की सन्निधिमें निष्फल उसका अङ्ग होता है' इस न्यायसे फलयुक्त आत्मज्ञानके प्रकरणमें पढ़े हुए स्वयं निष्फल शमादि (विधि) का इतिकर्तव्यताके रूपमें विनियोग करती हुई उत्पत्तिविधि ही अङ्गाङ्गिसम्बन्धबोधक होनेसे विनियोगविधि हो जाती है। [आत्मज्ञान करना चाहिए, यह तो उत्पत्तिविधि हुई और इसको अपने करणकी आकाङ्क्षासे उसका सम्बन्धबोधन करना ही विनियोगविधि है। इस कार्यको उक्त उत्पत्तिविधिने शमादिविधिको अपना अङ्ग बनाकर सम्पन्न किया है, यह भाव है।] इसके अनन्तर शमादिरूप इतिकर्तव्यतासे उपकार पाकर करणत्वको प्राप्त हुए वेदान्तवाक्योंसे 'आत्मज्ञान करना चाहिए' इस प्रकारके स्वरूपको प्राप्त वही विनियोगविधि साङ्ग—अङ्गोंके सहित—अनुष्ठानमें 'मुझे यह करना चाहिए' इस प्रकारके प्रमाता अधिकारीकी आकाङ्क्षा करती हुई अर्थवादगत मोक्षको रात्रिसत्रन्यायसे फल बनाकर 'मोक्षकी इच्छा रखनेवाला आत्मज्ञान करे' इस प्रकार अधिकारविधिके आकारको पा जाती है। 'रात्रिसत्र' (याग) में अर्थवादका इस प्रकार श्रुतिमें वर्णन आया है कि 'जो पुरुष इन रात्रिविशेषोंका उपयान करते हैं, वे प्रतिष्ठाको प्राप्त होते हैं' इसमें अधिकारीका श्रवण नहीं है, इसलिए अधिकारीकी कल्पना करनी

स्वर्गकामो भवेत् किं वाऽऽर्थवादिकप्रतिष्ठाकाम इति सन्देहः। तत्र विश्वजिन्न्यायेन स्वर्गकामः प्राप्तः। 'विश्वजिता यजेत' इत्यत्र फलस्याऽश्रुतस्याऽपेक्षायां 'स स्वर्गः स्यात् सर्वान्प्रत्यविशिष्टत्वात्' इति सूत्रेण क्वचिन्नियोज्यविशेषणत्वेन श्रुतः स्वर्ग इतरत्राऽपि फलत्वेन कल्पनीयः, सर्वेषां स्वर्गार्थित्वाविशेषादिति निर्णीतम्। तथा रात्रिसत्रेऽपि स्वर्गः फलं तत्कामोऽधिकारीति पूर्वपक्षे प्राप्ते 'फलमात्रेयो निर्देशात्' इति सूत्रेणेत्थं राद्धान्तितम्— विश्वजिदादौ फलस्योत्पत्तौ अश्रवणात् स्वर्गः कल्प्यतां नाम, रात्रिसत्रे त्वर्थवादनिर्दिष्टा प्रतिष्ठैव फलम्; सार्थवादेनैव वाक्येन नियोगप्रतीतेः। अर्थवादानां विध्येकवाक्यताया

चाहिए। वह अधिकारी स्वर्गकी इच्छा करनेवाला होगा? अथवा अर्थवादसे सिद्ध प्रतिष्ठाकी कामनावाला होगा? ऐसा सन्देह होता है। इस अवसरपर [पूर्वमीमांसामें] विश्वजिन्न्यायसे स्वर्गकी कामनावाला प्राप्त होता है, कारण कि 'विश्वजित् याग करना चाहिए' इस विधिमें फलका श्रवण न होनेसे किस फलके लिए उक्त याग किया जाय? ऐसी अपेक्षा होनेमें 'जहां कोई फलश्रुति न हो वहां सभी विधियोंके अविशेष होनेसे स्वर्गको ही फल मानना चाहिए' इस सूत्रसे किसी एक विधिमें स्वर्ग नियोज्य—अधिकारी—के विशेषणरूपसे श्रुत है, इसलिए जहांपर फलश्रुति नहीं है ऐसी दूसरी विधिमें भी स्वर्गरूप ही फलकी कल्पना करनी चाहिए, क्योंकि सभी समानरूपसे स्वर्गके प्रार्थी हैं, ऐसा निर्णय किया गया है। एवं रात्रिसत्रमें भी स्वर्गको ही फल मानना चाहिए और उसकी इच्छा रखनेवाला अधिकारी होगा, इस प्रकार पूर्वपक्षके प्राप्त होनेपर 'फलमात्रेयः*' इत्यादि सूत्र द्वारा यह सिद्धान्त किया गया है कि विश्वजित् आदि यागकी उत्पत्तिविधिमें फलका श्रवण नहीं है। इससे वहांपर स्वर्गरूप फलकी कल्पना करना संगत है, परन्तु रात्रिसत्रस्थलमें तो अर्थवादमें दिखलाया गया प्रतिष्ठारूप ही फल मानना चाहिए। कारण कि अर्थवादसे युक्त वाक्यसे ही नियोगकी प्रतीति होती है। [और स्वर्गरूप फल तो भिन्न वाक्यसे प्रतीत होता है। रात्रिसत्रका विधान तो अर्थवादके साथ एकवाक्यता प्राप्त होकर ही होता

---

* 'फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात्' (जै० सू० ४।३।१८) अर्थात् जहांपर फलनिर्देशका श्रवण नहीं हो वहींपर अनुमानसे स्वर्गरूप फलकी कल्पना करनी चाहिए।

अर्थवादाधिकरणे निर्णीतत्वात्। तत आर्थवादिकप्रतिष्ठाकामो यथा रात्रिसत्रेऽधिकारी तथा 'तरति शोकमात्मवित्' इत्याद्यर्थवादावगतमोक्षकाममधिकारिणं संपादयन्नधिकारविधिः स्यात्। ततः स एव साङ्गतत्त्वज्ञानमधिकारिणाऽनुष्ठापयन् प्रयोगविधिः संपद्यते। ततः प्रयोगविधिबलाद् मन्त्रवद् वेदान्तशब्दाः प्रथमतः स्वार्थमात्मानमवबोध्याऽपि पश्चादपूर्वोपकारिविधेयज्ञानव्यक्त्यन्तरे पर्यवस्थास्यन्ति। न च वाच्यं मन्त्राणामपूर्वोपकारिप्रत्ययमात्रे तात्पर्यम्, स्वार्थस्य ब्राह्मणवाक्यैः प्रतिपादितत्वात्। वेदान्तानां तु स्वार्थेऽपि तात्पर्यं वक्तव्यम्। अन्यतोऽप्राप्तत्वात्। अतो न विधेय-

---

है] अर्थवादवाक्योंकी विधिवाक्योंके साथ एकवाक्यता होती है। ऐसा (पूर्वमीमांसाके) अर्थवाद अधिकरणमें निर्णय किया गया है। जैसे अर्थवादसे सिद्ध प्रतिष्ठाकी इच्छावाला पुरुष रात्रिसत्रमें अधिकारी माना जाता है, वैसे ही 'आत्मज्ञानी पुरुष शोक—दुःखजालस्वरूप प्रपञ्च—को पार करता है' इस अर्थवादसे प्राप्त मोक्षस्वरूप फलकी कामनावालेको अधिकारी बनाती हुई अधिकारविधि हो जायगी। तदनन्तर वही साङ्ग तत्त्वज्ञानका—शम, दम आदि इतिकर्तव्यताविशिष्ट ब्रह्मतत्त्वसाक्षात्कारका—अधिकारीके द्वारा अनुष्ठान कराती हुई प्रयोगविधि हो जाती है। तदनन्तर प्रयोगविधिकी सामर्थ्यसे मन्त्रोंके तुल्य वेदान्तशब्द अपने अर्थभूत आत्माका बोध करानेके अनन्तर अपूर्वोपकारक दूसरी विधेय ज्ञानव्यक्तिमें पर्यवसन्न हो जायंगे। [अर्थात् जैसे मन्त्र स्वाध्यायविधिसे अपने स्वार्थका बोधन करनेके अनन्तर भी प्रयोगविधिके बलसे अपूर्वोपकारक विधेयभूत अन्य यागादि व्यक्तिमें पर्यवसित होते हैं] वैसे ही 'यदिदम्' इत्यादि वेदान्तवाक्य भी अपने स्वार्थभूत आत्माका बोध कराकर 'तरति शोकमात्मवित्' इत्यादि अर्थवादसे कल्पित प्रयोगविधिकी सामर्थ्यसे अपूर्वोपकारक दूसरी विधेय ज्ञान व्यक्तिमें पर्यवसित होंगे, यह भाव है। यदि शङ्का हो कि मन्त्रोंका तो तात्पर्य अपूर्वके उपकारक बोधनमें ही है, क्योंकि उनके स्वार्थ—द्रव्यदेवतासम्बन्ध या स्वरूप—का तो ब्राह्मणवाक्योंसे भी निर्णय किया गया है और वेदान्त वाक्योंका तो स्वार्थमें—ब्रह्मके अर्थबोधमें—भी तात्पर्य है, यह कहना होगा, कारण

प्रत्यये तात्पर्यमिति, कुल्याप्रणयनन्यायेनोभयार्थत्वाविधेयत्वात् । यथा शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्य एव पानीयं च पीयते तद्वत् ।

ननु स्थायिनां कुल्यादीनां युगपत्क्रमेण वाऽनेककार्यकारित्वमस्तु, उपलभ्यमानत्वात् । शब्दस्य तु न तावत्क्रमकारित्वं क्वचिदपि, विरम्य व्यापारानुपलम्भात् । नाऽपि युगपदर्थद्वये तात्पर्यं प्रत्यक्षेण दृश्यते । न्यायतस्तत्कल्पने च न युगपद् न्यायद्वयप्रवृत्तिः संभवतीति चेद्, न; प्रयाजवाक्येष्वर्थद्वये तात्पर्यस्याऽङ्गीकृतत्वात् । 'समिधो यजति', 'तनूनपातं यजति', 'इडो यजति', 'बर्हिर्यजति', 'स्वाहाकारं यजतीति' पञ्चवाक्यानि पञ्च प्रयाजान्

कि वह (आत्मज्ञान) दूसरे किसीसे प्राप्त नहीं है, इस लिए दृष्टान्त और दार्ष्टान्तिकमें वैषम्य होनेसे वेदान्तवाक्योंका उक्त प्रकारके विधेयमें तात्पर्य नहीं हो सकता, तो यह शङ्का उचित नहीं है, क्योंकि कुल्याप्रणयनन्यायके अनुसार वेदान्तवाक्योंका दोनोंमें अर्थात् स्वार्थ और विधेय ज्ञानव्यक्त्यन्तरमें तात्पर्य हो सकता है। जैसे—खेतीको सीचनेके लिए गूलें—पानहरे—बनाई जाती हैं और उनसे ही जल भी पिया जाता है वैसे ही वेदान्तवाक्योंमें भी समझना चाहिए । [अर्थात् अपूर्व अर्थका बोधन करानेसे वेदान्तवाक्योंका तात्पर्य स्वार्थके—ब्रह्मस्वरूपके—बोधमें भी होगा, इस परिस्थितिमें प्रयोग-विधिके बलसे ज्ञानव्यक्त्यन्तरमें तात्पर्य होनेसे वेदान्त विधिपरक भी होंगे ।]

शङ्का—कुल्यादि स्थायी पदार्थ हैं, अतः उनसे तो एक साथ या क्रमसे अनेक कार्योंका सम्पादन हो सकता है, कारण कि वैसा प्रत्यक्ष देखा जाता है । शब्दमें तो क्रमसे कार्यकारित्व कभी भी नहीं हो सकता, क्योंकि शब्दका विराम होनेके अनन्तर व्यापार नहीं देखा जाता । और एक साथ दो अर्थोंमें शब्दका तात्पर्य भी कहीं नहीं देखा गया है । यदि न्याय द्वारा दो अर्थोंमें तात्पर्यकी कल्पना करो, तो भी एक साथ दो न्यायोंकी प्रवृत्ति नहीं हो सकती है ।

समाधान—प्रयाजवाक्योंमें शब्दोंका दो अर्थोंमें तात्पर्य माना गया है ।

[प्रयाजवाक्योंमें उभयार्थता दिखलाते हैं—] 'समित् याग करता है', 'तनूनपात याग करता है', 'इडा याग करता है', 'बर्हि याग करता है' । 'स्वाहाकार याग करता है' इस प्रकार पांच वाक्य पांच प्रयाजोंका तथा

क्रमं च तदनुष्ठानस्य बोधयन्तीति ह्यङ्गीकृतम्। अतः प्रयाजवाक्यवदुभयार्था वेदान्तशब्दा मन्त्रवदपूर्वोपकारिणि ज्ञानव्यक्त्यन्तरे विधेये पर्यवस्थास्यन्तीति।

अत्रोच्यते—वेदान्तानां विधेयसमर्पकतायां न स्वार्थपरता संभवति। विधायकस्य योषिदग्न्यादिवाक्यस्य स्वार्थपरत्वादर्शनात्। योषिदादिपदार्थस्य लोकसिद्धतया न तत्र स्वार्थपरता इह तु विधिब्रह्मणोरलौकिकत्वादुभयपरत्वं वेदान्तजन्यज्ञानस्य स्यादिति चेत्, किमत्र वेदान्तेषु या ज्ञानव्यक्तिर्विधीयते सैव वेदान्तार्थभूतं ब्रह्मस्वरूपं प्रमापयति उत ज्ञानव्यक्त्यन्तरम्? आद्ये विरुद्धत्रिकद्वयापत्तिलक्षणं वैरूप्यं ब्रह्मणः प्रसज्येत। प्राधान्यमुपादेयत्वं विधेयत्वं चेत्येकं त्रिकम्।

उनके अनुष्ठानके क्रमका भी बोधन कराते हैं, ऐसा माना ही गया है। इसलिए प्रयाजवाक्योंके दृष्टान्तसे वेदान्तवाक्य दोनों अर्थमें तात्पर्य रखते हुए मन्त्रोंके समान अपूर्वका उपकार करनेवाली दूसरी ज्ञानव्यक्तिके विधानमें पर्यवसित होते हैं अर्थात् परम तात्पर्य रखते हैं। [इस प्रकार एकदेशीने ज्ञानविधिका समर्थन कर वेदान्तवाक्य भी कार्यपरक हैं, ऐसा सिद्धान्त किया है।]

[सिद्धान्तमतका प्रदर्शन करते हैं—] इस एकदेशीके मतकी आलोचनामें कहा जाता है कि वेदान्तोंका विधेयमें तात्पर्य माननेसे स्वार्थबोधनमें तात्पर्य नहीं हो सकता, कारण कि विधानमें तात्पर्य होनेसे 'योषिदग्नि' आदि वाक्योंका स्वार्थमें तात्पर्य नहीं देखा जाता। यदि कहो कि योषित् आदि पदार्थ तो लोकप्रसिद्ध हैं, इसलिए उन वाक्योंका स्वार्थके बोधनमें तात्पर्य नहीं है; प्रकृतमें तो विधि और ब्रह्म दोनों लोकसिद्ध नहीं हैं, इसलिए वेदान्तशब्दों द्वारा उत्पन्न ज्ञानका दोनोंमें तात्पर्य माना जायगा, तो यह कहना उचित नहीं है, क्योंकि प्रकृतमें जिस ज्ञानका विधान किया जाता है, वही ज्ञानव्यक्ति वेदान्तवाक्योंके अर्थभूत ब्रह्मस्वरूपका निश्चय करा देती है? अथवा उससे दूसरी ज्ञानव्यक्ति ब्रह्मस्वरूपका बोध कराती है। प्रथम पक्षके माननेसे परस्पर विरुद्ध दो त्रिकोंकी आपत्तिस्वरूप ब्रह्ममें वैरूप्य प्रसक्त हो जायगा। [उनमें प्रथम त्रिक दिखलाते हैं] प्राधान्य, उपादेयत्व और विधेयत्व यह एक त्रिक है और गुणभाव—गुणत्व—

गुणभावमुद्देश्यत्वमनुवाद्यत्वं चेत्यपरं त्रिकम्। तत्र प्रमापकस्य ज्ञानस्य प्रमेयार्थतया प्रमेयस्य ब्रह्मणः प्राधान्यम्। तथा कस्य ज्ञानमित्यपेक्षायां ब्रह्मणो ज्ञानमित्येवं विधेयज्ञानं प्रति व्यावर्त्तकतया तदर्थस्य ब्रह्मणो गुणभावः तथा प्रमाणविषयस्य ब्रह्मणः प्रमाणजन्यातिशययोगित्वाकारेण साध्यत्वादुपादेयत्वं तथा स्वभावतः सिद्धत्वाद् ब्रह्मण उद्देश्यत्वम्। तथेदानीं प्रमाणविषयस्य ब्रह्मणः पूर्वमज्ञाततयाऽङ्गीकार्यत्वाद् विधेयत्वम्। तथेदानीमुद्देश्यस्य ब्रह्मणः पूर्वं ज्ञातत्वादनुवाद्यत्वम्। तदेवं विधेयज्ञानमेव ब्रह्मप्रमापकमित्यस्मिन्नाद्यपक्षे वैरूप्यं दुर्वारम्। अस्तु तर्हि द्वितीयः पक्षः—वेदान्तेभ्य उत्पन्नं प्रथमज्ञानं ब्रह्मपरं द्वितीयज्ञानं विधेयतया

उद्देश्यत्व तथा अनुवाद्यत्व दूसरा त्रिक है। इनमें प्रथम त्रिकका प्रथम प्राधान्य ब्रह्ममें आता है, क्योंकि प्रमाजनक ज्ञान प्रमेयके लिए ही होता है, [और वह प्रमेय ज्ञानक्रियासे जन्य फलका आश्रय होनेसे ब्रह्म ही है।] अतः ब्रह्ममें प्राधान्य प्राप्त होता है।

इसके विरुद्ध द्वितीय त्रिकका प्रथम गुणत्व भी ब्रह्ममें दिखलाते हैं—'किसका ज्ञान' इस प्रकारकी अपेक्षा होनेपर 'ब्रह्मका ज्ञान' इस प्रकारके उत्तरवाक्यमें विधेयभूत ज्ञानके प्रति विशेषण होनेसे वेदान्तशब्दार्थ ब्रह्ममें गुणभाव प्राप्त होता है। एवं प्रमाणके विषय ब्रह्ममें प्रमाणजन्य अतिशयका सम्बन्ध होनेके कारण साध्यत्व होनेसे ब्रह्ममें उपादेयत्व भी आता है। और स्वभावतः सिद्ध होनेसे ब्रह्ममें उद्देश्यत्व आता है। एवं इस समय प्रमाणविषय ब्रह्ममें पहले (वेदान्तवाक्यके श्रवणसे पूर्व) अज्ञातस्वरूप माननेसे विधेयत्व सिद्ध होता है। [अपूर्व ही विधेय होता है और पूर्वसिद्ध उद्देश्य होता है, इस प्रकार उद्देश्यत्व और विधेयत्व ब्रह्ममें विरूपत्वके प्रतिपादक हैं] एवं उद्देश्यस्वरूप ब्रह्मके प्रथम ज्ञात होनेसे उसका अनुवाद भी प्राप्त होता है [जो विधेयके विरुद्ध है] इस परिस्थितिमें विधेयज्ञान ही ब्रह्मका निश्चायक है, इस प्रकारके प्रथम पक्षके माननेमें उक्त रीतिसे ब्रह्ममें वैरूप्य नहीं हटाया जा सकता। यदि कहो कि दूसरा पक्ष—विधेय ज्ञानसे अन्य ज्ञान ही ब्रह्म प्रमापक है—ही मान लिया जाय! क्या हानि है? क्योंकि वेदान्तवाक्योंसे उत्पन्न प्रथम ब्रह्मज्ञान ब्रह्मपरक होगा और द्वितीय ज्ञान विधिका

विधिपरमिति। नाऽयमपि पक्षः समीचीनः, शब्दस्योभयपरत्वाभावे तज्जन्यज्ञानस्याऽसकृज्जातस्याऽप्युभयपरत्वानुपपत्तेः। न च शब्दस्योभयपरत्वम्, प्रयाजवाक्यदृष्टान्तस्य निराकरिष्यमाणत्वात्।

ननु वैरूप्यप्रसङ्गो न दोषमावहति। अन्यथा गुणकर्मविधानानुपपत्तेः। तथाहि—क्रत्वङ्गभूतव्रीह्यादिकारकसंस्कारार्थानि कर्माणि गुणकर्माणि। तत्र व्रीहीणामन्यार्थत्वसिद्धत्वज्ञातत्वलक्षणानि गुणत्वोद्देश्यत्वानुवाद्यत्वानि तावद् विद्यन्ते। यागक्रियां प्रति कारकत्वादन्या-

---

विषय होनेसे विधिपरक होगा [इससे कोई विरोध नहीं है] तो, यह दूसरा पक्ष भी दोषरहित नहीं है, क्योंकि शब्दका दो अर्थोंमें तात्पर्य न होनेसे उस शब्दसे उत्पन्न ज्ञानके बार बार उत्पन्न होनेपर भी उसका दो अर्थोंमें तात्पर्य हो नहीं सकता, [जैसे घट-पटसे उत्पन्न घटज्ञान पुनः पुनः उत्पन्न होनेपर भी दो अर्थोंमें तात्पर्य नहीं रखता]।

शब्दका दो अर्थोंमें तात्पर्य होता है, इसमें दिये हुए प्रयाजवाक्योंके दृष्टान्तका आगे खण्डन किया जायगा। [इससे शब्दोंका दो अर्थोंमें तात्पर्य नहीं माना जा सकता, अतः अभियुक्तोंका 'सकृदुक्तः शब्दः सकृदेवार्थं गमयति' (एक बार उच्चारण किया गया शब्द एक ही अर्थका बोधन कर सकता है,) यह सिद्धान्त ही स्वीकरणीय है।]

शङ्का—वैरूप्यका प्रसङ्ग दोषाधायक नहीं है। यदि वैरूप्यप्रसङ्ग दोषकारक हो, तो गुणकर्मके विधानकी उपपत्ति न हो सकेगी, क्योंकि यज्ञके अङ्गभूत व्रीहि आदि साधनोंके संस्कारके लिए किये जानेवाले (अवघातादि) कर्म गुणकर्म कहलाते हैं। ऐसे स्थलमें व्रीहि आदि साधनद्रव्योंमें अन्यार्थत्व, सिद्धत्व तथा ज्ञानत्वस्वरूप गुणत्व, उद्देश्यत्व तथा अनुवाद्यत्व प्राप्त होता है, [अन्यार्थत्व अर्थात् स्वार्थके लोकतः सिद्ध होनेसे उसमें तात्पर्य न होनेके कारण व्रीह्यादिमें यज्ञोपकारकत्व सिद्ध होता है, अतः व्रीह्यादि गुण—विशेषण—होते हैं एवं लोकसिद्ध होनेसे अपूर्वस्वरूप विधेय नहीं हो सकते, अतः उद्देश्य ही होंगे, तथा प्रथम ज्ञान ही उद्देश्य होता है, अतः उद्देश्यका अनुवाद ही उचित है। इस आशयका स्वयं ग्रन्थकार ही प्रकाश करते हैं]—व्रीहि आदि यागक्रियाके प्रति कारक—साधन—होनेसे अन्यार्थत्व होता है। और

र्थत्वम् । मानान्तरगम्यत्वात् सिद्धत्वज्ञातत्वे । तथा शेषित्वसाध्यत्वाज्ञातत्वलक्षणानि प्राधान्योपादेयत्वविधेयत्वानि प्रोक्षणक्रियावशाद् व्रीहीणामत्र संभविष्यन्ति । प्रोक्षणस्य व्रीह्यर्थत्वाद् व्रीहीणां शेषित्वम् । प्रोक्षणजन्यातिशयवदाकारेण पूर्वमसिद्धत्वात् साध्यत्वाज्ञातत्वे । तत्र गुणत्वोद्देश्यत्वानुवाद्यत्वाख्यं त्रिकं व्रीहिशब्दात् प्रतीयते । प्राधान्योपादेयत्वविधेयत्वाख्यं त्रिकं प्रोक्षणक्रियाजन्यातिशयवाचिद्वितीयाविभक्त्या प्रतीयते । ततो व्रीहिप्रोक्षणादिषु गुणकर्मस्वेकस्यां प्रमितौ विरुद्धत्रिकद्वयापत्तिर्दुर्वारेति नेयं दोषावहेति चेद्, मैवम्; न तत्र क्रियाजन्यातिशयो विभक्तिगम्यः,

---

प्रत्यक्ष आदि अन्य लौकिक प्रमाणों द्वारा सिद्ध होनेसे—सिद्धत्व और ज्ञातत्व माना जाता है ।

इस पूर्वोक्त त्रिकसे भिन्न दूसरा त्रिक भी व्रीहि आदिमें दिखलाते हैं—शेषित्व, साध्यत्व तथा अज्ञातत्व स्वरूप प्राधान्य, उपादेयत्व तथा विधेयत्व लक्षण अन्य त्रिक भी प्रोक्षण आदि क्रियाकी सामर्थ्यसे व्रीहि आदि द्रव्योंमें सम्भव होगा । प्रोक्षणक्रिया व्रीहिके संस्कारके लिए है, अतः व्रीहिको शेषित्वलक्षण प्राधान्य प्राप्त है—[जिसके लिए जिसका विधान है, वह प्रधान होता है; जैसे सेवकोंका सब कार्य स्वामीके निमित्त होता है । वहांपर स्वामी प्रधान होता है] प्रोक्षणक्रियासे उत्पन्न अतिशययुक्त आकारसे व्रीहि प्रोक्षणसे पूर्व सिद्ध नहीं है । इसलिए उस आकारसे व्रीहियोंमें साध्यत्व और अज्ञातत्व भी प्राप्त है । इनमें गुणत्व, उद्देश्यत्व तथा अनुवाद्यत्व रूप त्रिक व्रीहिशब्दसे प्रतीत होता है और प्राधान्य, उपादेयत्व तथा विधेयत्व रूप दूसरा त्रिक प्रोक्षणक्रियासे जनित अतिशयको कहनेवाली द्वितीया विभक्तिसे मालूम होता है । [द्वितीया विभक्ति 'कर्मणि द्वितीया' (पा० सू०) से कर्मरूप अर्थमें होती है और कर्म पदार्थ क्रियाजन्यफलाश्रयत्वस्वरूप है] । इस रीतिसे गुणकर्मभूत व्रीहिप्रोक्षणादिस्थलमें एक ही ज्ञानमें विरुद्ध दो त्रिकोंकी आपत्ति दूर नहीं की जा सकती, इसलिए उक्त वैरूप्यकी आपत्ति दोषजनक नहीं मानी जा सकती ।

समाधान—ऐसा नहीं है, कारण कि उक्त गुणकर्ममें क्रियासे उत्पन्न अतिशय विभक्ति द्वारा प्रतीत नहीं होता है, किन्तु व्रीहिके लिए विहित प्रोक्षणादि क्रियाविधिकी अनुपपत्तिसे प्रतीत होता है । [अर्थात् व्रीहिमें प्राधान्यादि त्रिक

किन्तु व्रीह्यर्थक्रियाविध्यनुपपत्तिगम्यः। अतः शाब्दे ज्ञाने गुणत्वोद्देश्यत्वानुवाद्यत्वान्येव प्रमीयन्ते। प्राधान्योपादेयत्वविधेयत्वानि त्वर्थापत्त्येति ज्ञानभेदान्न तत्र वैरूप्यप्रसङ्गः। प्रकृतेऽपि तर्हि ब्रह्मज्ञानविधेयज्ञानयोर्भेदादविरोधोऽस्त्विति चेद्, न; व्रीह्यादाविव ब्रह्मणि मानान्तरस्याऽसंभवात्। नहि सामग्रीभेदमन्तरेण कार्यभेदः संभवति। अथोच्येत—विधायकपदव्यतिरिक्तपदसमुदायो ब्रह्मस्वरूपं प्रथमतः प्रतिपाद्य पुनस्तदनुवादज्ञानं जनयित्वा तस्य ज्ञानस्य विधिविषयत्वसमर्पणेन पुनर्विधायकपदेन पदैकवाक्यतां गच्छति, ततः प्रमाणभेदसिद्धिरिति। नैतद्युक्तम्, पदैकवाक्यतायाः प्राग् वाक्यरूपस्य पदसमुदायस्य प्रमाणत्वायोगात्। अथाऽत्र

अर्थापत्तिगम्य है, साक्षात् शब्द द्वारा नहीं, यह भाव है] अतएव शब्दजनित ज्ञानमें गुणत्व, उद्देश्यत्व तथा अनुवाद्यत्वरूप त्रिककी ही प्रतीति होती है। प्राधान्य, उपादेयत्व तथा विधेयत्व रूप त्रिक तो अर्थापत्तिसे प्रतीत होता है। इस प्रकार ज्ञानभेद होनेसे वैरूप्यका प्रसङ्ग नहीं है। तब तो प्रकृतमें भी ब्रह्मज्ञान और विधेयज्ञानमें भेद होनेसे कोई विरोध नहीं होगा, ऐसा कहना भी नहीं बनता, कारण कि व्रीहि आदि (लौकिक द्रव्यों) की भाँति ब्रह्ममें किसी दूसरे प्रमाणका सम्भव नहीं है। सामग्रीके भेदके बिना कार्यभेदका सम्भव नहीं है। यदि विधायक पदोंके अतिरिक्त शब्दोंका समुदाय—वेदान्तवाक्य—पहले ब्रह्मस्वरूपका प्रतिपादन कर, पश्चात् उसके अनुवादज्ञानको उत्पन्न करके उस ज्ञानको विधिका विषय बनानेके अनन्तर बिधायक पदोंसे पदैकवाक्यताको प्राप्त होता है, इस कारण प्रमाणभेदकी सिद्धि हो जायगी, [इस आशङ्काके द्वारा करणभेदसे ज्ञानभेद दिखलाया। ब्रह्मस्वरूपका बोधक स्वतन्त्र वेदान्तवाक्य करण—प्रमाण—है। और ज्ञानबिधिकी बोधक पदैकवाक्यताकी रीतिसे विधायक वाक्योंके साथ एकवाक्यतापन्न वेदान्तवाक्य करण हैं, इससे करणभेद सिद्ध हुआ। इस पूर्व शङ्काके समाधानसे तो एक शब्दज्ञानका दोनोंमें तात्पर्य होनेका निराकरण किया गया था], ऐसा कहो तो यह कथन भी युक्त नहीं है, कारण कि पदैकवाक्यसे पहले वाक्यरूप पदसमुदाय प्रमाण नहीं माना जा सकता।

ब्रह्मवाक्यं ज्ञानविधिवाक्यं चेति द्वेधा विभज्य पश्चादर्थवादविधिवाक्ययोरिव वाक्यैकवाक्यता कल्प्येत, तदसत्; अर्थवादानामफलानां विध्येकवाक्यत्वेऽपि ब्रह्मवाक्यस्य स्वत एव पुरुषार्थपर्यवसायिनस्तदयोगात्। अथ प्राथमिकशाब्दज्ञानस्य परोक्षत्वेनाऽफलत्वात् फलभूतापरोक्षानुभवहेतुत्वाभावात् तद्धेतुज्ञानं विधेयम्। ततो ब्रह्मवाक्यस्य तद्विध्येकवाक्यत्वं युक्तमिति चेद्, तर्हि यागस्य व्रीह्यादिवद्विधीयमानज्ञानस्य किञ्चित्करणकारकं वक्तव्यम्। तच्च न संभवति, त्वन्मते शब्दस्य परोक्षज्ञानोपक्षयात्। इन्द्रियादीनां च ब्रह्मगोचरत्वाभावात्।

अथ मतं शाब्दज्ञानस्याऽपरोक्षानुभवहेतुता यद्यपि स्वतो न दृश्यते तथापि विधिबलाद् भविष्यति, ततः शब्द एव विधेयज्ञानकरणमिति। तदयु-

---

[इससे एकवाक्यताको प्राप्त नहीं हुआ, वेदान्तवाक्य पृथक् प्रमाण न होनेसे प्रमाणभेद नहीं पाता।]

यदि कहो कि ब्रह्मवाक्य और ज्ञानविधिवाक्य इस प्रकार दो वाक्योंका विभाग करके पीछे अर्थवादवाक्य और विधिवाक्योंके तुल्य वाक्यैकवाक्यताकी कल्पना करेंगे, तो वह भी युक्त नहीं है, क्योंकि स्वतन्त्र फल न रखनेवाले अर्थवादवाक्योंकी विधिवाक्यके साथ एकवाक्यता होनेपर भी ब्रह्मवाक्यकी विधिवाक्यके साथ एकवाक्यता नहीं हो सकती, कारण कि ब्रह्मवाक्य स्वयं—दूसरे विधिवाक्यके साथ एकवाक्यता हुए बिना—भी पुरुषार्थका बोधन करनेमें समर्थ हैं। यदि प्रथमोत्पन्न शब्दज्ञान परोक्ष होनेसे निष्फल है, अतः फलस्वरूप अपरोक्ष अनुभवका कारण नहीं हो सकता, इसलिए उक्त फलके कारणीभूत ज्ञानको विधेय मानना होगा। इससे ब्रह्मवाक्यकी उस विधेयज्ञानविधिके साथ एकवाक्यता संगत ही है, ऐसा यदि कहो, तो जैसे यागके व्रीहि आदि कारकोंका विधान किया जाता है, वैसे ही ब्रह्मज्ञानका भी कोई करण कारक कहना होगा, वह करण कोई नहीं हो सकता, क्योंकि तुम्हारे—विधिवादी सिद्धान्तैकदेशीके—मतमें शब्द परोक्ष ज्ञानको उत्पन्न करके व्यापारहीन हो जाता है। और इन्द्रिय आदि करण ब्रह्मको विषय ही नहीं कर सकते।

यद्यपि शब्दज्ञान अपरोक्ष अनुभव—साक्षात्कार—का कारण स्वतः नहीं देखा गया है, तथापि विधान सामर्थ्यसे हो जायगा,

क्तम् । किमत्र शब्दजन्यं प्राथमिकं ब्रह्मज्ञानं विधेयमुत तेन ज्ञानेनाऽवगतं ब्रह्मोद्दिश्य प्रत्ययसंतानः । नाऽऽद्यः, विधेयज्ञानस्यैव ब्रह्मप्रमापकत्वे वैरूप्यस्य दर्शितत्वात् । न द्वितीयः, प्रत्ययसंतानस्याऽश्रुतत्वात् । 'आत्मेत्येवोपासीत' इत्यादौ प्रत्ययसंतानरूपस्योपासनस्य विधिः श्रूयत इति चेद्, न; स्वभावसिद्धप्रत्ययमुद्दिश्य तस्याऽलौकिकात्मलक्षणविषयप्रतिपादने वाक्यतात्पर्यात् । एवकारयोगादात्मनः प्रतिपाद्यत्वनिर्णयात् । तदुक्तम्—

'यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम् ।
तच्छब्द एवकारश्च स्यादुपादेयलक्षणम् ॥' इति ॥

[अन्यथा अपरोक्षानुभवके लिए शब्द ज्ञानका विधान व्यर्थ हो जाता है ।] इसलिए शब्द ही विधेयभूत ज्ञानमें करण—साधन—कारक होगा, यदि ऐसा मानो तो वह भी युक्तिसंगत नहीं है, क्योंकि प्रकृतमें शब्दसे प्रथम उत्पन्न हुआ ब्रह्मज्ञान विधेय है ? अथवा उस प्रथम ज्ञानसे प्राप्त ब्रह्मको उद्देश्य करके ज्ञानसन्तान—ज्ञानधारा—विधेय है ? । इनमें प्रथम पक्ष नहीं बनता, क्योंकि विधेय ज्ञानको ही ब्रह्मस्वरूपका निश्चायक माननेमें वैरूप्यप्रसङ्गकी आपत्ति दिखला आये हैं । दूसरा पक्ष भी नहीं हो सकता, क्योंकि ज्ञानसन्तान—ज्ञानधारा—श्रुतिमें नहीं दिखलाई गई है । 'आत्मा है, इस प्रकार ही उपासना (पुनः पुनः परिशीलन) करे' इत्यादि वाक्योंमें ज्ञानधारारूप उपासनाका विधान श्रुतिमें आया है, ऐसा कहना भी साधक नहीं है, कारण कि स्वभावसिद्ध ज्ञानको उद्देश्य करके उसके अलौकिक आत्मस्वरूपविषयका प्रतिपादन करनेमें उपासनावाक्यका तात्पर्य है । [अर्थात् 'अहम्' इत्यादि प्रत्ययसिद्ध लौकिक आत्माको उद्देश्य करके दूसरे प्रमाणोंसे न जाना हुआ प्रपञ्चशून्य अलौकिक आत्मा ही उपासनाका विषय है, इसमें ही उपासनावाक्यका तात्पर्य है] । यह 'आत्मेत्येव' इस वाक्यमें 'एव' पदके सम्बन्धसे आत्मा प्रतिपाद्य है, ऐसा ही निर्णय होता है ।

ऐसा ही अभियुक्तोंने कहा भी है—यत् शब्दका सम्बन्ध अथवा प्रथम कहना, इत्यादि उद्देश्यका लक्षण है । और तत् शब्दका सम्बन्ध तथा 'एव' पद देना उपादेयका लक्षण है ।

न चैतद्वाक्यमात्मानं तदुपासनं च प्रतिपादयितुं शक्नोति, वाक्यभेदप्रसङ्गात् । न च 'निदिध्यासितव्यः' इति वाक्यमुपासनां विदध्यात् , आत्मप्रतिपादकवाक्यमध्ये पठितस्य तस्य स्तुतिपरत्वात् । अन्यथा वाक्यभेदापत्तेः । नन्वात्मन्येवाऽऽत्मानं पश्येदिति ज्ञानविधानेन संतानविधिरुपलभ्यते, ज्ञानस्य सर्वत्र प्रवाहेणाऽविनाभावादिति चेद्, न; अविनाभावासिद्धेः । क्वचित्पुरोवर्त्ति वस्तु सकृद् दृष्टवतो झटिति प्रत्यङ्मुखत्वादिदर्शनात् । अथाऽपि दर्शपूर्णमासप्रकरणे मलवद्वाससो व्रतकलापविधानवदात्मप्रकरणे सन्तानरूपं निदिध्यासनं विधातुं शक्यत इति चेद्, एवमपि संतानस्याऽप्रमाण-

---

'आत्मेत्येव' इत्यादि वाक्य आत्मा तथा उसकी उपासना दोनोंका प्रतिपादन करनेमें समर्थ नहीं हैं, कारण कि दोनोंमें तात्पर्य माननेसे वाक्यभेद हो जायगा । 'निदिध्यासन करना चाहिए' यह वाक्य भी उपासनाका विधान नहीं कर सकता, क्योंकि आत्माके प्रतिपादक वाक्योंके मध्यमें पढ़े हुए उक्त वाक्यका स्तुतिमात्रमें तात्पर्य है । नहीं तो वाक्यभेदकी आपत्ति हो जायगी । अपने ही में अपनेको देखे (आत्मामें ही आत्मबुद्धि करे, अनात्मामें आत्मबुद्धि न करे) इस प्रकार ज्ञानके विधानसे ज्ञानधाराका विधान पाया जाता है, क्योंकि ज्ञानका सर्वत्र प्रवाहके साथ अविनाभाव है । [जैसे घट, पट आदि अनात्म पदार्थका ज्ञान घट, पटादि अनात्मप्रवाहके साथ ही है एवं आत्मज्ञान भी प्रवाहका सहचारी ही है । इस प्रकार प्रवाहका और ज्ञानका सर्वत्र साहचर्यरूप अविनाभाव है, अतः 'ज्ञान' पदकी ज्ञानसत्तामें लक्षणा करेंगे] इस प्रकार कहना संगत नहीं, कारण कि अविनाभावकी सिद्धि नहीं है । [प्रवाह तथा ज्ञानधाराके साहचर्यके अभावका दृष्टान्त द्वारा समर्थन करते हैं]—कभी कभी सामनेकी वस्तुको एक बार ही देखनेवाले पुरुषका तुरन्त ही प्रत्यङ्मुख हो जाना देखा गया है । [जैसे किसी सभ्य पुरुषके सामने बीभत्स या लज्जाजनक वस्तु अचानक आ भी जाय, तो भी वह तुरन्त प्रत्यङ्मुख हो जाता है, वहांपर ज्ञानधारा और प्रवाहका साहचर्य नहीं है और ज्ञान है] यदि दर्शपूर्णमासप्रकरणमें मलयुक्त वस्त्रवालेके व्रतके समूहोंके विधानके तुल्य आत्मप्रकरणमें सन्तान—धारा—रूप निदिध्यासनका विधान किया जा सकता है, ऐसा कहो, तो ऐसा माननेपर भी अप्रमाणरूप सन्तान अपरोक्ष अनुभवका कारण नहीं हो सकता । इसलिए

स्याऽपरोक्षानुभवहेतुत्वासंभवान्न शाब्दज्ञानाद्विशेषः सिध्येत्। न च मृतपुत्रादेर्भावनाधिक्यादापरोक्ष्यं दृष्टमिति वाच्यम्, तत्र विषयस्याऽसंप्रयुक्तत्वेन तदापरोक्ष्यस्य भ्रान्तत्वात्। 'ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः' इति श्रुत्या ध्यानस्याऽपरोक्षानुभवहेतुत्वमुक्तमिति चेद्, मैवम्; नाऽत्र 'ध्यायमानः पश्यति' इत्येवमन्वयो येन ध्यानं दर्शनहेतुः स्याद्, अपि तु ध्यायमानो ज्ञानप्रसादेन पश्यतीति। ज्ञानशब्देऽनात्राऽन्तःकरणमुच्यते, ज्ञायतेऽनेनेति व्युत्पत्तेः। तस्य प्रसाद ऐकाग्र्यम्। तच्च सहकारिकारणम्। लोके दुर्ज्ञेयवस्तुदर्शने चित्तैकाग्र्यसहायापेक्षाया दृष्टत्वात्।

शाब्दज्ञानकी अपेक्षा कोई विशेष नहीं सिद्ध हो सकता। भावनाके आधिक्यसे—पुनः पुनः भावना करनेसे—मरे हुए पुत्र आदिका साक्षात्कार देखा गया है, ऐसा कहना भी उचित नहीं है, क्योंकि मरे पुत्रके साक्षात्कारस्थलमें विषय—मृत पुत्रादि—का इन्द्रियसे सम्प्रयोग न होनेसे उसका साक्षात्कार भ्रम है।

शङ्का—* ज्ञानके प्रसादसे अन्तःकरण शुद्ध हो जाता है, इसके अनन्तर ध्यान करता हुआ, उपासक उस निष्कल—निरवयव—आत्माका साक्षात्कार करता है, इस श्रुतिसे ध्यान अपरोक्ष अनुभवका कारण कहा गया है।

समाधान—ऐसा नहीं है, क्योंकि इस वाक्यमें 'ध्यायमानः पश्यति'—ध्यान करता हुआ देखता है' ऐसा अन्वय नहीं है (ध्यान और दर्शनमें कार्यकारणभावका बोधक नहीं है) जिससे ध्यान दर्शनका हेतु हो सके, किन्तु 'ध्यान करता हुआ ज्ञानप्रसादसे साक्षात्कार करता है, ऐसा अन्वय है। यहांपर ज्ञानशब्दसे अन्तःकरण लेना चाहिए, क्योंकि यह ज्ञानपद 'जिससे जाना जाता है' इस प्रकार करणव्युत्पत्तिसे करणार्थक है। उस ज्ञान (अन्तःकरण) का प्रसाद—एकाग्रता है। और वह सहकारी कारण है। लोकमें दुर्ज्ञेय—समझनेमें कठिन—वस्तुके अपरोक्ष अनुभवात्मक दर्शन करनेमें चित्तैकाग्रताकी सहायताकी अपेक्षा देखी जाती है। इस प्रकार (विचारनिष्कर्षमें) सहकारी कारणको प्राप्त हुई चित्तैकाग्रताका ज्ञानधारारूप ध्यान साधन है, ऐसा श्रुतिका तात्पर्यार्थ कहना होता है। इस प्रकार जो श्रुतिसे सिद्ध नहीं होता, ऐसा अश्रुत अर्थकी कल्पना करना (श्रुति तो 'ध्यायमानः पश्यति'—इस प्रकार दर्शनमें ध्यानका अन्वय

---

* ज्ञानसे चित्तके प्रसादसे एकाग्रता, ऐसा अर्थ आगे करना है।

एवं च सहकारिभूतचित्तैकाग्र्यस्य प्रत्ययसन्तानरूपं ध्यानं साधनमित्युक्तं भवति। न चैवमश्रुतान्वयकल्पनमयुक्तमिति वाच्यम्, अदृष्टानुपपन्नार्थकल्पनादन्वयमात्रवैपरीत्यकल्पनस्य लघीयस्त्वात्। नह्यन्यत्र ध्यानस्याऽपरोक्षप्रमितिहेतुत्वं दृष्टम्, नाऽप्युपपन्नम्, ध्यानस्य प्रमाणरूपत्वाभावात्। साक्षात्कारस्य तु प्रमाणभूतः शब्द एव कारणमिति पूर्ववर्णके विद्याप्राप्तिवादे 'तं त्वौपनिषदम्' इति तद्धितप्रत्ययमुपजीव्य सिद्धान्तिना समर्थितम्। अतः शब्दज्ञानस्य तत्सन्तानस्य वा नाऽपरोक्षानुभवकरणतया विधेयत्वसम्भवः।

यदुक्तं प्रयाजवाक्यवद्वेदान्तानामुभयार्थत्वे सति ब्रह्मप्रतिपादनं विधेयज्ञानव्यक्त्यन्तरपर्यवसानं च भविष्यतीति। तदपेशलम्, दृष्टान्तासिद्धेः।

दिखा रही है) युक्तिसंगत नहीं है, ऐसा नहीं कहना चाहिए, कारण कि जो लोकमें कहीं देखा ही नहीं गया है तथा जिसकी युक्तियोंसे भी उपपत्ति नहीं हो सकती, ऐसे अदृष्ट और अनुपपन्न अर्थकी कल्पना करनेकी अपेक्षा तो अन्वयके वैपरीत्यकी (अश्रुत ध्यानका मनःप्रसादके साथ अन्वयकी) कल्पना करनेमें ही लाघव है। दूसरे स्थलमें कहीं भी ध्यान अपरोक्ष अनुभव—साक्षात्कार—का हेतु नहीं देखा गया है और ध्यानमें साक्षात्कारकी कारणता युक्तिसे भी उपपन्न नहीं है, कारण कि ध्यान प्रमाणरूप नहीं है। [ब्रह्म] साक्षात्कारका तो प्रमाणस्वरूप शब्द ही कारण है, ऐसा पूर्ववर्णकमें विद्याप्राप्तिवादके अवसरपर 'तन्त्वौपनिषदम्' इस वाक्यमें तद्धितप्रत्ययका आश्रयण कर सिद्धान्तीने समर्थन किया है।

इससे शब्दजन्यज्ञानका अथवा उसके सन्तान (धारा) का अपरोक्ष अनुभवके करणरूपसे विधान नहीं हो सकता है।

और जो कहा गया है कि 'समिधो यजति' इत्यादि प्रयाजवाक्यके तुल्य अर्थात् जैसे 'समिधो यजति' 'तनूनपातं यजति' इत्यादि वाक्योंका समिधादि याग और उनके अनुष्ठानका क्रम इन दोनोंमें तात्पर्य है वैसे ही—'आत्मा वा अरे द्रष्टव्यः' इत्यादि वाक्यके उभयार्थक होनेसे उनका ब्रह्मके प्रतिपादनमें और ब्रह्मज्ञानके विधानमें भी पर्यवसान होगा, वह ठीक नहीं है, क्योंकि दृष्टान्तकी असिद्धि है; प्रयाजादि याग ही 'समिधो यजति' इत्यादि वाक्यका अर्थ

प्रयाजा एव हि तत्र शब्दगम्यास्तदनुष्ठानक्रमस्त्वर्थापत्तिगम्यः। ननु न तावत्प्रयाजा एव क्रमः, तेषां क्रमशब्दानभिधेयत्वात्। नापि तदतिरिक्तः क्रमः सुनिरूपः, एकैकस्मिन्प्रयाजे क्रमादर्शनात्। संयोगवदनेकाश्रितः क्रम इति चेद्, न; तथा सति संयोगिनोरिव प्रयाजानां यौगपद्यप्रसङ्गात्। यौगपद्ये च कालकृते क्रमव्याघातात्। मैवम्, लोकप्रसिद्धस्य क्रमस्याऽपह्नवायोगात्। कालकृतक्रमत्वादेवाऽऽश्रययौगपद्यानपेक्षत्वात्। यदि देशकालवस्तूपाधिपरामर्शमन्तरेण स्वतन्त्रः क्रमो न दृश्येत, तर्ह्येकदेशोपाधिकेषु वृक्षेषु वनव्यवहारवत् संनिहितानेकक्षणोपाधिकेषु प्रयाजेषु क्रमव्यवहारोऽ-

---

है, उनका अनुष्ठानक्रम तो वाक्यका अर्थ नहीं है वह अर्थापत्तिसे गम्य है। [जब प्रयाजस्थलमें दोनों वाक्यार्थ नहीं हैं तब प्रकृतमें वे दृष्टान्त कैसे हो सकते ?]

शङ्का—[यदि क्रम कोई वस्तु सिद्ध हो, तो वह शाब्द है अथवा अर्थापत्तिगम्य है यह विचार हो सकता है लेकिन क्रम तो कोई वस्तु ही नहीं है इससे यह विचार निराधार है—] प्रयाज ही क्रम हैं यह नहीं कह सकते, क्योंकि क्रमशब्दसे प्रयाज की और प्रयाजशब्दसे क्रमकी प्रतीति नहीं होती है। और प्रयाजसे अतिरिक्त भी क्रम नहीं है, क्योंकि प्रत्येक प्रयाजनमें क्रम नहीं दिखाई देता। यदि कहो कि संयोगके तुल्य क्रम अनेकमें रहता है, तो यह युक्त नहीं है, क्योंकि यदि ऐसा हो, तो संयोगी दो पदार्थोंके तुल्य क्रमयुक्त वस्तुओंमें एककालिकत्वका प्रसङ्ग हो जायगा, और यदि प्रयाजोंको एककालिक मान लिया जाय, तो उनमें कालकृत क्रमका—पौर्वापर्यका—व्याघात हो जायगा।

समाधान—अनेक वस्तुओंमें कालकृत क्रम प्रसिद्ध है, उसका अस्वीकार नहीं हो सकता है। और क्रम कालकृत ही होता है, इससे क्रमिक वस्तुओंमें यौगपद्य—एककालिकत्व—नहीं होगा। यदि कहें कि देश, काल और वस्तुरूप उपाधिसे अतिरिक्त क्रम कोई वस्तु नहीं है, तो यह कथन उचित नहीं है, क्योंकि एक देश जिनका उपाधि—अधिकरण—है ऐसे वृक्षोंमें जैसे 'वन' व्यवहार होता है वैसे ही सन्निहित अनेक क्षण जिनकी उपाधि—अधिकरण—हैं ऐसे प्रयाजोंमें क्रमव्यवहार होनेमें हानि क्या है ? [अभिप्राय यह है कि क्रमव्यवहारमें देश, काल आदि उपाधि—निमित्त—हैं क्रमशब्दके अर्थ नहीं हैं। क्रमशब्दका अर्थ पदार्थान्तर है, इससे यह विचार हो सकता है कि वह शाब्द नहीं है, अर्थापत्ति-

स्तु। अथाऽनुष्ठेयपदार्थानामनिष्पन्नस्वभावत्वाद्देशकालवस्तुकृतः क्रमो न सम्भवेत्, तर्हि वाक्यपाठक्रम एव स्मर्यमाणोऽनुष्ठेयपदार्थेऽप्युपकल्पताम्। ननु कथमयं क्रमोऽनुष्ठेयविशेषणतया प्रमीयते, विधायकाभावात्; प्रयोगवचनस्य तद्विधायकत्वे परस्पराश्रयत्वप्रसङ्गात्। विहिते प्रयोगविधिः, प्रयोगविधौ च तद्विधिकल्पनेति। नैष दोषः, एकस्य कर्तुर्युगपदनेकपदार्थप्रयोगानुपपत्त्या क्रमस्य प्रमीयमाणत्वात्। ततः प्रयाजवाक्यानामेकार्थपरत्वान्न तद्दृष्टान्तेन वेदान्तानामर्थद्वयपरत्वं सम्भवति।

यदप्युक्तम्—उपासनाविधिपरैर्वेदान्तैर्ब्रह्माप्यवगम्यते, रूपप्रत्यायकेन चक्षुषा द्रव्यस्याऽपि प्रतीतिदर्शनादिति, तदप्यसत्। यथा प्रतिवस्तु

गम्य है।] यदि कहें कि अनुष्ठेय यागरूप पदार्थ असिद्ध हैं उनमें कालकृत क्रमका व्यवहार नहीं होगा, तो प्रयाजवाक्योंके पाठमें जो क्रम है, उसीका स्मरण कर यागोमें भी क्रमकी कल्पना कर व्यवहार कीजिए, कोई हानि नहीं है।

शङ्का—अनुष्ठेय यागमें विशेषणरूपसे यह क्रम कैसे भासेगा, क्योंकि क्रमका विधायक कोई वाक्य नहीं है। यदि कहें कि 'समिधो यजति' इत्यादि विधिवाक्य ही क्रमविशिष्ट यागका विधान करेंगे, तो यह ठीक नहीं है; क्योंकि ऐसा माननेमें अन्योन्याश्रयका प्रसङ्ग होगा, कारण कि क्रमका विधान होनेपर क्रमविशेषित यागका विधान होगा और यागका विधान होनेपर उनमें क्रमकी कल्पना होगी।

समाधान—'समिधो यजति' इत्यादि वाक्योंसे बोध्य क्रमविशिष्ट याग नहीं है, किन्तु एक कर्त्ता अनेक यागोंको एक कालमें कर नहीं सकता है, इससे—एककर्तृक अनेक यागोंकी एक कालमें अनुपपत्तिसे—क्रमकी कल्पना होती है, अतः अन्योन्याश्रय नहीं होता। इससे यह सिद्ध हो गया कि प्रयाजवाक्य केवल यागका ही विधायक है, क्रमका विधायक नहीं है अर्थात् एकार्थ है; अतः प्रयाजवाक्यके दृष्टान्तसे वेदान्तवाक्य दो अर्थका बोध नहीं करा सकेंगे। अर्थात् यदि उनको ज्ञानविधिपरक मानें, तो वे ब्रह्ममें पर्यवसित नहीं होंगे।

पीछे जो यह कहा गया है कि 'आत्मेत्येवमुपासीत' इत्यादि वाक्य उपासनाका विधान करते हैं, उन वाक्योंसे ही ब्रह्मका बोध भी होगा। जैसे कि रूपकी प्रतीतिके लिए प्रवृत्त चक्षुसे द्रव्यका भी ग्रहण होता है, वह कहना भी

सम्प्रयोगनिरपेक्षमेव प्रमाणं चक्षुर्न तथा प्रतिपदार्थं प्रमाणं शब्दः किन्तु यत्र तात्पर्यं तत्र सम्भूयैव प्रमाणम्। तथा च विधिपरा वेदान्ताः कथं ब्रह्मावगमयेयुः। नन्वेवं तर्हि वेदान्तशब्दा ब्रह्मस्वरूपं मा प्रमापयन्तु किन्तु विधायकपदजन्यविधिप्रमितिविषयत्वेनैव ब्रह्मज्ञानं समर्पयन्तु ब्रह्मस्वरूपं त्वर्थापत्त्या सेत्स्यति, विधेयज्ञानस्य ज्ञेयभूतब्रह्मस्वरूपमन्तरेणाऽनुपपत्तेरिति चेद्, महदिदं न्यायविचारकौशलमायुष्मतः, यदेकस्मिन् विषये ब्रह्मस्वरूपाख्ये प्रथमप्रतिपत्तिः प्रमाणं तस्मिन्नेव द्वितीयज्ञानं न प्रमाणमिति। तथा श्रुतिर्न प्रमाणम्, श्रुत्यर्थापत्तिश्च प्रमाणमिति। अथ श्रुतिर्विधिशेषत्वान्न स्वार्थे प्रमाणं श्रुत्यर्थापत्तिस्त्वनन्यशेषत्वात् प्रमाणम्, इत्युच्येत, एवमपि नाऽत्र ब्रह्म सिध्येत्, 'वाचं धेनुमुपासीत' इत्यादाविव

ठीक नहीं है, क्योंकि चक्षु एक वस्तुके ग्रहणमें दूसरी वस्तुके सम्बन्धकी अपेक्षा नहीं रखता और शब्द एक अर्थके बोधमें अन्य शब्दके सम्बन्धकी अपेक्षा रखता है, क्योंकि परस्परसमभिव्याहाररूप आकांक्षा शाब्दबोधमें कारण है, ऐसी परिस्थितिमें ब्रह्मज्ञानविधायक वेदान्तवाक्योंसे ब्रह्मका अवगमन कैसे होगा ?

शङ्का—जब ऐसी बात है, तब वेदान्तवाक्य ब्रह्मस्वरूपका प्रतीपादन न करें, विधायक पदोंसे उत्पन्न विधिकी प्रमितिके विषय होकर ही ब्रह्मज्ञानका विधान करें, परन्तु ब्रह्मके अवगमके बिना ब्रह्मज्ञानका विधान नहीं हो सकता, इससे ब्रह्मज्ञानके विधानकी अनुपपत्तिरूप अर्थापत्ति प्रमाणसे ही ब्रह्म प्रमित होगा, नुकसान क्या है ?

समाधान—ठीक है, यह आपकी महती न्यायकुशलता है, जो एक ही ब्रह्मस्वरूपके विषयमें प्रथम ज्ञान प्रमाण है और द्वितीय ज्ञान प्रमाण नहीं है एवं ब्रह्ममें श्रुति प्रमाण नहीं है, बल्कि श्रुतिमूलक अर्थापत्ति प्रमाण है। यदि आप कहें कि श्रुति विधि-शेष होनेसे अपने अर्थमें प्रमाण नहीं है, श्रुतिमूलक अर्थापत्ति अन्यशेष न होनेके कारण प्रमाण है, तो आपका यह कथन ठीक नहीं है, क्योंकि ब्रह्मकी उपासनाका विधान ब्रह्मके स्वरूपके बिना भी हो सकता है। जैसे 'वाचं धेनुमुपासीत' (वाणीकी धेनुरूपसे उपासना करे) यहांपर वस्तुतः वाणी धेनु नहीं है, पर धेनुरूपसे उसकी उपासना होती है, वैसे ही ब्रह्मके वस्तुतः न होनेपर भी आरोपसे ब्रह्मोपासना होगी। यदि कहें

विधेयज्ञानस्य वास्तवज्ञेयमन्तरेणाप्युपपत्तेः । स्वतःप्रामाण्यमाश्रित्य विधेयज्ञानाद् ब्रह्मसाधने तथैव सिद्धार्थपदजन्यप्राथमिकज्ञानाद् ब्रह्म किं न सिध्येत् ? तत्सिद्धौ च तावतैव मुक्त्युपपत्तौ विधिवैयर्थ्यम् । अथ विधेयज्ञानस्यारोपितविषयतायामदृष्टफलकल्पनात् ततो विषयप्रमितिलक्षणं दृष्टफलं कल्प्यत इति चेद्, नः सकलप्रमाणविरोधप्रसङ्गात् । तदेवमत्यन्तदुष्टस्य प्रतिपत्तिविधेरध्याहर्तुमशक्यत्वात् 'इदं सर्वं यदयमात्मा' इत्यादिवेदान्तैर्मन्त्रैरिव प्रयोगवचनो न ज्ञानव्यक्त्यन्तरमनुष्ठापयति, ततो नानेनापि सिद्धान्तैकदेशिना वेदान्तविचारस्याऽगतार्थत्वं सुसम्पादम् । नन्वध्ययनविध्युपात्तानां वेदान्तानां धर्मब्रह्मविषयत्वाभावे सत्यानर्थक्यं स्यादिति चेद्, मैवम्; यद्यपि वेदान्तानां सिद्धब्रह्मस्वरूपाबोधकत्वान्नास्ति ब्रह्म, तथापि न वेदान्तवैयर्थ्यं, कर्तृत्वभोक्तृत्वादिविशिष्टस्याहंप्रत्ययगम्यस्य

कि विधेयज्ञान स्वतः प्रमाण है, इससे उसीसे ब्रह्म सिद्ध होगा, तो सिद्धार्थक सत्य, ज्ञान, आनन्द आदि पदसे जन्य प्रथम ज्ञानसे ही ब्रह्मकी सिद्धि क्यों नहीं होगी ? और जब ब्रह्मज्ञान हो गया तब उसीसे मुक्तिकी उपपत्ति हो गई फिर विधि व्यर्थ है । विधेयज्ञानरूप उपासनाको यदि आरोपितविषयक मानें, तो उसके अदृष्ट (पुण्य) फलकी कल्पना करनी पड़ेगी । इससे विषयप्रमितिलक्षण दृष्ट फलकी ही कल्पना क्यों न करें ? क्योंकि अदृष्ट फलकी कल्पनाकी अपेक्षा दृष्ट फलकी कल्पना करना उचित है, तो आपका यह कहना ठीक नहीं है, क्योंकि इस कल्पनामें सभी प्रमाणोंका विरोध हो जायगा । इसलिए अत्यन्त दुष्ट—दोषसे युक्त—प्रतिपत्तिविधिका अध्याहार नहीं किया जा सकता है । इससे 'इदं सर्वं यदयमात्मा' (जो यह सब है वह आत्मा ही है) इत्यादि वेदान्तवाक्योंसे मन्त्रोंके समान प्रयोगवचन ज्ञानव्यक्त्यन्तरका अनुष्ठान नहीं करा सकेगा । अतः यह सिद्धान्तैकदेशी भी वेदान्तविचारको अगतार्थ नहीं कर सकता ।

'स्वाध्यायोऽध्येतव्यः' (स्वाध्यायका—अपनी शाखाका—अध्ययन करे) इस अध्ययनविधिसे गृहीत वेदान्त यदि ब्रह्मविषयक न हों, तो वे वेदान्तवाक्य अनर्थक हो जायँगे, यदि यह कहें, तो यह कहना भी उचित नहीं है । यद्यपि वेदान्तवाक्योंके सिद्ध ब्रह्मस्वरूपके बोधक न होनेसे ब्रह्म नहीं है, तथापि वेदान्तोंमें वैयर्थ्य नहीं है, क्योंकि कर्तृत्व-भोक्तृत्व आदिसे विशिष्ट और 'अहं'

जीवात्मनो विद्यमानः कर्तृत्वादिभिरविद्यमानैश्चाऽन्तर्यामित्वब्रह्मत्वादिभिर्वेदान्तोक्तसमस्तगुणैर्विशिष्टतयोपासनोत्पत्तिविधौ शमदमादीतिकर्त्तव्यतोपसंहारेण विनियोगविधौ मोक्षकामिनियोज्यसम्बन्धितयाऽधिकारविधौ साङ्गे कर्मण्यधिकारिण्यनुष्ठापकतया प्रयोगविधौ च वेदान्तानां पर्यवसानाङ्गीकारात्। तत्र विध्यपेक्षितन्यायस्य सर्वस्य पूर्वतन्त्र एव गतत्वादभ्यधिकाशङ्काया अदर्शनान्नैवारब्धव्योत्तरमीमांसेत्येवं पूर्वः पक्षः।

अत्राऽभिदध्मे—किं सिद्धे व्युत्पत्त्यभावाद्वेदान्तानामुपासनाक्रियापरत्वमुच्यते किंवा जैमिन्यादिवचनसामर्थ्यात्? तत्राऽऽद्यः समन्वयसूत्रे निराकरिष्यते। न द्वितीयः, वेदान्तानां जैमिन्यादिभिरविचारितत्वात्। 'अथातो धर्मजिज्ञासा' इत्यत्र हि सूत्रे भाष्यकारादिभिर्धर्ममात्रविचारप्रतिज्ञापरत्वेनाऽधिकरणमाचितं न तु कृत्स्नवेदार्थविचारप्रतिज्ञापरत्वेन। तथाहि—धर्ममीमांसाशास्त्रं विषयः, ततः किमारम्भणीयं न वेति संदेहः।

प्रत्ययके विषय जीवात्माके विद्यमान कर्तृत्वादि धर्मसे तथा अविद्यमान अन्तर्यामित्व, ब्रह्मत्व आदि वेदान्तोक्त समस्त गुणोंसे विशिष्टरूपसे उपासनाकी उत्पत्तिविधिमें, शम, दम, आदि इतिकर्तव्यताके उपसंहारसे विनियोगविधिमें, मोक्षकामी पुरुषरूप जो नियोज्य हैं, उनके सम्बन्धीरूपसे अधिकारविधिमें तथा अङ्गसहित कर्मोंमें अधिकारीके अनुष्ठापक—प्रवर्तक—होनेसे प्रयोगविधिमें वेदान्तोंका पर्यवसान है। उन विधियोंमें अपेक्षित सम्पूर्ण न्यायोंका पूर्वतन्त्रमें ही कथन हो चुका है, इससे अधिक शङ्काके न होनेसे उत्तरमीमांसाका आरम्भ नहीं करना चाहिए, यह पूर्वपक्ष है।

इसपर उत्तर कहते हैं—क्या सिद्ध पदार्थमें शब्दोंका सङ्केतग्रह न न होनेसे वेदान्तोंको उपासनाक्रियापरक मानते हैं अथवा जैमिनि आदिके वचनकी सामर्थ्यसे? इनमें प्रथम विकल्पका 'तत्तु समन्वयात्' इस सूत्रमें निराकरण किया जायगा। रहा द्वितीय विकल्प, वह भी ठीक नहीं है, क्योंकि महर्षि जैमिनि आदिने वेदान्तवाक्योंका विचार ही नहीं किया है। देखिए—'अथातो धर्मजिज्ञासा' इस पूर्वमीमांसाके प्रथम सूत्रमें भाष्यकार शबरस्वामी प्रभृति आचार्योंने धर्ममात्रविचारकी प्रतिज्ञाके तात्पर्यसे अधिकरणकी रचना की है। सम्पूर्ण वेदार्थके विचारकी प्रतिज्ञाके तात्पर्यसे अधिकरणकी रचना नहीं की है। उस अधिकरणका धर्ममीमांसाशास्त्र विषय है, उसका आरम्भ करना

तदर्थमर्थान्तरं चिन्त्यते—अध्ययनविधिरदृष्टार्थो दृष्टार्थो वेति ? तत्राऽदृष्टार्थ इति तावत् प्राप्तम्, दृष्टफलसाधने भोजनादौ विध्यदर्शनात्। अध्ययनक्रियाकर्मणि स्वाध्याये संस्कारप्राप्तिलक्षणं दृष्टफलं सम्भवेत्। कथमदृष्टार्थतेति चेद्, मैवम्। न तावत् संस्कारः सम्भवति; संस्कृतस्य स्वाध्यायस्य कुत्रचित्क्रतौ विनियोगादर्शनात्। नाऽपि प्राप्तिः, अक्षरग्रहणमात्ररूपायाः प्राप्तेः स्वयमफलत्वात्फलान्तरासाधनत्वाच्च। अर्थावबोधसाधनं तदिति चेत्, तर्ह्यर्थावबोधाक्षरग्रहणयोः साध्यसाधनभावस्य लोकसिद्धत्वाद्विधिवैयर्थ्यम्। यदि कर्मकारकगतफलाभावे कर्माभिधायितव्यप्रत्ययेन कर्मप्रधानो विधिर्न सम्भवेत्, तर्हि सक्तुन्यायेन 'अधीयीत' इति वैपरीत्यं कल्प्यताम् ? न च फलाश्रवणादध्ययनस्य कथमदृष्टार्थतेति वाच्यम्, 'यदृचो-

---

चाहिए या नहीं ? ऐसा सन्देह होता है। इस अर्थकी सिद्धिके लिए अर्थान्तरकी चिन्ता करते हैं—'स्वाध्यायोऽध्येतव्यः' इस अध्ययनविधिका दृष्ट फल है या अदृष्ट ? पहले अदृष्ट फल है यह प्राप्त हुआ, क्योंकि जिनका दृष्ट ही फल है ऐसे भोजन आदिमें शास्त्रीय विधि दिखाई नहीं देती। अध्ययनक्रियाका कर्म जो स्वाध्याय उसमें संस्कार और प्राप्ति ये ही दो दृष्ट फल हो सकते हैं, फिर वे अदृष्टार्थक हैं यह कैसे कहते हैं ? यदि यह कहें, तो ठीक नहीं है, क्योंकि संस्कार स्वाध्यायका फल नहीं हो सकता है, कारण कि संस्कृत स्वाध्यायका कहींपर विनियोग नहीं दीखता और प्राप्ति भी दृष्ट फल नहीं हो सकती, क्योंकि अक्षरग्रहणरूप प्राप्ति स्वयं फल नहीं है। सुख और दुःखकी निवृत्ति—ये ही दो फल कहलाते हैं। इन दोनोंकी वह साधिका भी नहीं है, जिससे कि वह परम्परया फल कहलावे। यदि कहें कि अर्थावबोधकी साधन होनेसे अक्षरप्राप्ति फल है, तो यह भी उचित नहीं है, क्योंकि अक्षरप्राप्ति और अर्थावबोध—इन दोनोंमें कार्यकारणभाव लोकसिद्ध है, अपूर्व नहीं है, अतः उनका विधान नहीं हो सकता, कारण कि 'विधिरत्यन्तमप्राप्तौ' इसके अनुसार अत्यन्त अप्राप्तिमें ही विधि होती है। यदि कर्मकारक गत फलका अभाव होनेपर कर्मका अभिधान करनेवाले तव्यप्रत्ययसे कर्मप्रधान विधिकी सम्भावना नहीं है, तो सक्तुन्यायसे 'स्वाध्यायोऽध्येतव्यः' की जगह 'स्वाध्यायमधीयीत' ऐसे वाक्यकी कल्पना कर लीजिए।

ऽधीते पयसः कुल्या अस्य पितॄन् स्वधा अभिसम्भवति यद्यजूंषि घृतस्य कुल्या' इत्यादिना ब्रह्मयज्ञरूपजपाध्ययनफलत्वेन श्रूयमाणस्य घृतकुल्यादेरध्ययनत्वसाम्येन प्रथमाध्ययनेऽप्यतिदेष्टुं शक्यत्वात्; ततो रात्रिसत्रन्यायेन घृतकुल्यादिकामः 'स्वाध्यायेनाधीयीत' इत्येवं विधिः सम्पद्यते। यदि केचिदर्थवादफलातिदेशं नेच्छन्ति, तर्हि तन्मते विश्वजिन्न्यायेन स्वर्गः कल्पनीयः। तदुक्तम्—

'विनाऽपि विधिनाऽदृष्टलाभान्नहि तदर्थता।
कल्प्यस्तु विधिसामर्थ्यात् स्वर्गो विश्वजिदादिवत्॥' इति।

[कर्मकारकमें क्रियाजन्य अतिशय न होनेसे कर्मका प्राधान्य नहीं प्राप्त होता। 'अतः सक्तून् जुहोति' इसमें जैसे सक्तुका प्राधान्य प्राप्त न होनेपर शक्तु साधन माने जाते हैं वैसे ही प्रकृत 'स्वाध्यायोऽध्येतव्यः' इस विधिमें भी स्वाध्यायको अध्ययनका साधन मानकर 'सक्तुभिः' के 'तुल्य स्वाध्यायेन' इस प्रकार तृतीयान्तविपरिणाम कर लिया जायगा, यह तात्पर्य है।]

[अर्थवादमें भी] फलका श्रवण नहीं है, इसलिए अध्ययनका अदृष्ट फल कैसे माना जाय, यह कहना भी उचित नहीं; कारण कि 'यदृचोऽधीते' (ऋचाओंका जो अध्ययन करता है, उसके पितरोंको दूधकी धाराएँ तृप्त करती हैं और जो यजुर्वेदमन्त्रोंका अध्ययन करता है, उसके पितरोंको घीकी धाराएँ) इत्यादि अर्थवादमें ब्रह्मयज्ञरूप जप तथा अध्ययनका फल घृतकुल्या आदि श्रुत है। उस फलके सम्बन्धका, अध्ययनसामान्य होनेसे, प्रथम अध्ययनमें भी अतिदेश किया जा सकता है। इससे रात्रिसत्रन्यायके बलपर 'घृतकुल्यादिकी इच्छावालेको स्वाध्यायका अध्ययन करना चाहिए' ऐसी विधि सम्पन्न होगी। यदि कोई वादी अर्थवादमें सुने गये फलका अतिदेश प्रथम अध्ययनमें नहीं करना चाहे, तो उसके मतमें विश्वजिन्न्यायसे स्वर्गरूप फलकी ही कल्पना करनी चाहिए। कहा भी है—

'अदृष्ट फलका लाभ तो विधिके बिना भी हो सकता है, इसलिए विधिका अदृष्ट फल नहीं मानना चाहिए। अतएव विधिकी सामर्थ्यसे विधिको सफल बनानेके लिए 'विश्वजित्' आदि यागोंकी भाँति स्वर्गरूप फलकी कल्पना करनी चाहिए।'

न चाऽदृष्टार्थत्वेऽपि स्वाभाविकस्वार्थावबोधसामर्थ्यस्य का हानिरिति वाच्यम्, अन्यार्थस्याऽपि स्वार्थपरतायां मन्त्रार्थवादयोरतिप्रसङ्गात्। तस्मादाम्नायस्याऽविवक्षितार्थत्वाद्धर्मस्य च प्रत्यक्षाद्यविषयत्वात् प्रमाणानुग्राहकतर्करूपस्य विचारस्याऽनुग्राह्यप्रमाणाभावे निरालम्बनत्वान्न शास्त्रमारम्भणीयमिति पूर्वपक्षे प्राप्ते राद्धान्तं ब्रूमः—

'लभ्यमाने फले दृष्टे नाऽदृष्टफलकल्पना।
विधेस्तु नियमार्थत्वान्नाऽऽनर्थक्यं भविष्यति॥'

लभ्यते हि कर्मकारके स्वाध्याये द्विविधं दृष्टफलम्—अध्ययनक्रियाजनितं फलवदर्थावबोधहेतुभूतप्राप्तिः संस्कारश्च। अर्थावबोधार्थाक्षरग्रहणयोः साध्यसाधनभावस्य लोकसिद्धत्वेऽपि न विधिवैयर्थ्यम्, नियमार्थत्वात्। न

अदृष्टरूप फलमें तात्पर्य माननेसे भी अपने स्वाभाविक अर्थबोध करानेकी सामर्थ्यकी क्या हानि होगी? ऐसा नहीं कह सकते, क्योंकि अन्य अर्थमें तात्पर्य रखनेवाले वाक्यका स्वार्थमें भी तात्पर्य माननेसे मन्त्र तथा अर्थवादमें भी अतिप्रसक्ति हो जायगी अर्थात् मन्त्र और अर्थवादोंकी भी स्वार्थबोधनमें सामर्थ्य हो जायगी, जो कि इष्ट नहीं है। इस पूर्वोक्त निष्कर्षके अनुसार आम्नाय—वेद—स्वरूप स्वाध्यायके अविवक्षितार्थ होनेसे [अर्थात् किसी भी अर्थका बोध करानेमें उसका तात्पर्य निर्द्धारित न होनेसे] धर्मके प्रत्यक्ष आदिका विषय न होनेसे तथा प्रमाणकी पुष्टि करनेवाले तर्कस्वरूप विचारके, जिसकी तर्क द्वारा पुष्टि करना अभीष्ट है ऐसे, अनुग्राह्य प्रमाणके बिना अवसर न पानेसे विचारशास्त्रका प्रारम्भ करना नहीं प्राप्त होता। इस प्रकारका पूर्वपक्ष—शङ्का—होनेपर हम इस प्रकार सिद्धान्त—समाधान—करते हैं—

दृष्ट फलका मिलना सम्भव हो, तो अदृष्ट फलकी कल्पना नहीं करनी चाहिये। विधिको नियमार्थ माननेसे तो उसके व्यर्थ होनेकी सम्भावना नहीं होगी।

प्रकृतमें दृष्ट फलकी सम्भावना दिखलाते हैं—कर्मकारकभूत स्वाध्यायमें—वेदमें—अध्ययनक्रियासे उत्पन्न हुए समस्त अर्थज्ञानकी कारणस्वरूपप्राप्ति और संस्कार ये दो दृष्ट फल पाये जाते हैं। यद्यपि अर्थज्ञान और अक्षरज्ञानमें कार्यकारणभाव लोकसिद्ध है तथापि नियमार्थ होनेसे विधि व्यर्थ नहीं मानी जा सकती। [सिद्धका विधान प्राप्त होनेपर ही नियमकी उपपत्ति

च संस्कृतस्य विनियोगाभावः, क्रतुविध्युपादानप्रमाणादेव विनियोगसिद्धेः। क्रतुविधिर्हि स्वविषयावबोधमपेक्षमाणस्तस्य जनकतया संस्कृतं स्वाध्याय-मुपादत्ते। ननूपादानप्रमाणं ज्ञानस्य जनकतया स्वाध्यायमात्रमादत्ते न संस्कारमिति चेत्, सत्यम्, तथापि कर्मप्रधानाध्ययनविधिसामर्थ्यादेव संस्कृतस्वाध्यायजन्यविशिष्टज्ञानवतैवाऽनुष्ठितो यागोऽपूर्वं जनयतीति कल्प्यते। प्रधानवदनङ्गस्याऽप्यध्ययनस्य क्रतूपकारित्वमविरुद्धम्, तत उभयविधिसामर्थ्याद्विवक्षितार्थो लभ्यते। एवं च यथाश्रुतकर्मकारकगत-

---

होती है। संस्कृत स्वाध्यायका कहीं दूसरे विधानमें विनियोग नहीं है, ऐसा भी नहीं कहना चाहिए, कारण कि क्रतुविधिके उपादान प्रमाणसे ही विनि-योगकी सिद्धि हो जाती है, क्योंकि क्रतुका विधान अपने विषयके ज्ञानकी अपेक्षा रखता है। वह अपने विषयके ज्ञानका जनक होनेसे स्वाध्यायका संस्कृत उपादान करता है। [अतः स्वाध्याय क्रतुका उपादानप्रमाण होता है।] उपादानप्रमाण तो विषयज्ञानका जनक होनेसे केवल स्वाध्यायका ही ग्रहण करेगा, संस्कारका नहीं, ऐसा कहना यद्यपि ठीक है; तथापि कर्मप्रधान [अध्येतव्यः इसमें तव्यप्रत्यय कर्मकारकरूप अर्थमें हुआ है और कृदन्त स्थलमें प्रत्ययार्थ प्रधान होता है] अध्ययनविधिकी सामर्थ्यसे ही संस्कारयुक्त स्वाध्यायसे उत्पन्न हुए विशिष्ट ज्ञानवान् अधिकारी द्वारा ही किया गया याग अपूर्व—पुण्य—को उत्पन्न करता है, ऐसी कल्पना की जाती है। [अध्ययन क्रतुका उपकार तो तब कर सकता है जब कि अध्ययन क्रतुका अङ्ग हो, इस आशङ्काका दृष्टान्त द्वारा समाधान करते हैं—] आधान—अग्निका संस्कार विशेष—क्रतुका अङ्ग न होता हुआ भी संस्कृत अग्निमें ही हवन करनेसे अपूर्व होना माना गया है एवं प्रकृतमें भी अध्ययन यद्यपि क्रतुका अङ्ग नहीं है तो भी उसे क्रतुके उपकारक माननेमें कोई विरोध नहीं है। इस प्रकार दोनोंके विधानोंकी सामर्थ्यसे विवक्षित अर्थका लाभ हो जायगा। [अर्थात् 'स्वाध्यायोऽध्येतव्यः' विधिसे स्वाध्यायका संस्कार तथा संस्कृत स्वाध्यायसे ही याग करनेसे अदृष्टकी सिद्धि होती है। इस प्रकार दोनोंका विधान होनेसे वेदमें विवक्षितार्थत्व सिद्ध होता है] इस प्रकार यथाश्रुत कर्मकारक (तव्यप्रत्ययसे प्रधानतया गृहीत स्वाध्यायरूप कर्मकारक) में दृष्ट फल—

दृष्टफलसम्भवे सक्तुन्यायेनाऽश्रुतकरणत्वकल्पनमदृष्टफलकल्पनं चाऽन्याय्यम्। ननु तव्यप्रत्ययेन प्रकृत्यर्थभूताध्ययनोपरक्तमपूर्वमभिधीयते, न तु कल्प्यत इति चेद्, मैवम्; अपूर्वाभिधायितव्यप्रत्ययः स्वाध्यायगतत्वेनैवाऽपूर्वमभिदध्यान्नाऽध्ययनगतत्वेन, तव्यप्रत्ययस्य कर्मभूतस्वाध्यायपरत्वात्। अपूर्वस्य धात्वर्थजन्यत्वनियमेऽपि तदुपरक्तत्वानियमेन स्वाध्यायगतत्वमविरुद्धम्। नन्वदृष्टार्थत्वे स्वाध्यायस्य विवक्षितार्थता न स्यात्, विषनिर्हरणादिकार्यान्तरविनियुक्तमन्त्रादिवदिति चेद्, न; तथा सत्यध्ययनविधिवाक्यस्याऽप्यविवक्षितार्थत्वाददृष्टार्थतयाऽध्ययनविधानमित्येतादृशं त्वन्मतमपि न सिध्येत्। अथोच्येत अध्ययनवाक्य-

---

संस्कारादि—का सम्भव होनेपर सक्तुन्यायसे अश्रुत फलकी कल्पना न्यायसंगत नहीं है।

शङ्का—तव्यप्रत्ययसे प्रकृति (इङ्धातु जिससे तव्यप्रत्ययका विधान किया गया है) के अर्थभूत अध्ययनसे उपरक्त—सम्बद्ध—अपूर्वका—पुण्यका—अभिधान होता है, तव्यका वाच्य अर्थ ही अध्ययनसम्बन्धी पुण्यरूप है, उस अर्थकी कल्पना नहीं होती है [वाच्यवृत्तिसे लब्ध अर्थ कल्पित नहीं कहा जाता]।

समाधान—ऐसा नहीं हो सकता, कारण कि अपूर्वका वाचक तव्यप्रत्यय स्वाध्यायसम्बन्धी अपूर्वका ही अभिधान कर सकता है, अध्ययनसे सम्बद्धका नहीं, क्योंकि कर्मवाचक तव्यप्रत्ययका कर्मकारकभूत स्वाध्यायके बोधनमें ही तात्पर्य है। अपूर्व धात्वर्थफल क्रियासे ही उत्पन्न होता है। इस नियमके रहते भी उसका (अपूर्वका) धात्वर्थसे उपरक्त रहनेका नियम नहीं है, इसलिए अपूर्वका स्वाध्यायगत होना विरुद्ध नहीं हो सकता। विषका दूरीकरण आदि दूसरे कार्योंमें विनियुक्त मन्त्रोंकी तरह स्वाध्यायको यदि अदृष्टपरक मानें, तो उसमें विवक्षितार्थत्व नहीं होगा [स्वार्थमें तात्पर्य नहीं होगा] ऐसी शङ्का भी नहीं कर सकते, कारण कि ऐसा माननेसे अध्ययनविधिके बोधक "स्वाध्यायोऽध्येतव्यः" इस वाक्यमें भी अविवक्षितार्थत्व होनेसे 'अदृष्ट अर्थमें तात्पर्य रखकर अध्ययनका विधान है' ऐसा आपका मत भी सिद्ध नहीं हो सकता।

स्याऽदृष्टत्वार्थत्वं तस्याऽर्थविवक्षाप्रतिबन्धकं न भवति, स्ववाक्यार्थमध्ययनावच्छिन्नफलभावनारूपं प्रत्येवाऽध्ययनविधिनाऽध्ययनवाक्यस्य विनियुक्तत्वात् । नहि मन्त्रेष्वपि विनियुक्तत्वमात्रमविवक्षितार्थत्वप्रयोजकम्, किन्तु स्वार्थादन्यत्र विनियुक्तत्वम्। न चाऽध्ययनवाक्यं स्वार्थादन्यत्र विनियुज्यते तेन स्वार्थपरस्य तस्य कस्मादविवक्षितार्थता स्यात्। ज्योतिष्टोमादिवाक्यानि तु यागाद्यवच्छिन्नफलभावनारूपात् स्वार्थादन्यत्राऽध्ययनावच्छिन्नफलभावनायामध्ययनविधिना विनियुज्यन्ते, ततो मन्त्राणामिवाऽन्यत्र विनियुक्तस्याऽदृष्टार्थस्य स्वाध्यायस्याऽर्थविवक्षाप्रतिबन्धो दुर्वार इति । नैतद्युक्तम्, न तावददृष्टार्थत्वेनाऽर्थविवक्षा प्रतिबध्यते,

---

है तथा इससे प्रतिपादित होनेवाला सम्बन्ध कहलाता है; इस प्रकार इन तीनोंमें परस्पर भेद विद्यमान है। इनमें विषय तो अन्ययोगकी व्यावृत्तिरूप है अर्थात् इस शास्त्रके विषयसे दूसरेका सम्बन्ध नहीं है और सम्बन्ध अयोगकी व्यावृत्तिरूप है अर्थात् फलसे विषयका सम्बन्ध अवश्य है, उसका अभाव नहीं, ऐसा सम्बन्ध और विषयका विवेक-भेद ग्रह है। दूसरा कल्प नहीं माना जा सकता, कारण कि एकके रहते हुए भी दूसरेका अभाव देखा जाता है, इसलिए दूसरेकी अर्थ द्वारा सिद्धि नहीं हो सकती। प्रयोजनाभावमें दृष्टान्त देते हैं—कौएके दाँत किसी दूसरे ग्रन्थसे सिद्ध नहीं हैं, इसलिए (अनन्यथासिद्धरूप) विषयत्वका प्रतिपादन किया जा सकता, अतः सम्बन्ध होना भी सम्भव है, परन्तु उस काकदन्तरूप विषयका विचार करनेसे प्रयोजन कुछ नहीं निकलता। [विषयाभावका दृष्टान्त दिखलाते हैं]—एवं पकी हुई केलेकी फलियोंका छिलका उतारनेमें कुठार, हँसुआ आदि साधनोंका सम्बन्ध हो सकता है और उससे पुरुषोंका प्रयोजन भी निकलता फिर भी वे कुठार आदिके व्यापारके विषय नहीं होते; कारण कि अङ्गुली आदिसे ही छिलकेका उच्चटन हो सकता है। [सम्बन्धाभावका दृष्टान्त दिखलाते हैं—] वैसे ही दूसरोंके द्वारा लाने लायक न होनेसे विषयभूत और (सुवर्णमय होनेसे) प्रयोजनविशिष्ट भी सुमेरु पर्वतके हमारे ऐसे मनुष्यों द्वारा किये गये व्यापारसे सम्बन्ध होते नहीं देखते हैं, कारण कि उसमें योग्यता नहीं है। इस प्रकार परस्पर व्यभिचारवाले इन तीनोंमें (एक दूसरेके

चारिषु नाऽस्त्यर्थसिद्धिशङ्काऽपि । न तृतीयः, उक्तत्रयमेलनमन्तरेण प्रवृ-त्त्यभावात् । नहि काकदन्तविचारे कदलीफलाद्युत्पाटनाय कुठारादौ मेर्वाद्यानयने वा पुरुषप्रवृत्तिरुपलभ्यते ।

स्यादेतत्, ब्रह्मस्वरूपं वेदान्तानामेव विषयो न विचारशास्त्रस्य, प्रमाणप्रमेयादिसंभावनाहेतुभूतन्यायानां तद्विषयत्वाद् ।

अत्र सिद्धान्ताभिज्ञंमन्यः परिजहार—विमतं विचारशास्त्रं वेदान्तैरभिन्नार्थम्, तदितिकर्तव्यत्वाद्, यथा दर्शपूर्णमासाभ्यामेकविषयं तदितिकर्तव्यं प्रयाजादि यथा वा बीजेन सहैककार्यजनकं तत्सहकारिभूतं जलभूम्यादि । यद्यपि विचारशास्त्रेण न्याया एव साक्षात्प्रतिपाद्यमाना उपलभ्यन्ते तथापि ब्रह्मणः परम्परया विषयत्वं भविष्यति; यथा छेत्तुर्हस्तव्यापारः साक्षात् कुठारमेव विषयीकुर्वाणोऽपि परम्परया काष्ठमपि विषयीकरोति तद्वदिति ।

रहनेसे एक दूसरेकी) अर्थात् सिद्धि होनेकी शङ्का भी नहीं हो सकती, तीसरा विकल्प भी नहीं हो सकता । तीनोंके मेलके बिना प्रवृत्ति नहीं हो सकती; अर्थात् तीनों मिलकर प्रवृत्तिके अङ्ग हैं, अतएव काकदन्तका विचार करनेमें अथवा केलेकी फली आदिके छीलनेके लिए कुठारादिमें या सुमेरुपर्वतके आनयनमें पुरुषकी प्रवृत्ति नहीं देखी जाती है ।

शङ्का—अस्तु, यह (उक्त कथन) सम्भव भी कैसे होगा; कारण कि ब्रह्मस्वरूप तो वेदान्तवाक्योंका ही विषय हो सकता है; विचारशास्त्रका नहीं, क्योंकि विचारशास्त्रके विषय तो प्रमाण, प्रमेय आदिकी सम्भावनाके कारणभूत न्याय ही हैं ।

समाधान—इस आशङ्कामें अपनेको सिद्धान्तज्ञानी समझनेवालेने समाधान किया है कि विमत विचारशास्त्र, वेदान्तवाक्योंके साथ अभिन्न अर्थके प्रतिपादक हैं, कारण कि वही (वेदान्त ही) इतिकर्तव्यता इसमें भी है, दर्शपूर्णमासयागोंके साथ समानविषयवाले उसी इतिकर्तव्यतासे विशिष्ट प्रयाजादि यागके समान या बीजके साथ एक कार्यके जनक उस बीजके सहकारी पृथ्वी, जल आदिके समान । यद्यपि विचारशास्त्रसे न्यायोंका ही साक्षात् प्रतिपादन किया हुआ देखा जाता है तथापि ब्रह्म परम्परासे विषय हो जायगा; जैसे छेदनकर्ताका हस्तव्यापार साक्षात् कुठारको ही विषय करता हुआ भी परम्परासे काठको

नाऽयं पण्डितंमन्यस्य परिहारः समीचीनः, विचारस्य वेदान्तेतिकर्तव्यत्वासिद्धेः। यथा प्रयाजादेरितिकर्त्तव्यतायामागमो मानं यथा वा जलभूम्यादेः सहकारित्वमन्वयव्यतिरेकसिद्धं न तथा विचारस्येतिकर्तव्यत्वे किञ्चिन्मानस्ति। न चेतिकर्तव्यत्वशून्यस्य वेदान्तशब्दस्य ब्रह्मावगमं प्रति कथं करणतेति शङ्कनीयम्, शब्दोपलब्धेः शक्तिज्ञानसंस्कारस्य च तदितिकर्तव्यत्वात्। विचारोऽपि दोषनिराकरणेन ब्रह्मप्रमितिहेतुतया शब्दं प्रति इतिकर्त्तव्यतां भजत्विति चेद्, न; वैदिकशब्दे दोषाभावात्। न चैवं विचारवैयर्थ्यम्, पुरुषदोषनिरासहेतुत्वात्। पुरुषदोषश्च द्विविधः—शब्दशक्तितात्पर्यान्यथावधारणं प्रत्यक्षादिविरोधबुद्धिश्च। तत्र लौकिकप्रयोगेषु ग्रामेऽस्मिन्नयमेक एवाऽद्वितीयः प्रभुरित्यादिषु सजातीयमात्र-

---

भी विषय करता है; वैसे ही प्रकृतमें भी विचारशास्त्रका ब्रह्म विषय हो सकता है।

परन्तु अपनेको स्वयं पण्डितमाननेवालेका इस प्रकार समाधान उचित नहीं है; क्योंकि विचारशास्त्रमें वेदान्तरूप इतिकर्तव्यताकी सिद्धि नहीं है। जैसे प्रयाजादिको इतिकर्तव्यता माननेमें शास्त्र प्रमाण है; अथवा जैसे जल और भूमि आदिमें अन्वयव्यतिरेकसे सिद्ध 'बीजकी' सहकारिता है वैसे विचारकी इतिकर्तव्यतामें कोई प्रमाण नहीं है। इतिकर्तव्यतासे शून्य (इतिकर्तव्य न माना जानेवाला) वेदान्तवाक्य ब्रह्मज्ञानके प्रति करण कैसे हो सकता है? यह शङ्का भी नहीं करनी चाहिए, कारण कि शब्दकी उपलब्धि (शब्दका श्रावण प्रत्यक्ष) और शक्तिज्ञानजनित संस्कारमें ही उसकी इतिकर्तव्यता है।

शङ्का—विचार भी दोषोंके दूर कर देनेसे ब्रह्मनिर्णयका कारण होता है इसलिए उसको शब्दके प्रति इतिकर्तव्यता प्राप्त हो जायगी।

समाधान—नहीं, वैदिक शब्दोंमें दोष नहीं होता है। [जिससे दोषनिराकरणरूप द्वार पा सके]। और विचार व्यर्थ भी नहीं हो सकता, कारण कि पुरुषदोषके निराकरणमें विचार हेतु है। पुरुषका दोष दो प्रकारका होता है—एक तो शब्दशक्तितात्पर्यका विपरीत निश्चय और दूसरा प्रत्यक्ष आदिसे विरोधज्ञान। इनमें से 'इस गांवमें यह एक ही अद्वितीय स्वामी है' इत्यादि लौकिक प्रयोगोंमें सजातीयमात्रके निवारणमें शक्तिका तात्पर्य

निवारणे शक्तितात्पर्यमवलोक्य वैदिकप्रयोगेऽपि तथैवाऽवधारयति। तदेतदन्यथाऽवधारणं समन्वयविचारेण निरसिष्यते विरोधबुद्धिश्चाऽविरोधविचारेण। एवं च प्रतिबन्धनिवारण एवोपक्षीणस्य विचारस्य कथं ब्रह्मप्रमितिहेतुता? तस्माद् न विचारशास्त्रविषयो ब्रह्मेति।

अत्रोच्यते—शब्दादेवोत्पन्नमपि ब्रह्मज्ञानं प्रतिबन्धनिवृत्तौ सत्यामेव प्रतितिष्ठति, न तु ततः पूर्वम्। तथा च प्रतिबन्धनिरासिनो विचारस्य ब्रह्मनिर्णयहेतुत्वाद् ब्रह्मविषयत्वमुपपद्यते।

अत्र केचिदाहुः—विचारावगम्यतात्पर्यस्याऽर्थप्रमितिहेतुत्वाद्विचारोऽप्यर्थप्रमितेरेव हेतुर्न प्रतिबन्धनिरासस्येति। तदसत्, किं तात्पर्यमविज्ञातमेवाऽर्थप्रमितिहेतुरुत विज्ञातम्? नाऽऽद्यः, सर्वत्र लौकिकवाक्येषु तात्पर्यावगमफलकविचारवैयर्थ्यापातात्। अनवगतेऽपि तात्पर्येऽन्यथाप्रति-

---

देखकर 'एकमेवाऽद्वितीयं ब्रह्म' इत्यादि वैदिक प्रयोगमें भी वैसे ही (सजातीय द्वितीयके निवारणमें ही) शक्तितात्पर्यका निश्चय करता है। इस प्रकारका विपरीत निश्चयरूप प्रथम दोष समन्वयविचारसे दूर किया जायगा और बिरोधबुद्धिरूप 'दूसरा दोष' विरोधाभावके विचारसे दूर किया जायगा। इस परिस्थितिमें प्रतिबन्धके दूर करनेमें क्षीणशक्ति हुआ विचार ब्रह्मनिश्चयका कारण कैसे हो सकता है? इसलिए विचारशास्त्रका विषय ब्रह्म नहीं हो सकता।

इस विषयमें कहा जाता है—शब्दसे उत्पन्न हुआ ब्रह्मज्ञान भी प्रतिबन्धकी निवृत्ति होनेपर ही प्रतिष्ठित (स्थिर) होता है, इससे पहिले प्रतिष्ठित नहीं होता। इस दशामें ब्रह्मका निर्णायक होनेसे प्रतिबन्धके निवारणमें समर्थ विचारशास्त्रका ब्रह्म विषय हो सकता है।

इसपर कोई कहते हैं कि विचार करनेसे प्रतीत होनेवाला तात्पर्य अर्थनिर्णयका कारण है, इसलिए विचार भी अर्थनिश्चयका ही कारण होता है; प्रतिबन्धके दूर करनेका कारण नहीं होता है। उनका यह कथन उचित नहीं है, कारण कि क्या अज्ञात ही तात्पर्य अर्थनिश्चयका कारण है? अथवा ज्ञात? प्रथम कल्पयुक्त नहीं है, क्योंकि लौकिक वाक्योंमें तात्पर्यके बोधके लिए किया गया विचार सर्वत्र व्यर्थ हो जायगा। कारण कि तात्पर्यके अज्ञात रहनेपर भी प्रथम कल्पके अनुसार विपरीत निश्चयका

पत्ययभावात्। द्वितीयेऽपि न तावत् तात्पर्यं पदार्थविषयम्, तस्य वाक्यार्थप्रतीतावनुपयोगात्। वाक्यार्थविषयत्वे चाऽन्योन्याश्रयत्वम्—विषयभूतवाक्यार्थस्य विशेषणस्याऽवगतौ तद्विशिष्टतात्पर्यावगतिस्तात्पर्यावगतौ च वाक्यार्थप्रमितिरिति।

अथ मन्यसे—पदेभ्यः पदार्थानवगम्याऽनन्तरं नूनमेषां संसर्गोऽस्ति, सह प्रयुज्यमानत्वात्, इत्युत्प्रेक्षया वाक्यार्थावगतौ नोक्तदोष इति। तदयुक्तम्, तत्र न तावदुत्प्रेक्षा स्मृतिः; अनवगतार्थगन्तृत्वात्। नाऽपि संशयः, कोटिद्वयाभावात्। नाऽपि विपर्ययः, बाधाभावात्। परिशेषाच्छब्दजन्यो वाक्यार्थबोधः प्रमाणमित्येवाऽभ्युपेयम्। एवं च शब्दस्य तात्पर्यावगममनपेक्ष्य प्रमापकत्वं पूर्वोक्तपरस्पराश्रयत्वं वा दुर्वारम्।

ननु गवादिपदानां गोत्वादिसामान्ये व्युत्पत्तिवद्वाक्यानामपि वाक्यार्थत्वसामान्ये तात्पर्यम्, ततश्च सामान्यस्य पूर्वमेव ज्ञाततया तात्पर्य-

---

अभाव हो जायगा। दूसरे कल्पमें भी प्रथम तो तात्पर्यका विषय पदार्थ है नहीं, क्योंकि उसका वाक्यार्थप्रतीतिमें उपयोग नहीं होता है। वाक्यार्थको विषय माननेमें अन्योन्याश्रय आता है। [अन्योन्याश्रय दिखलाते हैं—] विषयभूत वाक्यार्थस्वरूप विशेषणकी प्रतीतिके अनन्तर वाक्यार्थविशिष्ट तात्पर्यकी प्रतीति होती है और तात्पर्यकी प्रतीतिके अनन्तर वाक्यार्थका निश्चय होता है।

यदि मानो कि पदोंके द्वारा पदार्थोंका ज्ञान करनेके अनन्तर उन पदार्थोंका अवश्य कोई सम्बन्ध है, क्योंकि इनका साथमें प्रयोग किया गया है, इस प्रकार उत्प्रेक्षासे वाक्यार्थकी प्रतीति हो जानेके कारण उक्त (अन्योन्याश्रय) दोष नहीं आता, तो यह भी कथन युक्तिसङ्गत नहीं है, कारण कि उत्प्रेक्षाको स्मृति तो मान नहीं सकते, क्योंकि वह (उत्प्रेक्षा) अप्रतीत अर्थकी प्रतीति कराती है। संशय भी नहीं है, क्योंकि दो विरुद्ध कोटि उसमें नहीं हैं। विपर्यय भी नहीं कह सकते, कारण कि बाध नहीं है। इस अवस्थामें परिशेषसे (अन्तमें) 'शब्दजन्य वाक्यार्थ बोध प्रमाण है' ऐसा ही मानना होगा। ऐसा माननेसे तात्पर्यप्रतीतिकी अपेक्षाके बिना ही शब्दमें प्रमाजनकत्व या पूर्वोक्त अन्योन्यश्रयत्व दोष नहीं हटाया जा सकता।

शङ्का—जैसे गो आदि पदोंकी गोत्वसामान्यमें व्युत्पत्ति—शक्ति—मानी जाती है, वैसे ही वाक्योंका भी वाक्यार्थत्वसामान्यमें तात्पर्य माना जाता है।

विशेषणत्वसंभवात् तद्विशिष्टं तात्पर्यमवगम्यते। तथा च न तात्पर्येण वाक्यार्थविशेषप्रमितौ पूर्वोक्तदोष इति चेद्, न; वाक्यार्थविशेषतात्पर्याभावप्रसङ्गात्। अथ गोत्ववाचिनो गोशब्दस्य गोव्यक्तौ पर्यवसानवत् सामान्यगोचरमेव तात्पर्यं विशेषे पर्यवस्येद्, एवमपि न तात्पर्यमर्थप्रमितिहेतुः। विमतो वाक्यार्थावगमः शब्दशक्तिमात्रनिबन्धनः, शाब्दज्ञानत्वात्, पदार्थज्ञानवत्। यदि च तात्पर्यं वाक्यार्थप्रमितिहेतुः स्यात् तदा वाक्यार्थोऽशाब्दः स्यात्, तात्पर्यमात्रात् तत्प्रमितिसिद्धेः। शब्दान्वयव्यतिरेकौ च शब्दस्य पदार्थप्रदर्शनमुखेन तात्पर्योपाध्युपयोगितयाऽप्युपपद्येयाताम्। तस्मात्

अतः पहले ही ज्ञात होनेसे सामान्य तात्पर्यका विशेषण होता है, और उससे विशिष्ट तात्पर्यकी प्रतीति हो सकती है। इस प्रक्रियासे तात्पर्य द्वारा वाक्यार्थ-विशेषका निश्चय माननेमें पूर्वोक्त दोष नहीं आता।

समाधान—उक्त कथन नहीं बन सकता, कारण कि वाक्यार्थविशेषमें तात्पर्यका अभाव हो जायगा। [ऐसा इष्ट नहीं कह सकते, क्योंकि वृद्धव्यवहारमें अर्थ-विशेषके बोधके तात्पर्यसे ही शब्द और वाक्यका प्रयोग किया जाता है।] यदि कहो कि जैसे गोत्वसामान्यका वाची गोशब्द गोव्यक्तिविशेषका बोध करानेमें पर्यवसित होता है, वैसे ही सामान्यविषयक तात्पर्य भी विशेष अर्थमें पर्यवसित हो जायगा; तो यह कहना भी युक्त नहीं है, क्योंकि ऐसा माननेपर भी तात्पर्य अर्थ-निश्चयका कारण नहीं हो सकता। [कारण कि अनुमानसे पदार्थसंसर्गरूप वाक्यार्थनिश्चय भी शक्तिके द्वारा ही हो सकता है, इसके लिए तात्पर्यकी अपेक्षा नहीं है। उक्तार्थ साधक अनुमान दिखलाते हैं—] विमत याने विवादास्पद [वाक्यार्थ बोधको कोई शक्त्यधीन और कोई तात्पर्याधीन मानते हैं, इससे वह विमत हुआ] वाक्यार्थकी प्रतीति शब्दशक्तिमात्रके अधीन है, शाब्द (शब्दजनित) ज्ञान होनेसे, पदार्थज्ञानके सदृश। [इस अनुमानके विपरीत] यदि तात्पर्य वाक्यार्थज्ञानका कारण माना जायगा, तो वाक्यका अर्थ शाब्द (शब्दजनित) ज्ञान नहीं कहा जायगा; कारण कि तात्पर्यमात्रसे वाक्यार्थके निश्चयकी सिद्धि हो जायगी। [शाब्दबोध वही कहलाता है, जो शब्दनिष्ठशक्तिके द्वारा उपस्थित होता है] शब्दके अन्वय-व्यतिरेक तो पदार्थका बोध करा कर शब्दकी तात्पर्योपाधिमें—विशेषणभूत पदार्थमें—उपयोगिता बतलाकर भी उपपन्न

शाब्दत्वसिद्धये शब्द एवाऽर्थप्रमितिहेतुः, तात्पर्यबोधस्तु प्रतिबन्धनिरासीत्येवाऽभ्युपेयम् । एवं च तात्पर्यहेतोर्विचारस्याऽपि प्रतिबन्धनिरासित्वादुपचारेणैव ब्रह्मविषयत्वम् ।

ननूपचारेणाऽपि न ब्रह्मणो विचारविषयत्वं संभवति, आपातप्रसिद्धेरपि दुस्संपादत्वात् । न तावल्लोके प्रसिद्धम्, मानान्तरागोचरत्वात् । नाऽपि वेदे तत्प्रसिद्धिः, तत्र ब्रह्मशब्दस्याऽनवधृतार्थत्वात् । 'लोकावधृतसामर्थ्यः शब्दो वेदेऽपि बोधकः' इति न्यायेनाऽव्युत्पन्नशब्दस्य वेदेऽप्यबोधकत्वात् ।

हो सकते हैं । [शब्दके अन्वय-व्यतिरेकसे शाब्द कहलानेकी भी उपपत्ति नहीं हो सकती, कारण कि केवल पदार्थकी उपस्थिति करा देनेसे वे चरितार्थ हो जायँगे] । इसलिए [पदार्थसंसर्गरूप वाक्यार्थमें] शाब्दत्व (शाब्दबोधत्व) की सिद्धिके लिए शब्द ही अर्थनिश्चयका कारण है और तात्पर्यज्ञान तो प्रतिबन्ध दूर करनेमें ही कारण है, ऐसा ही मानना उचित है । इस प्रकार तात्पर्यका कारणभूत विचार भी प्रतिबन्धके निराकरणमें ही हेतु है, अतः उपचार द्वारा ही उसका ब्रह्म विषय होता है । [अर्थात् तात्पर्यप्रतीतिके बिना भी शक्ति या लक्षणा द्वारा शब्दसे ही अर्थनिश्चय हो जाता है, परन्तु उक्त विपरीत प्रतीति या विरोधबुद्धिरूप पुरुषदोषके द्वारा उत्पन्न हुए संशयादि प्रतिबन्धकोंकी निवृत्तिके लिए तात्पर्यज्ञान अपेक्षित होता है और तात्पर्यनिर्णयके लिए विचारेतिकर्तव्यता अपेक्षित है और यह सर्वविध ब्रह्मनिश्चय शब्द द्वारा हुए ब्रह्मनिश्चयकी प्रतिष्ठाके ही लिए है—इसलिए करणभूत शब्दका तथा विचारादि इतिकर्तव्यताका भी लक्षणाके द्वारा एक ही ब्रह्म विषय हुआ ।]

शङ्का—उपचार—लक्षणा—से भी ब्रह्म विचारका विषय नहीं हो सकता, कारण कि ब्रह्मकी आपातप्रसिद्धि—सामान्यज्ञान—का भी सम्पादन नहीं बन सकता । क्योंकि लोकमें तो ब्रह्म प्रसिद्ध है ही नहीं, क्योंकि वह शब्द प्रमाणके अतिरिक्त प्रत्यक्ष आदि किसी प्रमाणका विषय नहीं है । और वेदमें भी ब्रह्मकी प्रसिद्धि नहीं है, क्योंकि वेदमें आये हुए ब्रह्मशब्दके अर्थका निर्णय ही नहीं हो सका है । कारण कि 'लोकमें प्रतीतार्थक शब्द ही वेदमें भी अर्थबोध करा सकता है' इस न्यायसे अव्युत्पन्न शब्द (जिसका व्युत्पत्ति-ग्रह नहीं हुआ है, ऐसा शब्द) वेदमें भी बोधक नहीं होता ।

मैवम्, वैदिकप्रयोगान्यथानुपपत्त्या ब्रह्मशब्दार्थस्य कस्यचित्स्वर्गादिवत् कल्प्यत्वात्। प्रसिद्धपदसमभिव्याहारस्य स्वर्गब्रह्मवाक्ययोः समानत्वात्। एवमपि ब्रह्मशब्दस्याऽर्थमात्रं सिध्यति न त्वर्थविशेष इति चेद्, नः प्रसिद्धपदसमभिव्याहारेण तदन्वययोग्यस्यैवाऽर्थविशेषस्य कल्प्यत्वात्। न च तस्मिन्निवक्षितेऽर्थविशेषे शब्दस्य वृत्त्यसंभवः। रूढ्या तत्रावर्त्तमानमपि शब्दमवयवार्थव्युत्पादनेन वर्तयितुं शक्यत्वात्। एतदर्थमेव

समाधान—ऐसा नहीं, वैदिक प्रयोगोंकी अन्यथा अनुपपत्तिसे ब्रह्मशब्दके किसी-न-किसी अर्थकी स्वर्गादिके तुल्य कल्पना करनी चाहिए [जैसे लोकमें स्वर्गकी प्रसिद्धि न होनेपर भी वैदिक प्रयोगके बलसे एक पदार्थविशेषरूप स्वर्गकी कल्पना की जाती है, वैसे ही ब्रह्मशब्दार्थकी भी कल्पना हो जायगी]। प्रसिद्ध पदका समभिव्याहार स्वर्ग तथा ब्रह्म दोनों वाक्योंमें समान है।

शङ्का—इस निर्णयसे भी तो केवल ब्रह्मशब्दका सामान्य ही अर्थ सिद्ध हुआ [अर्थात् ब्रह्मशब्द अर्थका वाचक है, इतना ही सिद्ध होता है] अर्थविशेषकी तो सिद्धि नहीं हो सकती।

समाधान—ऐसा नहीं कह सकते, क्योंकि प्रसिद्ध पदके समभिव्याहारसे उसके साथ अन्वययोग्य अर्थविशेषकी ही कल्पना करनी चाहिये। ['तद् ब्रह्म, तद् विजिज्ञासस्व' इत्यादि पदोंमें विचारविधायक 'विजिज्ञासस्व' आदि पदोंके साथ अन्वयसिद्धिके लिए लोकप्रसिद्ध जात्यादिसे भिन्न पदार्थविशेषका ही वाचक ब्रह्मपद है, ऐसा मानना होगा। इन वेदान्तवाक्योंके विचारके लिए प्रवृत्त विचारशास्त्रमें पठित भी ब्रह्मपद उसी अर्थका वाचक लिया जायगा, इसलिए ब्रह्मपदार्थके अप्रसिद्ध होनेका दोष नहीं आता।] और उस कल्पित अर्थविशेषकी विवक्षा माननेमें शब्दकी वृत्तिका असम्भव दोष भी नहीं आता। रूढिसे उस अर्थमें ब्रह्मशब्दकी वृत्ति (शक्त्यादि) न होनेपर भी अवयव-(प्रकृति-प्रत्यय) के अर्थको लेकर अर्थविशेषमें ब्रह्मशब्दकी वृत्ति हो सकती है, इसीलिए (प्रकृति-प्रत्ययके अर्थका व्युत्पादन कर शब्दकी वृत्ति दिखानेके निमित्त ही) सर्वत्र निगम[१], निरुक्त[२], तथा

(१) प्रकृतिप्रत्ययनिष्पन्न शब्दमें प्रकृतिरूप एक देशके अर्थको लेकर विशिष्ट शब्दकी अर्थान्तरमें वृत्ति होना निगम कहलाता है; जैसे देहशब्द 'दिह उपचये' धातुसे बना हुआ उपचित वस्तुभूत शरीरादिका वाचक होता है।

(२) निरुक्त नाम है—सम्पूर्ण अवयवके अर्थोंका आश्रय करके अर्थान्तरका अभिधान

सर्वत्र निगमनिरुक्तव्याकरणानां प्रवृत्तत्वात्। तथा चाऽत्र 'सत्यं ज्ञानमन्तं ब्रह्म' 'अथातो ब्रह्मजिज्ञासा' इति श्रुतिसूत्रप्रयोगान्यथानुपपत्त्या बाधरहितं चिद्रूपमन्तशून्यं पुरुषार्थपर्यवसायितया जिज्ञास्यं वस्तु ब्रह्मशब्दार्थ इति कल्प्यते। ब्रह्मशब्दश्च बृह बृहि वृद्धावित्यस्माद्धातोर्निष्पन्नो महत्त्वमाचष्टे। तच्च महत्त्वं संकोचकप्रकरणोपपदयोरभावान्निरतिशयमेव संपद्यते। ततो देशतः कालतो वस्तुतश्चाऽन्तशून्यमित्युक्तं भवति। तथा बाध्यत्वजडत्वापुरुषार्थत्वादिदोषराहित्यमपि महत्त्वमेव। लोके दोषरहितेषु गुणवत्सु पुरुषेषु महापुरुषा इति व्यवहारदर्शनात्। ततो व्युत्पत्तिवशाद् यथोक्तेऽर्थे ब्रह्मशब्दो वर्त्तते। जातिजीवकमलासनादिषु यथोक्तार्थाभावेऽपि रूढिवशाद् ब्रह्मशब्दवृत्तिरुपपद्यते।

व्याकरणँ शास्त्रोंकी प्रवृत्ति है। इस सिद्धान्तके अनुसार प्रकृतमें 'सत्य ज्ञान और अविनाशी रूप ब्रह्म है' 'इसलिए साधन चतुष्टयके अनन्तर ब्रह्मजिज्ञासा' इत्यादि अर्थवाले श्रुति तथा सूत्र प्रयोगोंकी अन्यथा अनुपपत्तिसे बाधरहित, चिद्रूप, विनाश रहित, परम पुरुषार्थ होनेसे जिज्ञासायोग्य वस्तु ब्रह्मशब्दका अर्थ है ऐसी कल्पना की जाती है। और ब्रह्म-शब्द वृद्ध्यर्थक बृह या बृहि धातुसे बना हुआ है, अतः महत्त्वका अभिधान करता है। और वह महत्त्व सङ्कोचके कारणभूत प्रकरण तथा समभिव्याहृत उपपदके न होनेसे निरतिशयरूप ही सम्पन्न होता है। इससे देश, काल तथा वस्तुसे भी परिच्छेदशून्य वह वस्तु है ऐसा निश्चित होता है। एवं बाध्यत्व, जडत्व और अपुरुषार्थत्व इत्यादि दोषोंसे मुक्त रहना भी महत्त्व ही है। लोकमें दोष रहित और गुणी पुरुषोंके लिए महापुरुष ऐसा व्यवहार देखा जाता है। इस प्रकार व्युत्पत्तिके बलसे उक्त अर्थमें ब्रह्मशब्दकी वृत्ति है। और जाति, जीव, कमलासन आदि अर्थोंमें व्युत्पत्तिलभ्य उक्त महत्त्वरूप अर्थके अभावमें भी रूढिके कारण ब्रह्मशब्दकी वृत्ति उपपन्न होती है। [अर्थात् रूढिके कारण ब्रह्मशब्द जात्यादिका वाचक है और योगबलसे महत्त्वविशिष्ट ब्रह्मका वाचक है।

करना, जैसे—सोमशब्द। इसमें सह-उमा दो अवयव हैं, जिनका अर्थ है—पार्वती और सहित। इनके द्वारा उक्त पद महादेवजीका वाचक हुआ।

(३) प्रत्ययकी विधानसामर्थ्यसे अर्थका निश्चय कराना व्याकरणका कार्य है।

ननु बृंहतिधात्वर्थानुगमनेन किं सौत्रस्य ब्रह्मशब्दस्याऽर्थो वर्ण्यते किंवा श्रौतस्य ? नाऽऽद्यः; पौरुषेयप्रयोगस्य मूलप्रमाणापेक्षस्य तदभावे निर्णयानुपयोगात्। अथ श्रुतिर्मूलप्रमाणं तथाऽप्युत्तरसूत्रे जगज्जन्मादिकारणं ब्रह्मेति निर्णेष्यमाणत्वादस्मिन् सूत्रे प्रयासो न कर्तव्यः। न द्वितीयः; 'यतो वा इमानि भूतानि जायन्ते', 'तद्विजिज्ञासस्व', 'तद् ब्रह्म', 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिश्रुतौ स्वयमेवाऽर्थनिर्णयात्; नैष दोषः, प्रथमसूत्रप्रवृत्तिदशायामनिष्पन्नस्य द्वितीयसूत्रस्य तदर्थनिर्णयहेतुत्वासंभवात्। श्रुतावपि पदार्थस्याऽन्यतः प्रसिद्धिमन्तरेण वाक्यार्थप्रमित्ययोगादुभयत्राऽपि धात्वर्थानुगमेनाऽर्थस्य वर्णनीयत्वात्। धात्वर्थानुगमः संभावनामात्रबुद्धिहेतुर्न निर्णायक इति चेद्, मा भून्निर्णयः; संभावितस्याऽनिर्णीतस्यैवाऽर्थस्याऽत्र

शङ्का—क्या वृद्ध्यर्थक बृहि धातुके अर्थका अनुगम करके सूत्रमें पठित ब्रह्मशब्दके अर्थका निरूपण करते हो ? या श्रुतिमें आये हुए ब्रह्मशब्दके अर्थका ? इनमें प्रथम पक्ष नहीं बन सकता, कारण कि मूल प्रमाणकी अपेक्षा रखनेवाले पुरुषके प्रयोगका उस मूल प्रमाणके अभावमें निर्णय करना उपयोगशून्य है अर्थात् जिस पौरुषेय प्रयोगका मूल ही नहीं है, उस प्रयोगके अर्थका निर्णय करना व्यर्थ है। यदि श्रुतिको प्रमाण मानें, तो भी उत्तर सूत्रमें 'जगत्के जन्मादिका कारण ब्रह्म है' ऐसा निर्णय करना है, इसलिए इस सूत्रमें उसके निर्वचनका प्रयास नहीं करना चाहिए। द्वितीय पक्ष भी नहीं माना जा सकता, कारण कि 'जिससे सकल भूत उत्पन्न होते हैं', 'उस ब्रह्मका विचार करो' 'वह ब्रह्म है', 'सत्यरूप, ज्ञानस्वरूप एवं अपरिच्छिन्न ब्रह्म है' इत्याद्यर्थक श्रुतिमें स्वयं ही ब्रह्मशब्दके अर्थका निर्णय किया गया है।

समाधान—उक्त दोष नहीं आ सकता, कारण कि प्रथम सूत्रकी प्रवृत्तिके अवसरमें द्वितीय सूत्र बना ही नहीं था, इसलिए वह (द्वितीय सूत्र) प्रथम सूत्रके अर्थनिर्णयका कारण नहीं हो सकता। श्रुतिमें भी पदार्थकी दूसरे प्रमाणोंसे प्रसिद्धि हुए बिना वाक्यार्थका निश्चय नहीं हो सकता, अतः दोनोंमें (वेद तथा लोकमें) धात्वर्थका अनुगम करके ही वर्णन करना उचित है। धात्वर्थका अनुगम तो केवल सम्भावनाबुद्धिका हेतु है, निर्णयका हेतु नहीं है, ऐसी शङ्का करो, तो अच्छी बात है, निर्णय मत हो, केवल सम्भावनासे सिद्ध हुए

जिज्ञासाविषयत्वेनाऽपेक्षितत्वात् ।

अथ विवक्षितस्य ब्रह्मशब्दार्थस्य निश्चिता प्रसिद्धिरपेक्ष्येत, तर्हि साऽपि संपाद्यते । आत्मा तावद् 'अहमस्मि' इति सर्वलोकप्रत्यक्षः प्रतीयते, स एव हि ब्रह्म; 'स वा अयमात्मा ब्रह्म' इति श्रुतेः । ततश्च प्रतिपन्नमुद्दिश्य विचारसंभवाच्छक्यप्रतिपाद्यत्वलक्षणः संबन्धः सिध्यति । तथा चाऽत्यन्ताप्रसिद्ध्यभावाद्विषयत्वसिद्धिः । नन्वेवं तर्हि प्रत्यक्षस्याऽपि गोचरत्वेनाऽसाधारणत्वाभावाद्विषयत्वं न सिध्यतीति चेद्, अहमित्यात्मत्वसामान्याकारेण सर्वप्रत्यक्षसिद्धावपि तद्विशेषस्य विप्रतिपद्यमानस्य प्रत्यक्षसिद्ध्ययोगात् । यद्यप्यात्मनि वस्तुतो नाऽस्ति सामान्यविशेषभावस्तथापि यथा रज्जुद्रव्यस्य दण्डसर्पधारादावनुस्यूतरूपेण प्रतीयमानत्वमेव सामान्यं तथाऽऽ-

अनिर्णीत अर्थकी ही इस प्रथम सूत्रमें जिज्ञासाके विषयत्वरूपसे अपेक्षा है ।

यदि ब्रह्मशब्दके विवक्षित अर्थकी निश्चित ही प्रसिद्धि अपेक्षित हो, तो उस निश्चित प्रसिद्धिका भी सम्पादन किया जाता है । आत्मा तो 'मैं हूँ' इस प्रकार सम्पूर्ण लोगोंको प्रत्यक्षरूपसे प्रतीत है । वही ब्रह्म है, कारण कि 'वह यह आत्मा ब्रह्म है' ऐसे अर्थवाली श्रुति विद्यमान है । इससे प्रतीतिसिद्ध ब्रह्मको उद्देश्य कर (विषय बनाकर) विचारका सम्भव है, इसलिए प्रतिपाद्यत्वरूप सम्बन्धका प्रतिपादन हो सकता है । इससे अत्यन्त अप्रसिद्धिके अभावसे ब्रह्मका विषय होना सिद्ध होता है ।

शङ्का—इस रीतिसे तो ब्रह्म प्रत्यक्षका भी विषय हो गया । आप कह आये हैं कि लोकसिद्ध अहं प्रतीतिसे ब्रह्म प्रत्यक्ष है, इससे अनन्यसाधारण न होनेसे ब्रह्मका विषय होना सिद्ध नहीं हो सकता । अनन्यसाधारण ही विषय हो सकता है, ऐसा नियम है ।

समाधान—यह शङ्का उचित नहीं है, कारण कि 'अहम्' (मैं) इस प्रकार आत्मसामान्यरूपसे प्रसिद्धि रहनेपर भी अनन्त (अपरिच्छिन्न), अद्वय इत्यादि विशेषरूपसे विप्रतिपत्तिग्रस्त होनेसे (इस विषयमें वादियोंका मतैक्य न होनेसे) उक्त विशेषरूपकी प्रत्यक्ष द्वारा सिद्धि नहीं हो सकती, [इसलिए ब्रह्मका स्वरूपविशेष अनन्यसाधारण हो गया] । यद्यपि (सकलविशेषशून्य) आत्मामें सामान्यविशेषभाव वास्तविक नहीं है, तथापि जैसे रज्जुरूप द्रव्यका दण्ड, सर्प या (जल) धारा आदिमें अनुवर्तमानरूपसे प्रतीयमानत्व

त्मनोऽपि शरीरेन्द्रियमनोबुद्धिशून्यकर्तृभोक्तृसर्वज्ञब्रह्माख्यपदार्थेषु विप्रतिपत्तिस्कन्धेष्वनुस्यूतत्वेन प्रतीयमानत्वं सामान्यं भविष्यति, प्रत्यक्षसिद्धेऽपि शरीराद्यर्थे प्रयुज्यमानस्याऽऽत्मवाचिनोऽहंशब्दस्य गोशब्दवदर्थविप्रतिपत्तिरुपपद्यते।

गोशब्दस्य हि प्रत्यक्षसिद्धव्यक्त्याकृतिक्रियागुणाद्यर्थेषु प्रयुज्यमानस्य जातिरर्थत्वेन वैदिकैः प्रतिपन्ना, व्यक्तिः सांख्यादिभिः, उभयं वैयाकरणैः, अवयवसंस्थानाख्याऽऽकृतिरार्हतादिभिः, त्रितयमपि नैयायिकैः। अथ गोशब्दस्य प्रयोगे जात्यादीनामन्वयव्यतिरेकनियमात् तदर्थत्वशङ्का, तर्ह्यहंशब्दप्रयोगेऽपि शरीरादीनामन्वयव्यतिरेकनियमादेव तदर्थत्वशङ्काऽस्तु।

तत्र विचारविरहितं प्रत्यक्षमेव प्रमाणमाश्रित्य चेतयमानो देह

ही सामान्य है। [अर्थात् दण्डादिमें इदन्त्व या पुरोवर्तित्वरूपसे सर्वत्र एक-सी प्रतीति होती है] इसी प्रकार आत्माका भी शरीर, इन्द्रिय, मन, बुद्धि, शून्य, कर्ता, भोक्ता, सर्वज्ञ, तथा ब्रह्म नामक विप्रतिपत्तिके विषय पदार्थोंमें अनुगम होनेसे प्रतीयमानत्व ही सामान्य होगा, प्रत्यक्षसिद्ध भी शरीर आदिरूप अर्थमें प्रयुज्यमान अहंशब्दमें गोशब्दकी तरह अर्थविप्रतिपत्ति हो सकती है।

[प्रत्यक्षसिद्धमें विप्रतिपत्ति नहीं होती, इसका निराकरण किया गया, अब गोशब्दार्थमें विप्रतिपत्ति दिखलाते हैं—] प्रत्यक्षसिद्ध व्यक्ति, आकृति, क्रिया, गुण आदि अर्थोंमें प्रयुज्यमान गोशब्दका मीमांसक जातिरूप अर्थ मानते हैं, एवं सांख्य आदि व्यक्तिरूप अर्थको, वैयाकरण जाति और व्यक्ति दोनोंको, आर्हत (जैन) आदि अवयवसंस्थानरूप आकृतिको और नैयायिक तीनोंको गोशब्दका अर्थ मानते हैं। [इस प्रकार प्रत्यक्षसिद्धमें भी विप्रतिपत्ति देखी जाती है।] यदि गोशब्दके प्रयोगमें जात्यादि पदार्थोंका नियमतः अन्वय-व्यतिरेक होनेसे जात्यादिमें गोशब्दार्थत्वकी आशङ्का मानी जाय, तो प्रकृत 'अहम्' शब्दके प्रयोगमें शरीरादिरूप अर्थोंका भी अन्वय-व्यतिरेकनियम होनेसे उन्हें 'अहम्' शब्दका अर्थ माननेकी आशङ्का होगी। ('अहम्' शब्दार्थकी विप्रतिपत्ति दिखलाते हैं—]

उनमें विचारशून्य प्रत्यक्षको ही प्रमाण मानकर 'चेष्टा करता हुआ देह आत्मा

आत्मेति शास्त्रसंस्कारवर्जिता जनाः प्रतिपन्नाः। तथा भूतचतुष्टयमात्रतत्त्ववादिनो लौकायतिकाश्च 'मनुष्योऽहं, जानामि' इति शरीरस्याऽहंप्रत्ययालम्बनत्वेन ज्ञानाश्रयत्वेन चाऽवगम्यमानत्वात् तदेवाऽऽत्मेति मन्यन्ते।

अन्ये पुनरेवमाहुः—सत्यपि शरीरे चक्षुरादिभिर्विना रूपादिज्ञानाभावादिन्द्रियाण्येव चेतनानि। न चेन्द्रियाणां करणतया ज्ञानान्वयव्यतिरेकयोरन्यथासिद्धिः, करणत्वकल्पनादुपादानकल्पनस्याऽभ्यर्हितत्वात्। अतः काणोऽहं मूकोऽहमित्यहंप्रत्ययालम्बनानि चेतनानीन्द्रियाणि प्रत्येकमात्मत्वेनाऽभ्युपेयानि। शरीरे त्वहंप्रत्ययालम्बनत्वं चेतनत्वं चाऽऽत्मभूतेन्द्रियाश्रयत्वादन्यथासिद्धम्। नन्वेकस्मिन् शरीरे बहूनामिन्द्रियाणां चेतनत्वे 'य एवाऽहं पूर्वं रूपमद्राक्षं स एवेदानीं शब्दं शृणोमि' इति प्रत्यभिज्ञा

है', ऐसा शास्त्रसंस्कारहीन मनुष्य मानते हैं। एवं चार (पृथ्वी, जल, तेज और वायुको) ही तत्त्व माननेवाले लौकायतिक—नास्तिक—'मैं मनुष्य हूँ और जानता हूँ' (ज्ञानवान् हूँ) इस प्रतीतिके अनुसार 'अहम्' प्रतीतिका विषय तथा ज्ञानका आश्रय होनेसे शरीर ही आत्मा है, ऐसा मानते हैं।

और दूसरोंकी इस प्रकार विप्रतिपत्ति है—शरीरके विद्यमान रहते भी चक्षुरादि इन्द्रियोंके बिना रूपादिका ज्ञान नहीं हो सकता, इसलिए इन्द्रियाँ ही चेतनस्वरूप (आत्मा) हैं। इन्द्रियोंका ज्ञानके साथ अन्वयव्यतिरेक अन्यथासिद्ध है, क्योंकि इन्द्रियां करण हैं [चक्षुरादि इन्द्रियोंके द्वारा रूपादिज्ञानदर्शनसे इन्द्रियोंका चेतन होना नहीं माना जा सकता, कारण कि इन्द्रियाँ तो ज्ञानकी साधन हैं, आश्रय नहीं हैं, जैसे कुठार आदि छेदनके साधन हैं, आश्रय या कर्ता नहीं हैं], ऐसा मानना उचित नहीं है; कारण कि करणकारककी कल्पना करनेकी अपेक्षा उपादान—आश्रय—की कल्पना करना श्रेष्ठ है। इसलिए 'मैं काना हूँ, मैं मूक (गूंगा) हूँ' इत्यादि अहंप्रत्ययके आलम्बन—आश्रय—चेतनस्वरूप इन्द्रियोंमें प्रत्येक चक्षुरादिको आत्मा समझना चाहिए। और शरीरका अहंप्रतीतिमें विषय होना या चेतन होना, तो आत्मभूत इन्द्रियोंका आश्रय होनेसे अन्यथासिद्ध है।

शङ्का—एक ही शरीरमें अनेक इन्द्रियोंके चेतन होनेपर 'जिस मैंने पहले रूप देखा था, वहीं मैं इस समय शब्दको सुन रहा हूँ' ऐसी प्रत्यभिज्ञा नहीं

न स्यात् । तथा भोक्तृत्वं च रूपरसादिषु युगपदेव स्यान्न क्रमेणेति चेद्, मैवम्; नहि चेतनैकत्वं प्रत्यभिज्ञाक्रमभोगयोर्निमित्तम्, किन्त्वेकशरीराश्रयत्वमेव। ततो यथैकस्मिन् गेहे बहूनां पुरुषाणामेकैकस्य विवाहेऽन्येषामुपसर्जनत्वं तथा इन्द्रियात्मनामप्येकैकस्योपभोगकालेऽन्येषामुपसर्जनत्वमिति।

अन्ये तु मन्यन्ते—स्वप्ने चक्षुराद्यभावेऽपि केवले मनसि विज्ञानाश्रयत्वमहंप्रत्ययालम्बनत्वं चोपलभ्यते। न च रूपादिज्ञानानां चक्षुराद्याश्रयत्वम्, तथा सति केवले मनसि रूपादिस्मृत्यनुपपत्तेः। ततः करणान्येव चक्षुरादीनि। अहंप्रत्ययस्तु तत्र कर्तृत्वोपचारात् सिध्यति। न चाऽनेकात्मस्वेकशरीराश्रयत्वमात्रेण प्रत्यभिज्ञा युज्यते, एकप्रासादमा-

---

हो सकती। और रूप, रस आदि विषयका भोग करना भी एक साथ ही प्राप्त हो जायगा, क्रमसे न होगा।

समाधान—ऐसा नहीं, क्योंकि चेतनका एक होना प्रत्यभिज्ञा और क्रमसे भोगका निमित्त नहीं है, किन्तु एक शरीरमें रहना ही निमित्त है। जैसे एक घरमें बहुत पुरुषोंमें से एक एकके विवाहमें दूसरोंका उपसर्जनत्व—गौणता—माना जाता है (अर्थात् जिसका विवाह रहता है उसका प्राधान्य और अन्योंकी अप्रधानता रहती है) एवं इन्द्रियरूप आत्माओंमें भी एक एकके उपभोगके समय दूसरोंकी अप्रधानता रहती है, [इसलिए प्रत्यभिज्ञाकी और क्रमिक भोगकी उपपत्ति हो जाती है]।

कुछ वादियोंका मत है कि—स्वप्नमें चक्षुरादिके अभावमें भी केवल मनमें विज्ञानका आश्रयत्व और अहंप्रत्ययका आलम्बनत्व पाया जाता है। और रूपादिज्ञान चक्षुरादि इन्द्रियोंके आश्रित नहीं हो सकते, कारण कि ऐसा माननेसे केवल मनमें रूपादिकी स्मृति नहीं हो सकेगी। [स्मरण और अनुभवमें सामानाधिकरण्यका नियम है], इसलिए इन्द्रियोंको करण ही मानना चाहिए। इन्द्रियोंमें अहंप्रतीति होना तो करणमें कर्तृत्वकी लक्षणा करनेसे उपपन्न होता है। भिन्न-भिन्न अनेक आत्माओंमें एक ही शरीरमें आश्रित होनेसे प्रत्यभिज्ञाकी उपपत्ति नहीं हो सकती, कारण कि एक मकानमें रहनेवालोंको भी समान प्रत्यभिज्ञा होनेका प्रसङ्ग

श्रितानामपि तत्प्रसङ्गात् । तस्मात् चक्षुरादि करणं शरीराद्याधारं मन एवाऽऽत्मेति ।

विज्ञानवादिनस्तु क्षणिकविज्ञानव्यतिरिक्तवस्तुनः सद्भावमनुभवविरुद्धं मन्वानास्तस्यैव विज्ञानस्याऽऽत्मत्वमाहुः । प्रत्यभिज्ञा तु ज्वालायामिव संततविज्ञानोदयसादृश्यादुपपद्यते । विज्ञानानां हेतुफलसंतानमात्रादेव कर्मज्ञानबन्धमोक्षादिसिद्धिः ।

माध्यमिकस्तु सुषुप्ते विज्ञानस्याऽप्यदर्शनाच्छून्यमेवाऽऽत्मतत्त्वमित्याह । यदि सुषुप्ते विज्ञानप्रवाहः स्यात्तदा विषयावभासोऽपि प्रसज्येत, निरालम्बनज्ञानायोगात् । जागरणस्वाप्नज्ञानानामेव सालम्बनत्वम् , न सौषुप्तिकज्ञानानामिति चेद्, न; विशेषाभावात् । विमतं सालम्बनम्, प्रत्ययत्वात्, संमतवत् । उत्थितस्य सौषुप्तविषयस्मृत्यभावनियमान्न तत्र

आ जायगा । इसलिए चक्षुरादि इन्द्रिय करण हैं और शरीरादिका आधार मन ही आत्मा है ।

विज्ञानवादी तो क्षणिक विज्ञानसे अतिरिक्त वस्तुके सद्भावको अनुभवविरुद्ध मानकर उसी क्षणिक विज्ञानको आत्मा कहते हैं । प्रत्यभिज्ञा तो ज्वाला—दीपशिखादि अग्निकी लपक—में जैसे निरन्तर एकसे विज्ञानका उदय होनेके कारण सादृश्यसे उपपन्न होती है । और विज्ञानोंके हेतु तथा फल सन्तानमात्रसे ही कर्म-ज्ञान, बन्ध-मोक्ष आदिकी सिद्धि होती है ।

माध्यमिक—शून्यवादी बौद्ध—तो सुषुप्ति अवस्थामें विज्ञानके भी न रहनेसे शून्य ही आत्मतत्त्व है, ऐसा कहता है । यदि सुषुप्तिदशामें भी विज्ञानका प्रवाह माना जाय, तो विषयका ज्ञान भी उस समय होना चाहिए, कारण कि विषयके बिना ज्ञानका होना सम्भव नहीं है ।

शङ्का—जाग्रत् तथा स्वप्न अवस्थाके ज्ञानमें सालम्बनत्वका—सविषयत्वका—नियम है, सुषुप्तिकालके ज्ञानोंमें ऐसा—सविषयत्वका—नियम नहीं है ।

समाधान—ऐसा नहीं कह सकते, क्योंकि इसमें कोई विशेष नहीं है । [अर्थात् जागरादि ज्ञानमें और सौषुप्त ज्ञानमें ज्ञानसामान्यके कारण कोई विशेष नहीं है] । कारण कि विमत सौषुप्तज्ञान—आलम्बन—विषय—विशिष्ट है, ज्ञान सामान्य होनेसे, सम्मत—जागर स्वप्नके—ज्ञानके तुल्य । जागर अवस्था प्राप्त होनेपर सुषुप्तिकालके विषयका स्मरण न होनेका नियम होनेसे उस

विषय इति चेत्, तर्हि नियमेनाऽस्मर्यमाणत्वादेव तत्र ज्ञानमपि मा भूत्। न च शून्ये विवदितव्यम्, यथा सविकल्पकः स्वविषयविपरीतनिर्विकल्पकजन्यस्तथा सत्प्रत्ययोऽपि स्वविपरीतप्रत्ययजन्य इत्यभ्युपेयत्वात्। एवं चोत्थाने सति जायमानस्याऽहमस्मीति सत्प्रत्ययस्य समनन्तरपूर्वप्रत्ययलक्षणकारणरहितस्य वास्तवत्वायोगाच्छून्यमेव तत्त्वमिति।

अपरे पुनः शरीरेन्द्रियमनोविज्ञानशून्यव्यतिरिक्तं स्थायिनं संसारिणं कर्त्तारं भोक्तारमात्मानमाहुः। न च शून्येऽहंप्रत्यय उपपद्यते, वन्ध्यापुत्रादावपि तत्प्रसङ्गात्। नाऽपि क्षणिकविज्ञाने क्रमभावी व्यवहारो युज्यते, सर्वो हि लोकोऽनुकूलं वस्तु प्रथमतो जानाति, तत इच्छति, ततः प्रयतते, ततस्तत्प्राप्नोति, ततः सुखं लभते। यद्येतादृशमेककर्तृकतया

सुषुप्तिकालमें विषय नहीं रहता (केवल ज्ञानमात्र रहता है), ऐसा मानो, तो स्मरण न होनेके नियमसे ही सुषुप्तिमें ज्ञान भी न माना जाना चाहिए। और शून्यके माननेमें विवाद नहीं करना चाहिए, कारण कि जैसे सविकल्पक ज्ञान अपने (सविकल्प) विषयके विपरीत निर्विकल्पकसे उत्पन्न होता है, वैसे ही सत्को विषय करनेवाला ज्ञान भी अपनेसे विपरीत असत् (शून्य) के ज्ञानसे उत्पन्न होता है, ऐसा मानना आवश्यक है। एवं सुषुप्तिसे जाग जानेपर होनेवाली समनन्तर पूर्वप्रत्ययरूप कारणसे हीन 'मैं हूँ' इस प्रकार सत्-विषयक प्रतीतिको वास्तविकत्वका सम्भव नहीं है, अतः शून्य ही तत्त्वभूत पदार्थ है।

इससे भी दूसरे वादी शरीर, इन्द्रिय, मन, विज्ञान तथा शून्यसे भी अतिरिक्त स्थायी रहनेवाले कर्ता और भोक्ता रूप संसारीको आत्मा कहते हैं। शून्यके लिए अहंव्यवहार नहीं हो सकता, अन्यथा वन्ध्यापुत्रादिमें भी 'अहं' प्रत्यय होनेका प्रसङ्ग आ जायगा, (वन्ध्या पुत्र भी शून्यसे अविशेष है)। और क्षणिकविज्ञानवादमें भी क्रमभावी व्यवहार युक्त नहीं है, कारण कि सारा संसार प्रवृत्तिके पूर्व उपादेय वस्तुको अनुकूल जानता है, अनन्तर उसकी इच्छा करता है, तब उसके पानेके लिए प्रयत्न करता है, इसके अनन्तर उसको पाता है, तदन्तर सुखप्राप्ति होती है। यदि एक ही कर्ताका उक्त प्रकारके व्यव-

भासमानं व्यवहारमेकसंतानवर्त्तिनो बहव आत्मानः परस्परवार्त्तानभिज्ञा अपि निष्पादयन्ति, तदा भिन्नसंतानवर्तिनः किं न निष्पादयेयुः। तस्मात् 'य एवाऽहमिदं वस्त्वज्ञासिषं स एवेदानीमिच्छामि' इत्याद्यबाधितप्रत्यभिज्ञा-निर्वाहाय स्थाय्यात्माऽऽभ्युपेयः। न चाऽसौ विज्ञानरूपः, अहं विज्ञान-मित्यैकत्वानुभवाभावात्। 'ममेदं विज्ञानम्' इति हि संबन्धोऽनुभूयते। न चाऽयमनुभवो ममात्मेतिवदौपचारिकः, बाधाभावात्। एतेन शरीरेन्द्रिय-मनसामात्मत्वं प्रत्युक्तम्। तत्राऽपि संबन्धप्रत्ययस्याऽनिवार्यत्वात्, अह-मुल्लेखस्य तत्राऽध्यासिकत्वात्।

न चाऽयमात्मा सादिः, शरीरोत्पत्तिसमनन्तरमेव सुखदुःखप्राप्तिमव-लोक्य तद्धेतुभूतयोः पुण्यपापयोः कर्त्ता पूर्वमप्यस्तीत्यवगमात्। न चाऽयम-

---

हारका एक सन्तानमें होनेवाले बहुतसे आत्मा एक दूसरेके व्यवहारसे परिचित न होते हुए भी सम्पादन करते हैं, तो भिन्न सन्तान—प्रवाह—में आनेवाले आत्मा भी उक्त व्यवहारका सम्पादन क्यों न कर सकें। [अर्थात् देवदत्तादिके ज्ञान, इच्छा आदिसे यज्ञदत्तकी प्रवृत्ति तथा देवदत्तके व्यवहारका ज्ञान यज्ञ दत्तको भी होना चाहिए] इसलिए 'जिस ही मैंने इस वस्तुको जाना था वही मैं इस समय चाह रहा हूँ' इत्यादि बाधरहित प्रत्यभिज्ञाके निर्वाहके लिए स्थायी आत्मा मानना चाहिए। वह आत्मा विज्ञानस्वरूप नहीं माना जा सकता, क्योंकि इसके विपरीत 'मैं विज्ञान हूँ' ऐसा अभेदरूपसे अनुभव नहीं होता है; किन्तु 'मेरा यह विज्ञान है' इस प्रकार भेदसम्बन्धका अनुभव होता है। उक्त (मेरा विज्ञान, ऐसे) अनुभवको 'मेरी आत्मा' इस व्यवहारके तुल्य लाक्षणिक मानना उचित नहीं है, कारण कि इसमें (मेरा विज्ञान इस व्यवहारमें) बाध नहीं देखा जाता। 'बाधके बिना लक्षणाका सम्भव नहीं है' इस सिद्धान्तसे शरीर, इन्द्रिय तथा मनको आत्मा माननेका भी खण्डन हो गया। उनमें भी भेद-सम्बन्धके ज्ञानका निवारण नहीं हो सकता, क्योंकि उन (शरीरादि) में 'अहम्' व्यवहार अध्यासमूलक होता है। [मैं स्थूल हूँ, मैं कृश हूँ इत्यादि प्रतीति बाधित होनेसे वस्तुभूत नहीं है।]

और आत्माको सादि (कार्य) नहीं मान सकते, कारण कि शरीरकी उत्पत्तिके अनन्तर ही सुख तथा दुःखकी प्राप्तिको देखकर उसके कारणभूत पुण्य तथा पाप (सुखका कारण पुण्य और दुःखका पाप)

नित्यः, विनाशानिरूपणात्। न तावत् स्वतो विनाशः, निर्हेतुकविनाशस्याऽतिप्रसङ्गिनः सुगतव्यतिरिक्तैरनङ्गीकारात्। नाऽपि परतः, निरवयवस्य विनाशहेतुसंसर्गासंभवात्। संभवेऽपि वा न विनाशः सिध्येत्। कर्मनिमित्तो ह्यन्यसंसर्गः, स च तत्कर्मफलोपभोगायाऽऽत्मनोऽवस्थितिमेव साधयेद्, न विनाशम्। तस्मादनादेरविनाशिनोऽनन्तशरीरेषु यातायातरूपः संसारः सिद्धः। निर्विकारस्य भोगासंभवाद्विकारस्य क्रियाफलरूपस्याऽभ्युपगमे क्रियावेशात्मकं कर्तृत्वमनिवार्यम्। भोक्तृत्वमप्यनुभूयमानं शरीरादिषु विज्ञानपर्यन्तेष्वनुपपन्नत्वादुक्तात्मन्येव पर्यवस्यति। तथा हि—शरीरं तावत् पञ्चभूतसंघातरूपम्, 'पञ्चभूतात्मके तात ! शरीरे पञ्चतां गते' इत्यादिशास्त्रात्।

यत्तु नैयायिको मन्यते—भूलोकवासिनां शरीरं पार्थिवमेव, तत्र

का कर्त्ता इससे भी पहले है, ऐसा माना जाता है। और यह आत्मा अनित्य भी नहीं है, कारण कि विनाशका निरूपण नहीं किया जा सकता; क्योंकि आत्माका स्वतः विनाश तो होता नहीं है, क्योंकि कारणके बिना होनेवाले अतिप्रसङ्गग्रस्त विनाशको बौद्धोंसे अतिरिक्त और कोई नहीं मानता। अन्य कारणसे भी (आत्माका) विनाश नहीं हो सकता, क्योंकि निरवयव आत्माका विनाशके कारणके साथ सम्बन्ध नहीं हो सकता। और उसका सम्भव होनेपर भी विनाश सिद्ध नहीं हो सकता, कारण कि दूसरेका सम्बन्ध कर्म (क्रिया) द्वारा ही होता है और वह कर्मजनित सम्बन्ध उस कर्मके फलका उपभोग करनेके लिए आत्माकी स्थितिको ही सिद्ध करेगा, विनाशको नहीं। इससे अनादि और अविनाशी आत्माका अनन्त शरीरोंमें गतागतरूप (जन्म-मरणरूप) संसार सिद्ध होगा। विकारशून्यके भोगका सम्भव न होनेसे क्रिया-फलरूप विकारके माननेमें क्रियावेशात्मक कर्तृत्वका निवारण नहीं किया जा सकता और अनुभूयमान (अनुभवमें आनेवाला) भोक्तृत्व भी विज्ञानपर्यन्त शरीरादिमें नहीं बन सकता, इससे वह पूर्वकथित आत्मामें ही मानना पड़ता है, क्योंकि शरीर तो आकाशादि पांच भूतोंका संघातरूप है, क्योंकि 'हे तात ! पञ्चभूतात्मक शरीरके पञ्चत्वको प्राप्त होनेपर' अर्थात् अपने कारणभूत पाचों भूतोंमें मिल जानेपर, ऐसा शास्त्र कहता है।

और नैयायिकोंका जो यह मत है कि भूलोकमें रहनेवाले मनुष्योंका शरीर

क्लेदनाद्युपलब्धिर्वस्त्रादाविव भूतान्तरोपष्टम्भादिति, तदसत्; शोषादिना जलाद्यपगमेऽपि यथा वस्त्रादिस्वरूपस्य नाऽपचयस्तथा क्लेदनपाचनव्यूहनावकाशानामपगमेऽपि शरीरस्याऽपचयाभावप्रसङ्गात् ।

यच्च वैशेषिकैरुच्यते—पञ्चभूतात्मकत्वे शरीरस्याऽप्रत्यक्षत्वप्रसङ्गः, वाय्वाकाशयोरप्रत्यक्षतया प्रत्यक्षाप्रत्यक्षवृत्तित्वादिति; तदप्ययुक्तम्, तथा

पृथ्वीसे ही बना है, पाँच भूतोंसे नहीं । उसमें पसीने आदिकी उपलब्धि तो अन्य भूतोंके सम्बन्धसे होती है। जैसे कि दूसरे भूतोंके सम्बन्धसे वस्त्रमें जलादिकी उपलब्धि होती है, [आदि पदसे बढ़ना, फैलना, सिकुड़ना, गरम होना तथा अन्दरसे पोलापन आदि लेने चाहिएँ । तात्पर्य यह है कि क्लेदनादि यद्यपि जलादिके असाधारण गुण हैं तथापि जैसे वस्त्रादिमें जलादिके संयोगसे क्लेदन, पाचन, व्यूहन आदि देखे जाते हैं, पर वे पाञ्चभौतिक नहीं कहलाते, किन्तु पार्थिव ही कहलाते हैं, वैसे ही मनुष्यशरीर भी पार्थिव ही है ऐसा मानना चाहिए]। यह मत उचित नहीं है, कारण कि जैसे सुखा देने आदिसे जलादिका सम्बन्ध दूर हो जानेपर भी वस्त्रके स्वरूपकी कोई हानि नहीं होती, वैसे क्लेदन (गीलापन), पाचन, व्यूहन (बढ़ना) तथा (आकाश) पोलापन आदि गुणोंका नाश होनेपर भी शरीरके स्वरूपकी किसी प्रकारसे हानि नहीं होनी चाहिए । [वस्त्रका जलादि उपादान नहीं है, अतः क्लेदनादिके नष्ट होनेपर भी जैसे वस्त्रके स्वरूपका कुछ नहीं बिगड़ता, वैसे क्लेदनादि गुणोंके नष्ट होनेपर भी शरीरको वस्त्रके समान अपने स्वरूपमें रहना चाहिए, परन्तु ऐसा देखा नहीं जाता है, बल्कि क्लेदनादिका विनाश होनेपर शरीर-स्वरूपका ह्रास देखा जाता है, अतः नैयायिकोंका मत असङ्गत है]।

और वैशेषिकोंका जो यह कहना है कि 'शरीर पाँच भूतोंसे बना है' ऐसा माननेमें उसका प्रत्यक्ष ही नहीं हो सकता, कारण कि वायु और आकाशका प्रत्यक्ष न होनेसे शरीर प्रत्यक्ष (पृथ्वी आदि तीन) और अप्रत्यक्ष (आकाश, वायु) भूतोंमें रहता है । [इसलिए सम्पूर्ण उपादानोंका प्रत्यक्ष न होनेसे प्रत्यक्षाप्रत्यक्ष उपादानमें रहनेवाले शरीरका प्रत्यक्ष नहीं हो सकता, यह भाव है]।

वैशेषिकोंका यह कथन भी युक्तिसङ्गत नहीं है, कारण कि उक्त हेतुके मान लेनेसे तो सभी अवयवी पदार्थोंका कभी प्रत्यक्ष ही न हो सकेगा, क्योंकि

सति सर्वावयविनामप्रत्यक्षत्वापातात्, प्रत्यक्षाप्रत्यक्षावयववृत्तित्वात्। नहि सूक्ष्माः परभागस्थिताश्चाऽवयविनोऽवयवाः प्रत्यक्षीकर्तुं शक्यन्ते। तस्माद्भूतसंघातः शरीरम्। न च गन्धादिमतां तद्रहितानां च भूतानामेककार्यजनकत्वं न स्यात्, परस्परविरोधादिति वाच्यम्, तथा सति नीलादीनामेकावयविजनकत्वस्यैकचित्ररूपारम्भकत्वस्य चाऽसम्भवप्रसङ्गात्। अनुभवबलादेव तत्र तथा स्वीकारे प्रकृतेऽपि तन्न दण्डवारितम्।

तत्र शरीरस्य भोक्तृतां वदन्तो लोकायताः प्रष्टव्याः—किं व्यस्तानां भूतानां प्रत्येकं भोक्तृत्वम् उत समस्तानाम्? आद्येऽपि न तावद्युगपत् सर्वेषां भोक्तृता, तदा स्वार्थप्रवृत्तानां तेषामन्योन्यमङ्गाङ्गिभावानुपपत्तौ

सभी अवयवी पदार्थ प्रत्यक्ष और अप्रत्यक्ष दोनों प्रकारके अवयवोंमें ही रहते हैं। अवयवीके अन्तिम अत्यन्त सूक्ष्म अवयवोंका (जहांपर पुनः अन्य अवयवकी कल्पना नहीं हो सकती, ऐसे अवयवोंका) प्रत्यक्ष नहीं किया जा सकता इसलिए पाँचों भूतोंका समूह (मिला हुआ पिण्डविशेष) ही मनुष्यशरीर है। यदि कहो कि गन्धादि गुणवाले और उन गुणोंसे रहित भूतोंका परस्पर विरोध होनेसे उनसे एक कार्यकी उत्पत्ति नहीं हो सकती, तो यह कहना भी युक्त नहीं है, कारण कि (परस्पर विरोधियोंको एक कार्यके प्रति जनक न माननेसे) नीलादि परस्पर विरोधी गुण भी एक अवयवीके (द्रव्यके) प्रति तथा एक चित्ररूपके प्रति जनक नहीं हो सकेंगे। [अर्थात् परस्पर विरुद्ध नीलादि गुण भी चित्रपट आदिके आरम्भक नहीं हो सकेंगे।] यदि कहो कि अनुभव-सामर्थ्यसे परस्पर विरोधी होते हुए भी नीलादि गुण चित्रपटके आरम्भक माने जाते हैं, तो प्रकृतमें भी उनको (अनुभवके बलसे परस्पर विरुद्ध पृथ्वी आदिको) एक शरीरके प्रति आरम्भक मानना डंडा मारकर भी नहीं हटाया जा सकता।

इन विरुद्ध परिस्थितियोंके उपस्थित होनेपर पहले शरीरको भोक्ता माननेवाले लोकायतसे—नास्तिकसे—पूछना चाहिए कि क्या अलग-अलग (प्रत्येक) भूत भोग करते हैं? अथवा सब मिले हुए भूत भोग करते हैं? प्रथम पक्षमें सबका एक साथ भोग करना तो नहीं बन सकता, कारण कि एक साथ (क्रमके बिना) भोगके लिए अपने-अपने अभीष्टके साधनमें प्रवृत्त हुए भूतोंका परस्पर अङ्गाङ्गिभाव न होनेके कारण उनका संघात ही नहीं हो सकता। [जुदे-जुदे

संघातापत्त्यभावप्रसङ्गात् । [न चाऽन्तरेणाऽङ्गाङ्गिभावं संघातस्योपपत्तिः ।] अन्तरेण च संघातं भोक्तृत्वे देहाद्बहिरप्येकैकस्य भूतस्य भोक्तृतोपलभ्येत । नाऽपि क्रमेण तेषां भोक्तृत्वम्, संघातानुपपत्तितादवस्थ्यात् । न च वरविवाहादिन्यायेन गुणप्रधानभावेन तदुपपत्तिः, वैषम्यात् । यथा एकैकस्य वरस्याऽसाधारणत्वेनैकैका कन्या भोग्या, न तथा चतुर्णां पृथिव्यप्तेजोवायूनां भोक्तॄणां रूपरसगन्धस्पर्शा भोग्या व्यवस्थिताः तत्र कथं क्रमभोगः ? अथ कथंचिद्व्यवतिष्ठेरन्, तदाऽपि युगपत् सर्वविषयसंनिधाने सति क्रमानु-

---

अपने-अपने कामोंमें लगे रहनेकी दशामें मिलकर एक कार्यका करना सम्भव नहीं होता, यह भाव है]। [अङ्गाङ्गिभावके बिना संघातका सम्भव नहीं हो सकता], [क्योंकि अङ्गाङ्गिभावको प्राप्त हुए तिनके ही संघातरूप रज्जुभावको प्राप्त होते हैं]। यदि संघातके बिना भी एक-एक भूत भोक्ता मान लिया जाय, तो शरीरके बाहर भी एक-एक भूतमें भोक्तृत्वकी प्रसक्ति होगी। और क्रमसे भी प्रत्येक भूतोंको भोक्ता नहीं मान सकते, कारण कि ऐसा माननेपर भी संघातकी अनुपपत्ति तो वैसी ही बनी रह जाती है। [क्योंकि एक साथ अथवा जुदे-जुदे अपने-अपने कार्यके साधनमें प्रवृत्त हुए पदार्थोंका अङ्गाङ्गिभाव न होनेसे संघात कैसे हो सकेगा]। वर-विवाह आदि न्यायका अनुसरण करके गुण-प्रधानभाव (अङ्गाङ्गिभाव) से भी संघातकी उपपत्ति नहीं हो सकती, कारण कि दृष्टान्त और दार्ष्टान्तिकमें विषमता है। [दृष्टान्तभूत वरविवाहन्यायका विवेचन करते हैं—] जैसे एक-एक वरके लिए असाधारणरूपसे (जिसमें दूसरेके सम्बन्धका लेश भी प्राप्त न हो, इस रूपसे) एक-एक कन्या भोग्यभूत वस्तु है, वैसे ही भोग करनेवाले पृथिवी, जल, तेज और वायुके लिए एक-एक रूप, रस, गन्ध और स्पर्श व्यवस्थित—नियत—भोग्यवस्तु नहीं है अर्थात् भूतोंके विषय नियत नहीं हैं। [अतएव पृथ्वीमें रूप, रस आदिकी भी उपलब्धि होती है। आकाश केवल शब्दगुणक है, इसलिए आकाशका तो शब्द असाधारण गुण हो सकता है, परन्तु अन्य वायु आदि चार भूतोंमें उत्तरोत्तर गुणोंकी वृद्धि होनेसे स्पर्शादि भोग्य वस्तु असाधारण नहीं मानी जा सकती, इसलिए असाधारण-विषयमें वर-कन्याके समान नियत व्यवस्था नहीं हो सकती]। यदि कथंचिद् रूप आदि विषयोंमें व्यवस्था

पपत्तिः। यथैकस्मिन् मुहूर्ते प्रत्येकं भोग्यकन्यावस्तुनि संनिहिते वराणां क्रमविवाहो गुणप्रधानतया संघातो वा नाऽस्ति, तद्वत्। नाऽपि समस्तानां भोक्तृत्वसंभवः, प्रत्येकमविद्यमानस्य चैतन्यस्य संघातेऽप्यभावाद्भोगानुपपत्तेः। अथ मन्यसे—अग्नौ प्रक्षिप्तेषु तिलेष्वेकैकस्य ज्वालाजनकत्वाभावेऽपि तिलसमूहस्य यथा तज्जनकत्वं तथा संघातस्य चैतन्यं स्यादिति, तदाऽपि संघातापत्तौ हेतुर्वक्तव्यः। आगामिभोगादिति चेद्, न; यदि तावद्भोगस्य गुणभावस्तदा प्रधानानां भूतानामन्योन्यं गुणप्रधानभाव-

---

मानी भी जाय, [यद्यपि रूपादि साधारण हैं, तथापि व्यवस्था हो सकती है कि तेजका रूप ही भोग्य है तथा वायुका स्पर्श ही, पृथ्वीका गन्ध ही और जलका रस ही भोग्य है] तो भी एक साथ सब विषयोंकी उपस्थिति होनेपर क्रमकी उपपत्ति नहीं हो सकती, [अर्थात् एक ही क्षणमें सभी भोक्ता अपने-अपने भोग्यका भोग करेंगे; क्रमकी अपेक्षा क्यों होगी ?] जैसे एक ही मुहूर्तमें प्रत्येक कन्यारूप भोग्यवस्तुका सन्निधान होनेपर वरोंका क्रमसे विवाह अथवा गुणप्रधानभाव—अङ्गाङ्गिभाव—से संघात नहीं होता वैसे प्रकृतमें भी [भूतोंका क्रमसे भोग अथवा गुणप्रधानरूपसे संघात नहीं हो सकता। और प्रकृतमें गुणप्रधानभाव मानकर संघातकी सिद्धि करना आवश्यक है, इससे दृष्टान्त तथा दार्ष्टान्तिकमें समानता नहीं आ सकती]। और दूसरे पक्षका (मिले हुए भूत भोग करते हैं, इसका) भी सम्भव नहीं है, कारण कि प्रत्येकमें न रहनेवाले चैतन्यका (भोगकर्तृत्वका) संघातमें भी अभाव होनेसे भोगकी उपपत्ति नहीं हो सकती। यदि माना जाय कि आगमें डाले गये तिलोंमें से एक-एक तिल द्वारा ज्वालाकी उत्पत्ति न होनेपर भी तिलसमूहमें जैसे ज्वालाका जनकत्व है अर्थात् तिलसमूहसे जैसे ज्वालाकी उत्पत्ति होती है, वैसे ही प्रकृतमें भी प्रत्येक भूतमें भोक्तृत्वके न होनेपर भी उसके संघातमें भोक्तृत्वरूप चैतन्यका सम्भव होगा, तब भी संघातके होनेमें हेतु कहना होगा। [संघातात्मक शरीरके अतिरिक्त चेतन पदार्थ लोकायतके मतमें है ही नहीं, जो प्रत्येक अचेतनभूतका चेतनात्मक संघात उत्पन्न कर दे, इसलिए उसका कोई कारण कहना होगा यह तात्पर्य है]। आगे प्राप्त होनेवाले भोगके द्वारा भी संघात नहीं माना जा सकता [अर्थात् आगामी भोगको भी संघातका कारण नहीं मान सकते] कारण कि यदि भोगको गुण (अप्रधान) मानो, तो प्रधानरूपसे माने

रहितानां कथं संघातापत्तिः ? प्राधान्यं तु भोगस्याऽनुपपन्नम् , भोक्तृशेषत्वात् । न च वाच्यं शेषिणं भोगं प्रति शेषभूतयोः स्त्रीपुंशरीरयोर्भोक्त्रोः संघातापत्तिर्दृष्टेति, तत्राऽपि शरीरयोर्भोक्तृत्वासंप्रतिपत्तेः । ज्वालां प्रति तिलानां संघातापत्तिरिति योऽयं दृष्टान्तः, सोऽपि तवाऽसिद्धः; संघातानिरूपणात् ।

गये परस्पर गुणप्रधानभावसे शून्य पृथ्वी आदि भूतोंका संघात कैसे हो सकेगा ? [अर्थात् भोग्यस्वरूप गन्धादि गुणके प्रति प्रधानभूत पृथ्वी आदि, परस्पर निरपेक्ष होनेसे, संघातभावको प्राप्त नहीं हो सकते याने स्वतन्त्र होनेसे अपने अधीन भोग्यका भोग स्वयं आप ही कर लेंगे] और भोग्यवस्तुस्वरूप रूपादिका प्राधान होना तो माना ही नहीं जा सकता, कारण कि भोग्य तो भोक्ताका उपकारक अङ्ग है ।

[भोक्ताओं तथा भोगमें गुणप्रधानभाव न होनेके कारण ही संघातकी उपपत्तिका अभाव नहीं कह सकते, क्योंकि तादर्थ्यसे शेषशेषिभावको लेकर संघातकी उपपत्ति हो सकेगी; इस प्रकारके वादीके आशयका खण्डन करनेके लिए शङ्काका अनुवाद करते हैं—]

शङ्का—शेषीरूप भोगके प्रति भोग करनेवाले शेषभूत स्त्री तथा पुरुषके शरीरोंका संघात होते हुए देखा जाता है, [शरीरके बिना भोग अनुपपन्न है, क्योंकि शरीरका लक्षण है कि 'भोगायतनं शरीरम्', इसलिए शरीरको भोगके प्रति शेष (उपकारक) मानना ही पड़ेगा । इसलिए जैसे एकके प्रति शेष होनेसे छः प्रयाजोंका संघात होता है, वैसे ही एक ही भोगके प्रति पांचों भूतोंका भी संघात उपपन्न हो सकता है, यह भाव है ।]

समाधान—स्त्री तथा पुरुषके शरीरोंको भोक्ता मानना सभी प्रकारके सिद्धान्तोंसे सिद्ध नहीं है, [क्योंकि हमारे ही मतमें स्त्री-पुरुषोंके शरीरोंमें आत्मा ही भोक्ता है और शरीर केवल भोगार्थ होनेसे आत्माका ही शेष है, इससे आपके समान भोक्तास्वरूप शरीरोंका संघात नहीं माना जा सकता] और तुम्हारे (लोकायतके) द्वारा दिखलाया हुआ जो ज्वालाके प्रति तिलोंका संघातरूपी दृष्टान्त है, वह भी सिद्ध नहीं है, कारण कि संघातका निर्वचन ही नहीं हो सकता ।

न तावत् संघातो नाम भोगभोगिनोर्वनवदेकदेशतामात्रम्, तथा सति तेन न्यायेन व्यापिनां भूतानां सर्वत्र तत्सत्त्वाच्चैतन्यभोगयोः सार्वत्रिकत्वप्रसङ्गात्। नाऽपि तदारब्धोऽवयवी संघातः, तस्य भूतेभ्यो भेदे पञ्चमतत्त्वाभ्युपगमप्रसङ्गात्। अभेदे भूतमात्रतया संघातासंभवात्। भेदाभेदयोश्चाऽनङ्गीकरणात्। अथाऽवयविनः पारतन्त्र्यान्न पञ्चमतत्त्वापत्तिः, तर्हि जलादेः पृथिव्यादितन्त्रत्वान्न तत्त्वचतुष्टयमपि सिध्येत्। न चैक-

---

[जैसे अनेक वृक्षोंका एक देशमें उगना ही उनका संघातभूत वन कहलाता है, वैसे भोग और भोक्ताका समानाधिकरणत्व ही संघात है, इस प्रकारके वादीके आशयसे कहते हैं कि] वनके समान भोग और भोगीका एक देशमें होना ही तो सङ्घात है ? नहीं, वह भी संघात नहीं माना जा सकता, क्योंकि ऐसा मान लेनेसे तो इस न्यायसे (अर्थात् एकदेशस्थताको ही संघात माननेकी नीतिसे) व्यापकस्वरूप पृथ्वी आदि भूतोंकी (शरीरके बाहर भी) एकदेशस्थता सर्वत्र विद्यमान ही है, इसलिए चैतन्य और भोगका सभी जगह प्रसङ्ग आ जायगा। और उन अवयवोंसे (भूतोंसे) एक अवयवीका होना भी संघात नहीं कहा जा सकता, कारण कि उस अवयवीका यदि (अवयवरूप) भूतोंसे भेद माना जाय तो 'अवयवीरूप' पांचवां तत्त्व माननेका प्रसङ्ग आ जायगा। [लौकायतिक केवल पृथ्वी, जल, तेज और वायु, इस प्रकार चार ही तत्त्व मानता है। उनसे बने हुए शरीररूपी अवयवीको उनसे भिन्न माननेपर उसे पांचवां तत्त्व मानना पड़ेगा, इससे स्वयं अपसिद्धान्त दोषका भागी होगा, यह सारांश है]। और यदि भेद नहीं मानते, तो शरीर चार प्रकारके भूत ही रहे, अतः अतिरिक्त संघातकी सिद्धि ही नहीं हुई। और भेद तथा अभेद दोनोंको तो तुम मानते नहीं हो ['सुवर्णका कुण्डल है तथा कुण्डल सुवर्ण है'—इन दोनों प्रतीतियोंसे सुवर्ण तथा कुण्डल दोनोंमें भेदाऽभेदस्वरूप तादात्म्य माना जाता है, इसमें भेद काल्पनिक और अभेद परमार्थ है, ऐसा तादात्म्य नास्तिक नहीं मानता]। यदि कहो कि अवयवी अवयवोंके पराधीन है, इसलिए अवयवसे अतिरिक्त पांचवाँ तत्त्व माननेकी आपत्ति नहीं आ सकती, तो जलादिके भी पृथ्वी तत्त्वके पराधीन होनेसे आपके सम्मत चार तत्त्व भी सिद्ध नहीं हो सकेंगे, [क्योंकि यदि अवयवीमें अवयव-भेद प्रतीतिरूप पराधीनता मानी जाय, तो जलादिमें भी पृथ्वी-भेद-प्रतीतिरूप

द्रव्यबुद्ध्यालम्बनयोग्यतापत्तिः संघातः, वस्तुतोऽनेकेष्वेकत्वबुद्धेर्विभ्रममात्रत्वात्। न चैकार्थक्रियायां युगपदन्वयः संघातः, तदानीं काष्ठाश्रयेण वह्निना वायुसमुद्धतेन जले ताप्यमाने सति तत्र भूतचतुष्टयसंघाताद्भोगप्रसङ्गात् । न चाऽन्ययःपिण्डवत् संश्लेषः संघातः, शरीरे वायोस्तथा संश्लेषाभावात्। वह्निव्याप्ते चाऽयःपिण्डे सन्तापितजले वायुसंयुक्ते भोगप्रसङ्गात् । न चोक्तदोषपरिहारायैकस्यैव भूतस्य भोक्तृत्वनियतिः शङ्कनीया, सर्वसंनिधानेऽस्यैव भोग इत्यनिर्द्धारणात् ।

पराधीनता विद्यमान ही है। और दूसरे अवयवोंसे बननारूप पराधीनता मानो, तो पृथ्वी भी जलसे बनी है। इसलिए पृथ्वीमें भी उक्त पराधीनता चली गई, इस परिस्थितिमें तुम्हारे अभिमत चार तत्त्व दिवंगत ही हो चुके, यह भाव है।] तथा 'यह एक द्रव्य है' इस बुद्धिमें विषय होनेकी योग्यता ही संघात पदार्थ है, ऐसा भी नहीं कह सकते, कारण कि परमार्थतः अनेक पदार्थोंमें एक बुद्धिका होना केवल भ्रम है [भ्रमात्मक बुद्धिमें कार्यकारित्व नहीं रहता, इसलिए भ्रमविषय संघातमें भी भोक्तृत्व नहीं हो सकता, यह तात्पर्य है] और एक ही अर्थक्रियामें (प्रमातृत्व आदि व्यवहारमें) सबका एक साथ अन्वय होनेको भी संघात नहीं कह सकते हैं, कारण कि ऐसा माननेसे वायुसे सुलगी हुई लकड़ीकी आगसे गरम किये गये जलमें चारों भूतोंका संघात होनेसे उसमें भी भोगका प्रसङ्ग हो जायगा। वैसे अग्नि और लोहेके गोलेके सम्बन्धके समान सम्बन्धको (सर्वावयवसे एकरस-व्याप्तिको) भी संघात नहीं मान सकते, कारण कि शरीरमें वायुका आग और लोहेके समान सम्बन्ध (एक-एक अवयवमें समानरूपसे व्याप्ति) नहीं है। [दूसरा दोष भी देते हैं—] जिसने जलको तपाकर अपनेमें ही सुखा लिया हो और वायु भी उसपर लगता हो, ऐसे गरम लोहपिण्डमें (चारों भूतोंका संघात होनेसे) भोगप्राप्तिका प्रसङ्ग होगा [परन्तु तप्तायःपिण्डमें भोग देखा नहीं जाता है, इसलिए भोगका समवायी कारण संघातरूप शरीर नहीं हो सकता] उक्त दोषके परिहारके लिए कहो कि एक ही भूत भोक्ता है, तो यह भी नहीं कह सकते, कारण कि सबके संनिधानमें, यह इसका भोग है, इस प्रकार निश्चय नहीं किया जा सकता [रूप, रस, गन्ध और स्पर्श-रूप भोग्य वस्तु और भोगान्वयी चारों

यत्तु लौकायतैकदेशिनां मतद्वयम्—इन्द्रियाणां भोक्तृत्वं देहेन्द्रियसंघातस्य च भोक्तृत्वमिति, तदुक्तन्यायेन निराकरणीयम्।

ननु कानि पुनरिन्द्रियाणि येषां भोक्तृत्वं निराक्रियते। तत्र गोलकमात्राणीति सुगताः, तच्छक्तय इति मीमांसकाः, तद्व्यतिरिक्तानि द्रव्यान्तराणीत्यन्ये सर्वे वादिनः।

न तावद्गोलकमात्रत्वं युक्तम्, कर्णशष्कुल्यादिविरहिणामपि सर्पादीनां शब्दाद्युपलब्धिसद्भावात्। वृक्षाणां च सर्वगोलकरहितानां विषयोपलम्भसत्त्वात्, 'तस्मात् पश्यन्ति पादपाः' इत्यादिशास्त्रात्। न च वृक्षाणामचेतनत्वम्, हिंसाप्रतिषेधेन प्राणित्वावगमात्। अत एव न गो-

---

भूतोंके भी उपस्थित रहनेमें कौन किसका भोग है, इसका नियामक कोई नहीं है, इसलिए अविशेषसे चारोंको भोक्ता मानना होगा और उनका संघात बन नहीं सकता, इसलिए संघातभूत शरीरात्मक भूतोंको भोक्ता मानना युक्तिसंगत नहीं है, यह तात्पर्य है।]

और भी लोकायत-मतके एकदेशियोंके जो ये दो मत हैं कि इन्द्रियां भोक्ता हैं अथवा देहेन्द्रियका संघात भोक्ता है। इन दोनों मतोंका दिखलाये गये न्यायके अनुसार खण्डन करना चाहिए।

[इन्द्रियोंमें भोक्तृत्वका खण्डन करनेके पहले इन्द्रियविषयक विप्रतिपत्ति दिखलानेके लिए प्रश्न करते हैं—] इन्द्रियां कौन पदार्थ हैं? जिनमें भोक्तृत्वका खण्डन किया जा रहा है। इस विषयमें बौद्ध कहते हैं कि गोलकमात्र [अर्थात् शरीरमें दीख पड़नेवाले आंख, नाक, कान आदिके तत्-तत् आकार] ही इन्द्रियाँ हैं। मीमांसक आकारोंमें देखने, सुनने आदिकी शक्तियोंको ही इन्द्रिय मानते हैं और इतर सभी लोग इन दोनोंसे अतिरिक्त द्रव्यान्तर ही इन्द्रिय है, ऐसा मानते हैं।

[बौद्धका खण्डन करते हैं—] गोलकको ही इन्द्रिय मानना उचित नहीं है, कारण कि कर्णशष्कुली (कानके भीतर एक विशेष प्रकारके छेद) आदिसे शून्य सर्प आदिको भी शब्दादि विषयोंका प्रत्यक्ष होता है और किसी भी इन्द्रियका गोलक न होनेपर भी वृक्षादिको सम्पूर्ण विषयोंकी उपलब्धि होती है, क्योंकि 'इससे वृक्ष भी देखते हैं' ऐसा शास्त्र कहता है। वृक्षोंको चेतनारहित नहीं मान सकते, क्योंकि शास्त्रोंमें उनकी हिंसाका निषेध है,

लकशक्तित्वमिन्द्रियाणाम् । अथ शक्तिमद्द्रव्यान्तरकल्पनात् प्रतिपन्नस्थानेषु शक्तिमात्रकल्पने लाघवं मन्यते, तर्ह्यत्यन्तलाघवादात्मन एव क्रमकारिसर्वविज्ञानसामर्थ्यं कल्पय्यताम्, किमेभिरिन्द्रियैः ? न च सर्वगतस्याऽऽत्मनो गोलकप्रदेशेष्वेव ज्ञानपरिणामोऽनुपपन्नः, त्वया तस्यैव शरीरप्रदेशमात्रे ज्ञानपरिणामाङ्गीकारात् । एवं चाऽनिन्द्रियेष्वपि गोलकप्रदेशेषु ज्ञानान्वयव्यतिरेकौ शरीरद्रव्यान्यथासिद्धौ, ततो न मीमांसकमतमुपपन्नम् । सन्तु तर्हि द्रव्यान्यराणीन्द्रियाणि, तानि च गोलकविशेषसंबन्धाचक्षुरादि-

---

अतः 'वृक्षोंमें प्राण है' ऐसा प्रतीत होता है । इसी कारण गोलककी शक्तियोंको भी इन्द्रिय नहीं मान सकते [क्योंकि उससे भी सर्प अथवा वृक्षादिमें व्यभिचार बना ही रह जायगा] यदि कहो कि शक्तिशाली द्रव्यान्तरकी कल्पनाकी अपेक्षा सर्वसम्मत नाक, कान आदि आकारविशेषवाले स्थानोंमें केवल शक्तिकी कल्पना करनेमें लाघव है, तो इसपर यह कहा जा सकता है कि शक्तिकी अपेक्षा अधिक लाघव होनेसे आत्मामें ही क्रमके उत्पादक सर्वविज्ञानके सामर्थ्यकी ही कल्पना करो, इन (विप्रत्तिपत्तिग्रस्त) इन्द्रियोंकी कल्पना करनेसे क्या फायदा है ?

शङ्का—सर्वत्र व्याप्त आत्माका केवल गोलक-प्रदेशमें ज्ञानरूप परिणाम मानना युक्त नहीं है ।

समाधान—तुम भी उस सर्वगत आत्माका शरीरप्रदेशमें ही ज्ञानरूप परिणाम मानते हो । [अर्थात् 'यश्चोभयोः समो दोषः परिहारस्तयोः समः' इत्यादि न्यायसे जैसे तुम्हारे मतमें सर्वत्र व्याप्त होनेपर भी आत्माका शरीरसे बाहर ज्ञानाकार परिणाम नहीं हो सकता, केवल शरीरमें ही हो सकता है, वैसे ही मेरे मतमें भी गोलकमात्रमें ज्ञानाकार परिणामकी प्राप्ति असङ्गत नहीं हैं] इस रीतिसे इन्द्रियसे भिन्न होनेपर भी गोलकोंमें ज्ञानका अन्वय-व्यतिरेक तो शरीररूप द्रव्यके कारण अन्यथासिद्ध है । [अर्थात् सर्वव्यापी आत्माका जैसे इन्द्रियभिन्न शरीरके साथ ज्ञानान्वय-व्यतिरेक है, वैसे ही गोलकोंके साथ भी है, इन अन्वय-व्यतिरेकोंसे गोलकोंका या इनकी शक्तियोंका चेतनात्मक इन्द्रिय होना सिद्ध नहीं हो सकता] इससे मीमांसक मत सङ्गत नहीं है, यह स्पष्ट है । तब तो अन्य वादियोंका सिद्धान्त—'द्रव्यान्तर ही इन्द्रियाँ हैं और वे उस गोलकके

शङ्का—यदि माना जाय कि तुम्हारे वेदान्तीके मतमें भी यदि उस निमित्तका क्रमशः कार्य करना स्वभाव है, तो स्वभाववाद सिद्ध हुआ [इससे अन्तर्गडु निमित्तान्तर मानना अधिक हुआ]। यदि उसमें दूसरे निमित्तकी अपेक्षा है, तो अनवस्था दोष आ जाता है। [क्योंकि नियामक निमित्तान्तरोंकी अन्वेषणपरम्परा लगी ही रहेगी]। और यदि कालभेदसे उस निमित्तकी क्रमसे कार्य उत्पन्न करनेकी अवस्था मान भी ली जाय, तो भी वह कालक्रम यदि स्वभावसिद्ध है, तो पुनः वही स्वभाववाद आ जाता है। यदि दूसरे निमित्तकी अपेक्षा मानी जाय, तो अनवस्था दोष बना ही है।

समाधान—नास्तिकका उक्त आरोप उचित नहीं है, कारण कि इस अवस्थाका प्रतिपादन करनेसे क्या प्रयोजन? [अर्थात् हमारे ऊपर आरोप करना कि निमित्तकी क्रमशः कार्य करनेवाली अवस्थाका निरूपण नहीं किया जा सकता, यह उचित नहीं है] हमें तो पूछना है कि वस्तुओंकी—पदार्थोंकी—सामर्थ्य दूसरे निमित्तकी अपेक्षा नहीं रखती है, ऐसा कहा जा रहा है? [अर्थात् वस्तु अपने कार्यकरस्वरूप सामर्थ्यके लिए दूसरेकी अपेक्षा नहीं रखती, क्योंकि वस्तुसामर्थ्य स्वतः-सिद्ध है] अथवा कार्य करनेके लिए वस्तुसामर्थ्यके रहते दूसरे निमित्तका अनुसरण करना व्यर्थ है? [इन दोनों प्रकारोंमें कौनसा स्वभाववादी तुम्हारा मत है?] प्रथम कल्प तो माना ही गया है। [क्योंकि वस्तुसामर्थ्य दूसरे हजार निमित्तोंसे भी नहीं उत्पन्न हो सकती, सहस्र प्रयत्न करनेपर भी सिकतासे तैल नहीं पा सकते] दूसरे पक्षमें भी प्रश्न होता है कि क्या कार्यको अपनेसे दूसरे निमित्तकी अपेक्षा रखना प्रतीत नहीं होता? अथवा प्रतीत होता हुआ भी उसका निरूपण

किं वा प्रतीतमपि दुर्निरूपमिति ? नाऽऽद्यः, प्रत्यक्षविरोधात् । घटमारभमाणस्य कुम्भकारस्य दण्डचक्राद्यपेक्षायाः प्रत्यक्षसिद्धत्वात् । न द्वितीयः, सर्वानिर्वाच्यत्ववादिनो दुर्निरूपत्वस्याऽलंकारत्वात् । भूतचतुष्टयमेव तत्त्वं प्रत्यक्षमेवैकं प्रमाणं स्वभाववाद एव पारमार्थिक इति मन्यमानस्य तत्र प्रतिज्ञातार्थे हेतूपन्यासे सनिमित्तत्वप्रसङ्गः । अनुपन्यासे च प्रतिज्ञातार्थासिद्धिः । प्रतीतिमात्रशरणत्वे चाऽनिर्वचनीयवादापातः । तदेवं वस्त्वन्तरस्य कारणत्वसम्भावनानिराकरणे पारिशेष्यादस्मदुक्तः सर्वज्ञः सर्वशक्तिरीश्वर एव कारणमित्येतादृशी युक्तिरपि ब्रह्मस्वरूपनिर्णयायाऽनेनैव सूत्रेण तन्त्रेणाऽऽवृत्त्या वा सूत्रितेति द्रष्टव्यम् । अनया च युक्त्या यथोक्तब्रह्मसंभावनायां पश्चादागमेन तत्साधयितुं शक्यम् । यथाऽऽहुः—

नहीं किया जा सकता ? इनमें प्रथम पक्ष युक्त नहीं है, कारण कि इसके माननेमें प्रत्यक्षसे विरोध आता है, क्योंकि घटको रचनेवाले कुलाल—कुम्हार—को दण्ड, चक्र आदिकी अपेक्षा प्रत्यक्ष दीखती है । दूसरा पक्ष नहीं माना जा सकता, कारण कि विश्व भरके सभी पदार्थोंको अनिर्वचनीय कहनेवाले वेदान्तीके मतमें उसका निरूपण न हो सकना तो अलङ्कार ही है । [कार्यको निमित्तानपेक्ष माननेमें और भी दोष देते हैं—] चार भूत—पृथ्वी, जल, तेज और वायु—ही पदार्थ हैं, एक प्रत्यक्ष ही प्रमाण है, स्वभाववाद पारमार्थिक—सत्य सिद्धान्त—है, इस प्रकार सिद्धान्त माननेवाले तुम यदि अपने प्रतिज्ञात विषयकी पुष्टिमें हेतु दिखलाते हो, तो वस्तुकी सिद्धिमें निमित्तसहित होनेका प्रसङ्ग होगा । यदि हेतु नहीं दिखलाया जाता, तो अपने प्रतिज्ञात अर्थकी सिद्धि नहीं हो सकती । यदि केवल प्रतीतिके बलका आधार लिया जाय, तो अनिर्वचनीयवादका मानना ही हो जाता है । इस प्रकार ब्रह्मसे दूसरी वस्तुके कारण होनेकी सम्भावनाका निराकरण—खण्डन—हो जानेसे अन्तमें हमारे सिद्धान्तके अनुसार सर्वज्ञ और सर्वशक्तिमान् ईश्वर ही संसारका कारण हैं, इस प्रकारकी युक्ति भी ब्रह्मस्वरूपका निर्णय करनेके लिए इसी सूत्रसे तन्त्र अथवा आवृत्तिके द्वारा दिखलाई गई है, यह समझना चाहिए । इस युक्तिके द्वारा कथितके अनुसार ब्रह्मकी सम्भावना सिद्ध होनेके अनन्तर शास्त्र द्वारा उसकी सिद्धि हो सकती है । जैसा कि शास्त्रकारोंने कहा है—

'सम्भावितः प्रतिज्ञायां पक्षः साध्येत हेतुना ।
न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः ॥' इति ।

नन्वनुमानादेव यथोक्तेश्वरसिद्धौ किमाभ्यां युक्त्यागमाभ्याम् । न च सत्यागमेऽनुमानप्रयासवैयर्थ्यमिति वाच्यम्, 'यतो वा' इत्याद्यागमस्याऽनुमानसिद्धार्थानुवादकत्वात् । अनुमानं चैवं प्रयोज्यम्—विमतं जगद् उपादानोपकरणाद्यखिलाभिज्ञकर्तृकम्, कार्यत्वाद्, गृहवत्, इति वैशेषिकैरुच्यत इति चेद्, नः विमतं जगद्बहुकर्तृकमसर्वज्ञकर्तृकं वेत्यतिप्रसङ्गस्याऽपि तद्वत्सुसाधत्वात् ।

ज्ञानैश्वर्यशक्तय उत्कृष्यमाणाः क्वचित्पर्यवसिताः, उत्कृष्यमाणधर्मत्वात्, परिमाणवत्, इति सांख्या योगाश्च वदन्तीति चेद्, नः निरीश्व-

---

प्रतिज्ञावाक्यमें सम्भावनासे माने गये पक्षका हेतुबलसे साध्ययुक्त होना समर्थित किया जाता है। उस पक्षकी रक्षा अनेक हेतुओंके द्वारा भी नहीं हो सकती जो प्रतिज्ञामें आते आते न ठहर सके [अर्थात् जिसकी सम्भावना ही नहीं है, ऐसे प्रतिज्ञात अर्थकी पुष्टिके लिए हेतुका उपन्यास करना व्यर्थ ही होता है]।

शङ्का—अनुमान द्वारा ही कथित ईश्वरकी सिद्धि हो सकती है, इसके लिए इन युक्ति और शास्त्रोंके उपन्यासकी क्या आवश्यकता है? आगमके रहते हुए अनुमान करनेका प्रयत्न विफल नहीं माना जा सकता, कारण कि 'यतो वा—जिससे कि—' इत्यादि आगम अनुमानसे निर्णीत वस्तुका ही अनुवाद करते हैं। और अनुमानप्रयोग इस प्रकार करना चाहिए—'विमत सभी प्रपञ्च उपादान—समवायी—तथा अन्य निमित्त कारण आदि सब सामग्रीके जाननेवाले कर्तासे रचा गया है, कार्य होनेसे, गृहकी भाँति, ऐसा वैशेषिक कहते हैं।

समाधान—'विमत प्रपञ्च अनेक कर्ताओंसे बनाया गया है, या असर्वज्ञ कर्तासे बनाया गया है, इत्यादि अतिप्रसङ्ग पूर्व अनुमानकी भाँति भली प्रकारसे सिद्ध किया जा सकता है।

'उत्कर्षको प्राप्त होनेवाले ज्ञान, ऐश्वर्य तथा शक्तियां कहींपर चरम-वृद्धिको प्राप्त होकर स्थित होती हैं, उत्कर्ष पानेवाले धर्मयुक्त होनेसे, परिमाणके तुल्य' इस प्रकार कहनेवाले योग तथा सांख्यवादियोंका मत

रवादिनां देवादिभिः सिद्धसाधनत्वात् । सर्वविषयज्ञानैश्वर्यशक्तिमति पर्यवसितत्वसाधनेऽपि गुरुत्वरागद्वेषदुःखादिष्वनैकान्तिकता ।

पुण्यपापफलं कर्म तत्फलाद्यभिज्ञेन प्रदीयते, कर्मफलत्वात्, सेवाफलवत्, इति नैयायिका अनुमिमत इति चेद्, न; देवादिभिरेव सिद्धसाधनत्वात्। अतः संभावनाबुद्धिहेतुत्वेनाऽऽगमोपकारिणीमस्मदुक्तां युक्तिमेवाऽज्ञानाद् वैशेषिकादयोऽनुमानं मन्यन्ते। नहि युक्तिरेवाऽनुमानम्। व्याप्त्याभासोऽनुपपत्त्याभास उदाहरणमात्रदर्शनं चेत्येतत्त्रयं संभावनाबुद्धिजनकत्वेन युक्तिरित्युच्यते, अव्यभिचरितव्याप्तिकमर्थनिश्चायकमनुमानम् । अतो

उचित नहीं है' कारण कि निरीश्वरवादीके मतमें देवादिके कारण सिद्धसाधन आ जाता है। [ईश्वरको न माननेवाले तो देवादिको ही परमैश्वर्यादिशाली मानते हैं, इसलिए ज्ञानादिकी उत्कर्षसीमा ईश्वर ही है, ऐसा सिद्ध नहीं हो सकता] सकल-पदार्थ-विषयक ज्ञान तथा ऐश्वर्य एवं शक्तिशालीमें पर्यवसितत्वका—चरम सीमा होनेका—साधन करनेपर भी गुरुत्व (वजन), राग (प्रेम या आसक्ति), द्वेष (अप्रेम) और दुःख आदिमें व्यभिचार आता है। [उक्त गुण ज्ञानादिके तुल्य उत्कर्षशाली होते हुए भी ईश्वरमें पर्यवसित नहीं हैं]। नैयायिकोंका जो यह अनुमान है कि 'पुण्य और पापके फलोंको कर्म तथा उसके फलको जाननेवाला ही देता है, कर्मफल होनेसे, सेवाके फलोंके सदृश', वह भी साधु नहीं है, क्योंकि देव आदिके द्वारा ही इसमें भी सिद्धसाधन आता है, [क्योंकि देवादि भी कर्म तथा फल दोनोंको जानते हैं और कर्मफल देते हैं]। इसलिए सम्भावनाबुद्धिको उत्पादन करनेसे आगमका उपकार करनेवाली [असम्भावनाके निराकरणसे आगममें प्रामाण्यग्रह करानारूप उपकार है।] हमारी कही हुई युक्तिको ही वैशिषिक आदि अन्य वादी अज्ञानसे—भ्रमसे—अनुमान समझ बैठे हैं। केवल युक्तिको अनुमान नहीं कहा जाता। [दोनोंका भेद दिखलानेके लिए प्रथम युक्तिके स्वरूपका उल्लेख करते हैं—] व्याप्ति-सा मालूम पड़ना और अनुपपत्ति-सा प्रतीत होना और उदाहरणमात्र दिखा देना, इन तीनोंको, सम्भावनाबुद्धिके उत्पादक होनेसे, युक्ति कहते हैं। [अनुमानका स्वरूप कहते हैं—] व्यभिचारशून्य, व्याप्तियुक्त और अर्थका निश्चय करनेवाला अनुमान होता है। इस कारण

वैशेषिकादिप्रयोगाणां सत्यप्यनुमानदोषे श्रुतिसिद्धब्रह्मणि संभावनाबुद्धिहेतुत्वेनाऽस्मदुक्तयुक्तित्वमविरुद्धम् ।

एवं तर्हि युक्तिव्याजेन वैशेषिकाद्यभिमतमनुमानमेव जन्मादिसूत्रे ब्रह्मनिश्चायकत्वेनोपन्यस्तमिति चेद् , अनुमानमात्रात्कारणसद्भावमात्रसिद्धावपि सत्यज्ञानादिरूपस्य ब्रह्मण आगममन्तरेणाऽसिद्धेरागमग्रथन एव सूत्रतात्पर्यात् । आगमवाक्यानि हि वक्ष्यमाणसूत्रैः उदाहृत्य तात्पर्यतो निर्णीयन्ते , ब्रह्मसाक्षात्कारस्य शब्दानुसारिभिन्यायैर्ब्रह्मणि वेदान्तवाक्यतात्पर्यनिर्णयाधीनत्वात् । नह्यनुमानादिप्रमाणान्तरनिर्णेतॄणां वैशेषिकादीनां

वैशेषिक आदि वादियों द्वारा प्रदर्शित अनुमानप्रयोगोंके अनुमानके हेत्वाभासादि दोषोंसे दूषित रहनेपर भी श्रुतिके द्वारा समर्थित ब्रह्मविषयक सम्भावना-बुद्धिके उत्पादनमें हेतु होनेके कारण हम वेदान्तियों द्वारा दर्शाई गई युक्तिको मानना कोई विरुद्ध नहीं है ।

शङ्का—ऐसा माननेसे तो युक्तिके बहाने वैशेषिक आदि वादियोंके सम्मत अनुमान ही जन्मादि सूत्रमें ब्रह्मके निश्चायक प्रमाणरूपसे कहे गये हैं, यह मान लेना चाहिए ।

समाधान—केवल अनुमानोंके द्वारा कारणकी सत्ता ही सिद्ध हो सकती है [अर्थात् अनुमान इतना ही सिद्ध कर सकता है कि इस दृश्यमान कार्य-जात प्रपञ्चका कोई उत्पादक कारण अवश्य है] परन्तु सत्य-ज्ञानादिस्वरूप ब्रह्मकी तो आगम—श्रुति—के बिना सिद्धि नहीं हो सकती । इसलिए जन्मादिसूत्रका तात्पर्य आगमको ही दर्शानेमें हैं [आगमसे ही स्वरूप-निश्चय हो सकता है, अतः 'यतो वा इमानि भूतानि जायन्ते' इत्यादि शास्त्रको ही सूत्रमें जन्मादिपदसे लिया जाना उचित है, अनुमानमात्र नहीं] आगे कहे जानेवाले सूत्रोंमें आगम वाक्योंका उदाहरण देकर तात्पर्यनिर्णय किया गया है, [इसलिए अगले सूत्रोंमें आगम-वाक्योंका उदाहरण देना पुनरुक्त या व्यर्थ नहीं है;] कारण कि ब्रह्मका साक्षात्कार शब्दबोधके अनुकूल (उपक्रमादि) न्यायोंके द्वारा ब्रह्ममें वेदान्तवाक्योंका तात्पर्यनिर्णय करनेसे हो सकता है । केवल अनुमान आदि दूसरे प्रमाणोंसे ब्रह्मनिर्णय करनेवाले वैशेषिक आदि वादियोंको ब्रह्मका साक्षात्कार नहीं देखा गया है । और

ब्रह्मावगतिर्दृश्यते । न चाऽपौरुषेयस्य पौरुषेयमनुमानं मूलमिति युक्तम् । न चैवमनुमानस्याऽत्यन्तानपेक्षा स्यादिति वाच्यम् , श्रुत्यर्थदार्ढ्याय श्रुत्यविरोधिन्यायस्याऽपेक्षितत्वात् । 'पण्डितो मेधावी' इत्यादिश्रुत्यैवाऽऽगमस्य पुरुषबुद्धिसाहाय्यमङ्गीक्रियते, अन्यथाऽध्ययनादेव ब्रह्मावगतौ 'आचार्यवान्पुरुषो वेद' इत्युक्तो गुरूपदेशनियमो व्यर्थः स्यात् । आचार्यो हि श्रुत्यनुसारिभिर्दृष्टान्तैः शिष्येभ्यः प्रत्ययदार्ढ्यमुत्पादयति । तच्च प्रत्ययदार्ढ्यं मननरूपत्वादवगतिहेतुः । एतदेव हि मननं यदाचार्ययुक्त्या स्वयुक्त्या च श्रौतप्रत्ययस्य दार्ढ्यापादनम् । मननस्य चाऽवगतिहेतुत्वं 'मन्तव्यः' इति श्रुत्या सिद्धम् ।

ननु धर्मजिज्ञासायां वेदस्मृतीतिहासपुराणान्येव प्रमाणं नाऽनुमानादि । तत्राऽपि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्या निर्णयहेतवः । पदान्तनिर-

अपौरुषेय (श्रुति) का पुरुषप्रणीत अनुमानको मूल मानना युक्त भी नहीं है । [पुरुषप्रणीत वाक्योंमें पुरुषके रागादि दोषसे दोष आना सम्भव है, अतः पौरुषेय अनुमान सर्वथा दोषशून्य अपौरुषेयमें प्रमाण नहीं हो सकता] । इससे अनुमानकी बिलकुल अपेक्षा नहीं रह जाती, यह भी नहीं कहा जा सकता, कारण कि श्रुतिसे प्रतिपादित अर्थकी पुष्टिके लिए श्रुतिसे विरोध न रखनेवाले न्यायवाक्य—अनुमान—की अपेक्षा रहती है । 'पण्डितो मेधावी' इत्यादि श्रुतिसे ही श्रुतिको पुरुषबुद्धिकी सहायता अपेक्षित है, ऐसा स्वीकार किया गया है । यदि ऐसा न माना गया होता, तो पठनमात्रसे ही ब्रह्मका साक्षात्कार हो ही जाता, फिर 'अचार्ययुक्त पुरुष ही जान सकता है' इत्यादिसे कहा गया गुरुके द्वारा उपदेश पानेका नियम निष्फल हो जायगा । आचार्य—गुरु महाराज—श्रुतिके अनुकूल दृष्टान्तोंके द्वारा शिष्योंके ज्ञानकी दृढ़ता उत्पन्न करा देता है । मननरूप होनेसे वह ज्ञानकी दृढ़ता साक्षात्कारका कारण बनती है । यही तो मनन है कि आचार्य द्वारा दिखलाई गई अथवा अपनी ही मेधासे आहित की गई युक्तिसे श्रुतिसे प्राप्त ज्ञानकी दृढ़ता प्राप्त की जाय । और मननमें साक्षात्कारकारणत्व तो 'मन्तव्य' (मनन करना चाहिए) इस श्रुतिवाक्यसे सिद्ध है ।

शङ्का—धर्मजिज्ञासामें वेद, स्मृति, महाभारत आदि इतिहास तथा पुराण ही प्रमाण हैं, अनुमान आदि दूसरे प्रमाण नहीं हैं । उन श्रुति आदि प्रमाणोंमें भी श्रुति, लिङ्ग, वाक्य, प्रकरण, स्थान और समाख्या रूप न्याय ही तात्पर्यनिर्णयके

पेक्षः शब्दः श्रुतिः। श्रौतस्याऽर्थस्याऽर्थान्तरेणाऽविनाभावो लिङ्गम्। अन्योन्याकाङ्क्षासंनिधियोग्यतावन्ति पदानि वाक्यम् । वाक्यद्वयसामर्थ्यमारभ्याधीतविषयं प्रकरणम्। क्रमवर्त्तिनां पदार्थानां क्रमवर्त्तिभिः पदार्थैर्यथाक्रमं सम्बन्धः स्थानम्। संज्ञासाम्यं समाख्या। तैरेव ब्रह्मनिर्णयोऽप्यस्त्विवति चेद्, नः युक्त्यनुभवयोरपि ब्रह्मजिज्ञासायामपेक्षितत्वात्। युक्त्यपेक्षा पूर्वमेव प्रसाधिता । अनुभवो नाम ब्रह्मसाक्षात्कारफलकोऽन्तःकरणवृत्तिभेदः। न च तमन्तरेण ज्ञानाकाङ्क्षा निवर्त्तते। न च ब्रह्मस्वरूपमनुभवितुमयोग्यमिति शङ्कनीयम्, घटादिवत्सिद्धवस्तुत्वात्। विमतं ब्रह्मवाक्यमनुभवनिरपेक्षफलपर्यन्तज्ञानजनकम्, प्रमाणभूतवेदवाक्यत्वाद्,

---

कारण हैं। इनमें—दूसरे पदकी अपेक्षा न रखनेवाला शब्द ही 'श्रुति' पदका अर्थ है। श्रुतिप्रतिपादित अर्थका दूसरे अर्थके साथ सम्बन्ध लिङ्ग है। परस्पर आकांक्षा (एक-दूसरेके बिना अन्वयाननुभावकता) सन्निधि (विलम्बराहित्य या व्यवधानशून्यत्व) एवं योग्यता (बाधका न होना) वाले पद ही वाक्य कहलाते हैं। दो वाक्योंकी सामर्थ्यको लेकर पढ़ा गया विषय प्रकरण है। क्रमशः आये हुए पदार्थोंका क्रमशः आये हुए पदार्थोंके साथ क्रमके अनुसार होनेवाला सम्बन्ध स्थान पदार्थ है। संज्ञाकी समता समाख्या है। [इन सबका वर्णन विशेष-विशेष उदाहरणोंके साथ प्रथम वर्णकमें किया गया है] इनसे ही ब्रह्मका निर्णय हो जायगा।

समाधान—युक्ति और अनुभव—इन दोनोंकी भी ब्रह्मजिज्ञासामें अपेक्षा रहती है। युक्तिकी अपेक्षा प्रथम ही सिद्ध कर आये हैं। [अनुभवको दिखलाते हैं—] ब्रह्मसाक्षात्कारको उत्पन्न करनेवाली एक प्रकारकी अन्तःकरणकी वृत्ति ही अनुभव है। और इस प्रकारके अनुभवके बिना ज्ञानकी इच्छा निवृत्त नहीं होती [अर्थात् अनुभव—साक्षात्कार—जब तक नहीं होगा, तब तक ब्रह्म-जिज्ञासा बनी ही रहेगी]। और यह भी नहीं कह सकते कि ब्रह्मस्वरूप साक्षात्कारके योग्य नहीं है, कारण कि वह घट आदिके सदृश सिद्ध वस्तु है।

शङ्का—'विमत ब्रह्मवाक्य (ब्रह्मतात्पर्यक वेदान्तवाक्य) अनुभवकी अपेक्षासे शून्य फलपर्यन्त ज्ञानका उत्पादक है, प्रमाणभूत वेदवाक्य होनेसे, धर्म-

धर्मवाक्यवदिति चेद् , न; अनुभवायोग्यविषयत्वोपाधिहतत्वात् । नह्यनुष्ठानसाध्यो धर्मोऽनुष्ठानात्पूर्वं वाक्यबोधावसरेऽनुभवितुं योग्यः । अनुष्ठानं तु विनाऽप्यनुभवं शाब्दज्ञानमात्रादेव सिध्यतीत्यनपेक्षित एव धर्मानुभवः ।

नन्वनुभवयोग्यत्वानुभवसापेक्षत्वाभ्यां विना ब्रह्मणो धर्मेण सह वैषम्यान्तरं नाऽस्ति प्रत्युत वेदप्रमेयत्वं सममेव । ततोऽनुभवकृतवैषम्यमपि मा भूदिति चेद् , न; धर्मब्रह्मणोः कर्तव्यसिद्धयोः पुरुषाधीनत्वानधीनत्वादिभूयोवैषम्यसंभवात् । लोके तावद्देवदत्तोऽश्वेन गच्छति न च गच्छति पद्भ्यां वा गच्छतीति कर्त्तव्यस्य गमनस्य करणाकरणान्यथाकरणेषु पुरुषाधीनत्वं दृश्यते । तथा वेदेऽपि 'अतिरात्रे

प्रतिपादक वेदवाक्योंके समान' । [इस अनुमानसे अनुभवकी अपेक्षाका निराकरण हो जाता है] ।

समाधान—उक्त अनुमान अनुभवायोग्यविषयत्वरूप उपाधिसे दूषित है, [उपाधिमें साधनाव्यापकत्वका समन्वय करते हैं—] अनुष्ठानसे होनेवाला धर्म अनुष्ठानसे पहले वाक्यार्थके बोधकालमें अनुभवके लिए योग्य नहीं है। और अनुष्ठान तो अनुभवके बिना केवल शाब्दबोधसे भी सिद्ध हो सकता है, इसलिए धर्मका अनुभव (धर्मजिज्ञासामें) अपेक्षित ही नहीं है ।

शङ्का—अनुभवके योग्य होना और अनुभवकी अपेक्षा रखना—इन दोनोंसे अतिरिक्त ब्रह्म तथा धर्ममें कोई वैषम्य नहीं है, बल्कि वेदप्रमेयत्व—वेदका तात्पर्यार्थ होना—दोनोंमें समान ही है । अतः उनमें अनुभव द्वारा की गई विषमता भी नहीं होनी चाहिए ।

समाधान—कर्तव्य (क्रियासे उत्पाद्य) तथा सिद्ध (अनुत्पाद्य) स्वरूप धर्म तथा ब्रह्ममें क्रमशः पुरुषके अधीन और पुरुषके अधीन न होना रूप बड़ी विषमता विद्यमान है । [पुरुषाधीनत्वादिका स्पष्टीकरण करते हैं—] लोकमें देखा जाता है कि देवदत्त घोड़ेकी सवारीसे जाता है या नहीं जाता है अथवा पैदल ही यात्रा करता है, इस प्रकार कर्तव्यरूप गमनका करना, न करना या दूसरे ही प्रकारसे करना आदिमें पुरुष स्वाधीन देखा जाता है एवं वेदमें 'अतिरात्रमें

षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णाति' इति करणाकरणे श्रूयेते। 'उदिते जुहोत्यनुदिते जुहोति' इति करणान्यथाकरणे। 'ज्योतिष्टोमेन यजेत', 'न कलञ्जं भक्षयेत्' इति विधिप्रतिषेधौ। 'व्रीहिभिर्यजेत यवैर्वा' इतीच्छाविकल्पः। षड्यागानां समुच्चयः। 'न हिंस्यात्सर्वा भूतानि', 'अग्नीषोमीयं पशुमालभेत' इत्युत्सर्गापवादौ। प्रकृतेरतिदिष्टानां कुशमयबर्हिषां विकृतावुपदिष्टशरमयबर्हिर्भिर्बाधः। प्रकृतानां नारिष्टहोमानां वैकृतैः उपहोमैः समुच्चित्याऽनुष्ठानमभ्युच्चयः। 'उदिते जुहोत्यनुदिते जुहोति' इति शाखाभेदेन व्यवस्थितविकल्पः। न चैवं सिद्धे ब्रह्मणि पुरुषाधीनत्व-विधिप्रतिषेधेच्छाविकल्पसमुच्चयोत्सर्गापवादबाधाभ्युच्चयव्यवस्थितविकल्पादयः संभवेयुः। सिद्धवस्तुन्यपि स्थाणुर्वा पुरुषो वेति विकल्पोऽस्तीति चेत्, नः पुरुषेच्छाधीनत्वेनाऽवस्तुतन्त्रस्य तस्याऽसम्यक्त्वात्। 'योषा

षोडशीका ग्रहण करे अथवा अतिरात्रमें षोडशीका ग्रहण न करे' इस प्रकार करने या न करनेका प्रतिपादन किया गया है। और 'उदय होनेपर हवन करे अथवा उदय होनेसे पूर्व ही हवन करे' इस प्रकार करना तथा अन्यथा करना कहा गया है। 'ज्योतिष्टोम याग करे', 'कलञ्जका भक्षण न करे' ऐसा विधान और निषेध है। 'व्रीहिसे याग करे अथवा यवसे' इस प्रकार इच्छाका विकल्प कहा है। छः यागोंका समुच्चय दिखलाया हैं। 'किसी भी प्राणीकी हिंसा न करे', 'अग्नि और सोम देवताके उद्देश्यसे पशुका बलिदान करे' इस प्रकार उत्सर्ग—सामान्यशास्त्र—तथा अपवाद—बाधशास्त्र—दिखलाये गये हैं। प्रकृति यागमें अतिदेशसे प्राप्त कुशमय बर्हियोंका विकृति यागमें उपदेशसे प्राप्त शरमय बर्हियोंसे बाध होता है। प्रकृत नारिष्टोम होमोंका वैकृत उपहोमोंसे समुच्चय करके अनुष्ठान करना अभ्युच्चय है। 'उदय होनेपर हवन करे अथवा उदय होनेसे पूर्व ही हवन करे' ऐसा शाखाभेदसे व्यवस्थित—नियत—विकल्प कहा गया है। परन्तु उक्त रीतिसे सिद्धवस्तुभूत ब्रह्ममें पुरुषकी स्वाधीनता, विधि या निषेध, इच्छाविकल्प, समुच्चय, उत्सर्ग, अपवाद, बाध, अभ्युच्चय, व्यवस्थितविकल्प आदिका किसी प्रकार सम्भव नहीं है।

शङ्का—सिद्धस्वरूप वस्तुमें भी 'स्थाणु है या पुरुष है' इस प्रकार विकल्प होता ही है।

समाधान—पुरुषकी इच्छाके अधीन होनेसे अवस्तुके द्वारा उत्पन्न हुआ

वाव गोतमाग्निः' इत्यादौ पुरुषेच्छाधीनमवस्तुतन्त्रमेव ध्यानमागमिकं सम्यगुपलभ्यत इति चेद् , नः तस्य कर्त्तव्यगोचरत्वात् । अथाऽपि सिद्धवस्तुनः सम्यग्ज्ञानाधीनत्वात् सम्यग्ज्ञानस्य च प्रमातृपुरुषेच्छाधीनत्वाद्वस्त्वपि पुरुषाधीनं भविष्यतीति चेत् , नः सत्यामपि पुरुषेच्छायामिदं रजतमित्यत्र वस्त्वभावे सम्यग्ज्ञानादर्शनात् । तस्मात्सिद्धगोचरसम्यग्ज्ञानस्य वस्त्वेव प्रधानं प्रयोजकम् । तत्रैवं सति सिद्धगोचरं ब्रह्मज्ञानमपि वस्तुतन्त्रमेवेति न ज्ञानद्वाराऽपि ब्रह्मणः पुरुषाधीनत्वम् । अतो धर्मादत्यन्तं विलक्षणस्य सिद्धस्य ब्रह्मणो युक्ता युक्त्यनुभवापेक्षा ।

ननु ब्रह्मणः सिद्धवस्तुत्वेन घटादिवन्मानान्तरगोचरत्वाज्जन्मा-

---

वह विकल्प उचित ज्ञान नहीं है अर्थात् भ्रम है । यदि शङ्का हो कि 'हे गोतम ! स्त्रीको अग्नि समझो' इत्यादि पुरुषेच्छाधीन अवस्तुतन्त्र ध्यानका ही आगमसे प्रतिपादन किया गया है और वह उचित—प्रमाण—भी माना गया है' तो, यह शङ्का भी उचित नहीं है, कारण कि वह आगमप्रतिपादित ध्यान कर्तव्यका विषय है ।

शङ्का—सिद्धस्वरूप वस्तु भी प्रमाणभूत ज्ञानके अधीन है और प्रामाणिक ज्ञान प्रमाता पुरुषकी इच्छाके अधीन है, इसलिए सिद्ध वस्तुको भी पुरुषके अधीन मान लिया जायगा ।

समाधान—पुरुषकी इच्छाके रहनेपर भी 'यह रजत है' इस स्थलमें रजतरूप वस्तुके न होनेसे सम्यक्—प्रमाणभूत—ज्ञान नहीं देखा जाता है । [अर्थात् शुक्तिमें 'यह रजत है' इस ज्ञानको प्रामाणिक ज्ञान नहीं कहते, बल्कि भ्रम कहते हैं ।] इसलिए सिद्धवस्तुविषयक प्रामाणिक ज्ञानमें प्रधान प्रयोजक वस्तु ही है । इस सिद्धान्तके स्थिर होनेपर सिद्धवस्तुविषयक ब्रह्मज्ञान भी वस्तुके ही अधीन है । [अर्थात् वस्तु उसका भी प्रधान प्रयोजक है,] इसलिए ज्ञानके द्वारा भी ब्रह्मरूप वस्तु पुरुषके अधीन नहीं है । इससे धर्मकी अपेक्षा अत्यन्त भिन्न सिद्धभूत ब्रह्ममें [ब्रह्मसाक्षात्कारमें] युक्ति और अनुभवकी अपेक्षा कहना उचित ही है ।

शङ्का—यदि ब्रह्म सिद्ध वस्तु है; तो घट आदि सिद्ध वस्तुके समान वह

दिसूत्रमनुमानोपन्यासार्थमेवाऽस्त्विति चेद्, मैवम्; न तावद् ब्रह्म वेदान्तानभिज्ञप्रत्यक्षगम्यम्, रूपादिहीनत्वात्। अनुमानमपि किं यत्कार्यं तत्सकारणमिति सामान्यव्याप्तिकम् उत यत्कार्यं तद् ब्रह्मकारणकमिति विशेषव्याप्तिकम्? नाऽऽद्यः, तावता ब्रह्मासिद्धेः। द्वितीयेऽपि ब्रह्मण इन्द्रियविषयत्वेऽनुमानवैयर्थ्यं तदविषयत्वे व्याप्तिग्रहासिद्धिः।

नन्वेवं सत्यनुमानच्छायोपजीवियुक्तीनामपि ब्रह्म गोचरो न स्यात्, सत्यमेवं तथापि शब्दावगम्ये ब्रह्मणि संभावनाबुद्धिहेतवो युक्तयः। तथाहि—मृदादिदृष्टान्तैरुपादानव्यतिरेकेण कार्यस्याऽनिरूपणादद्वितीयता संभाव्यते। स्फटिकलौहित्यदृष्टान्तेनाऽऽत्मनि कर्तृत्वादेरारो-

---

अन्यान्य प्रमाणोंका भी विषय होगा, इस परिस्थितिमें 'जन्मादि' सूत्र अनुमानका उल्लेख करनेके लिए ही है, ऐसा क्यों न मान लिया जाय?

समाधान—सबसे प्रथम तो यही है कि ब्रह्म वेदान्तवाक्योंसे अनभिज्ञ पुरुषके प्रत्यक्षका विषय नहीं हो सकता; कारण कि उस ब्रह्ममें प्रत्यक्षके प्रयोजक रूप आदि नहीं हैं। दूसरा अनुमान रहा, उसे भी क्या 'जो कार्य है उसका कारण अवश्य होता है' इत्याकारक सामान्य-व्याप्ति-घटित मानते हो? अथवा 'जो कार्य है, उसका कारण ब्रह्म है' इस प्रकार विशेष-व्याप्तिघटित मानते हो? प्रथम कल्प साधक नहीं हो सकता, कारण कि उक्त सामान्य-व्याप्तिसे विशेष ब्रह्मकी सिद्धि नहीं हो सकती। दूसरा कल्प माननेमें यदि ब्रह्मको (घटादिके तुल्य) इन्द्रियोंका विषय मानोगे, तो अनुमान करना ही निष्प्रयोजन होगा; यदि इन्द्रियोंका विषय न मानोगे, तो विशेष-व्याप्तिका ज्ञान ही नहीं बन सकता।

शङ्का—उक्त रीतिके अनुसार तो अनुमानकी छायाका (व्याप्त्याभासका) आश्रयण करनेवाली युक्तियोंका भी विषय ब्रह्म नहीं हो सकता।

समाधान—ठीक है, तथापि शब्द—वेदान्तवाक्यों—द्वारा जानने योग्य ब्रह्मके विषयमें युक्तियाँ सम्भावनाबुद्धिको उत्पन्न करती हैं। जैसे कि मिट्टी आदि दृष्टान्तों द्वारा उपादान कारणसे अतिरिक्त कार्यको माननेका खण्डन किया जाता है, इसलिए (कार्य-कारणमें) अद्वितीयता—दूसरेका न होना—अर्थात् अभेदकी ही सम्भावना हो जाती है। और स्फटिक-

पितत्वम् , प्रतिविम्बदृष्टान्तेन जीवब्रह्मैक्यम् , रज्जुसर्पदृष्टान्तेन ब्रह्मव्यतिरिक्तप्रपञ्चस्य स्वातन्त्र्याभावः, घटाकाशदृष्टान्तेनाऽसङ्गताद्वारेण विशुद्धाद्वितीयप्रत्यगात्मता, तप्तपरशुदृष्टान्तेन जीवब्रह्मैक्यसत्यता। तथा च विधिप्रतिषेधवाक्ययोः प्रवर्त्तकत्वनिवर्त्तकत्वाकाङ्क्षितस्तुतिनिन्दार्थवादवत् स्वरूपवाक्यस्य फलपर्यन्ततापेक्षितसंभावनार्थवादतां श्रुतियुक्तयः प्रतिपद्यन्ते। अन्यथा निरर्थकास्ताः स्युः। तस्मादुपकारकयुक्तिसूचनापूर्वकं वेदान्तवाक्यप्रदर्शनार्थमेव सूत्रम् ।

ननु सर्वत्र वेदवाक्ये ब्रह्मपदस्याऽप्रसिद्धार्थत्वान्न तत्पदं स्वार्थं

गत लौहित्यके दृष्टान्तसे आत्मामें कर्तृत्व आदि आरोपित प्रतीत होते हैं, प्रतिविम्बदृष्टान्तसे जीव और ब्रह्मकी एकता दिखलाई जाती है, रज्जुसर्पको दृष्टान्त बनाकर अधिष्ठानभूत ब्रह्मसे अतिरिक्त प्रपञ्चकी स्वतन्त्रताका निराकरण किया जाता है, घटाकाशके दृष्टान्तसे सङ्गराहित्य दिखलाकर विशुद्ध और अद्वितीय प्रत्यगात्माका प्रतिपादन किया जाता है एवं तप्त कुठारके दृष्टान्तसे जीव और ब्रह्मकी एकताका सत्यत्व दिखलाया जाता है। इस प्रकार विधि तथा निषेध वाक्योंमें प्रवृत्त कराने तथा निवृत्त कराने में अपेक्षित स्तुति तथा निन्दारूप अर्थवादके समान स्वरूपवाक्य—सिद्धवस्तुके स्वरूपके प्रतिपादक वेदान्तवाक्य—की फलपर्यन्ततामें अपेक्षित सम्भावनारूप अर्थवादताको श्रुतिमें युक्त युक्तियां प्राप्त हो जाती हैं [विधिवाक्यके श्रवणके बाद अधिकारीको आशङ्का होती है कि इस विधानका फल क्या है ? उस आशङ्काकी निवृत्तिके लिए तथा अधिकारीकी प्रवृत्तिके लिए जैसे विधिवाक्यका प्रशंसात्मक अर्थवाद है, वैसे ही निषेध्यके पालनमें उत्सुकताको उत्पन्न करनेके लिए निषेध्यका निन्दास्वरूप अर्थवाद है। ठीक इसी प्रकार सिद्ध वस्तुके प्रतिपादक वेदान्तवाक्योंकी सार्थकताके लिए तथा सिद्ध वस्तुमें सम्भावनाबुद्धिको उत्पन्न करानेके लिए श्रुतिकथित युक्तियां भी सम्भावनारूप अर्थवाद हैं]। यदि ऐसा न माना जाय, तो वे श्रुति-युक्तियां व्यर्थ हो जायँगी। इसलिए [सम्भावनाबुद्धिको उत्पन्न करानेके लिए] उपकारक युक्तिकी सूचना करता हुआ उक्त सूत्र वेदान्तवाक्योंको दिखलानेके लिए ही है।

शङ्का—सर्वत्र वेदवाक्यमें ब्रह्मशब्दका अप्रसिद्ध अर्थ होनेसे वह

विशेष्यत्वेन विशेषणत्वेन वा वाक्यार्थे समर्पयितुमलम् । ततः किं तद्वेदान्तवाक्यं यत्सूत्रे लिलक्षयिषितमिति । उच्यते—सत्यज्ञानानन्तानन्दप्रत्यगात्मस्वरूपस्य ब्रह्मपदार्थस्याऽप्रसिद्धावपि ब्रह्मत्वमात्रस्य बृहत्यर्थरूपस्य प्रसिद्धत्वात्तदनुवादेन सत्यादिपदार्थपरस्परान्वयसामर्थ्याद्विशिष्टं ब्रह्म प्रतिपत्तुं शक्यत इति लक्षणरूपेण ब्रह्मस्वरूपप्रतिपादनपरं सत्यादिवाक्यम् । न च प्रमाणान्तरसिद्धस्य लक्षणत्वात्सत्यादीनामपि लक्षणत्वे तद्वाक्यस्य प्रमाणान्तरप्रसिद्धार्थानुवादकत्वप्रसङ्ग इति वाच्यम्, अर्थाल्लक्षणत्वेऽपि मानान्तरानवगतब्रह्मबोधकत्वेन साक्षात्प्रमाणरूपत्वात् । वाक्यं तु 'यस्मादाकाशः संभूतः स आत्मा' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्येवं स्वाध्यायपाठक्रममुल्लङ्घ्य योजनीयम्, प्रसिद्धस्य कारणत्वस्याऽ-

---

(ब्रह्मपद) अपने अर्थको प्रधान या अप्रधानरूपसे वाक्यार्थमें नहीं उपस्थित करा सकता । ऐसी परिस्थितिमें कहिए कि वह कौन वेदान्तवाक्य है ? जिसका सूत्रमें उल्लेख कराना अभीष्ट है ।

समाधान—यद्यपि ब्रह्मपदका सत्य, ज्ञान, अनन्त, आनन्द तथा प्रत्यगात्मा रूप अर्थ प्रसिद्ध नहीं है, तथापि 'बृह' धातुका केवल ब्रह्मत्वमात्र अर्थ प्रसिद्ध है, अतः उस प्रसिद्ध अर्थका अनुवाद करके सत्य आदि पदार्थोंके परस्पर अन्वयकी सामर्थ्यसे विशिष्ट ब्रह्म जाना जा सकता है, इसलिए लक्षणके रूपसे ब्रह्मस्वरूपका प्रतिपादन करनेवाला सत्यादि वाक्य है ।

शङ्का—प्रमाणान्तरसे सिद्ध पदार्थ ही लक्षण होता है, इसलिए यदि सत्य आदिको लक्षण मानेंगे, तो उनका बोधक सत्यादिवाक्य ('सत्यं ज्ञानम्' इत्यादि वाक्य) प्रमाणान्तरसे प्रसिद्ध अर्थका अनुवादक हो जायगा ।

समाधान—सत्यादिमें अर्थतः लक्षणत्वके सिद्ध होनेपर भी उसका वाक्य प्रमाणान्तरसे न जाने गये ब्रह्मका बोधक होनेसे साक्षात् प्रमाण माना जाता है, [अनुवादक नहीं । सत्यादि ब्रह्मलक्षण है, यह तो अर्थात् सिद्ध होता है ।] वाक्यका स्वरूप तो 'यस्मात्' इत्यादि अर्थात् जिससे आकाश उत्पन्न हुआ, वह आत्मा सत्य, ज्ञान और अनन्त—परिच्छेदरहित—ब्रह्म है' इस प्रकार स्वाध्यायपाठके क्रमको बदलकर पूरा करना चाहिए, कारण कि प्रसिद्ध कारणका ही अनुवाद होता है । न्याय है कि 'प्रसिद्धका अनुवाद

नुवाद्यत्वात् ; प्रसिद्धमनूद्याऽप्रसिद्धं प्रतिपाद्यत इति न्यायात्। अन्यान्यप्युपनिषद्वाक्यान्येवं ब्रह्मप्रतिपाकत्वेन योजनीयानि । तत्रैवं सति 'भृगुर्वै वारुणिः' इत्यारभ्य 'तद् ब्रह्म' इत्येतदन्तं वाक्यं सूत्रद्वयस्योदाहरणम् । तत्राऽपि 'भृगुः' इत्यादि 'तद्विजिज्ञासस्व' इत्येतच्च प्रथमसूत्रस्य। तत्सूत्रप्रतिपाद्ययोरधिकारनिर्णयज्ञानकर्त्तव्यतयोस्तस्मिन्नुदाहरणेऽनुगमात् । 'तद्विजिज्ञासस्व' इत्येतद्विहाय 'यतो वा' इत्यादि 'तद् ब्रह्म' इत्यन्तं वाक्यं द्वितीयसूत्रोदाहरणम् , तयोः सूत्रवाक्ययोरर्थैक्यानुगमात् ।

ननु जगत्कारणे नानात्वस्याऽपि प्रतीतिरस्ति, यत इति तसिल्प्रत्ययस्य बहुत्वैकत्वयोः स्मरणात्। तथा च तदनुवादेन कथमद्वितीयं ब्रह्माऽत्र प्रतिपादनीयमिति। उच्यते—'येन जातानि' इति वाक्यशेषादेकत्वविषय एव तसिल्प्रत्ययो निर्द्धार्यते। स च प्रत्ययः कारणैकत्वं प्रमापयति।

करके अप्रसिद्धका प्रतिपादन किया जाता है।' दूसरे उपनिषद्वाक्योंकी भी इसी रीतिसे योजना करनी चाहिए [क्योंकि वे भी ब्रह्मके प्रतिपादक हैं।] इस निर्णयके आधारपर 'वरुणका अपत्य भृगु—' इत्याद्यर्थक वाक्यसे आरम्भ कर 'वह ब्रह्म है' यहांतकके उपनिषद्वाक्य दो सूत्रोंके उदाहरण हैं। उनमें भी 'भृगु—' इत्यादि और 'उसका विचार करो' यह वाक्य प्रथम सूत्रका उदाहरण है, कारण कि उस सूत्रके प्रतिपादनीय विषयोंका—अधिकारका निर्णय तथा ज्ञानकी कर्तव्यता, इन दोनोंका—उस उदाहरणमें अनुगम होता है। 'उस ब्रह्मका विचार करना चाहिए' इसको छोड़कर 'यतो वा—' जिससे—इत्यादि वाक्यसे प्रारम्भ कर 'वह ब्रह्म है' इस वाक्य तक दूसरे जन्मादि सूत्रका उदाहरण है, कारण कि उन वाक्योंमें और सूत्रके अर्थमें एकता—समानता—का अनुगम है।

शङ्का—जगत्के कारणभूत पदार्थका नाना होना भी प्रतीत होता है, क्योंकि 'यतः' इस पदमें 'तसिल्' प्रत्ययका बहुत्व और एकत्व दोनों अर्थोंमें समानरूपसे व्याकरण द्वारा विधान होता है, इसलिए उसके (बहुत्वके) अनुवादसे 'यतः' पदसे अद्वितीय ब्रह्मका प्रतिपादन करना कैसे कहा जायगा ?

समाधान—आपके पर्यनुयोगका उत्तर कहा जाता है—'जिससे उत्पन्न हुए—' इस वाक्यशेषसे एकत्वरूप अर्थमें ही 'यतः' पदके 'तसिल्' प्रत्ययका

यद्यपि यत इत्यत्र प्रातिपदिकार्थस्य जगत्कारणमात्रस्याऽनुमानतोऽपि सिद्धेरनुवाद्यत्वं तथापि प्रत्ययार्थस्यैकत्वस्य मानान्तरासिद्धेः प्रत्ययस्य प्रमापकत्वमविरुद्धम् ।

ननु किमेकत्वमत्र लक्षणं किं वा लक्ष्यम् उताऽन्यत् किंचित् ? आद्ये कारणत्वमेकत्वं चेति लक्षणद्वयं ब्रह्मणो व्यर्थं स्यात् । द्वितीयतृतीययोस्तु वाक्यभेदप्रसङ्गः, एकत्वब्रह्माख्ययोर्द्वयोः प्रतिपाद्यत्वादिति चेद्, मैवम्; आद्ये कारणत्वं तटस्थलक्षणमेकत्वं स्वरूपलक्षणं चेत्युभयोः सार्थकत्वम् । द्वितीये कारणमनूद्यैकत्वविशिष्टं ब्रह्म विधीयत इति न वाक्यभेदः । तृतीये तु यत्कारणं तदेकमिति प्रथमं कारणमनूद्यैकत्वं विधाय

तात्पर्य निर्णीत होता है । [यद्यपि 'तसिल्' प्रत्ययका एकत्व और बहुत्व दोनों अर्थोंमें सामान्यरूपसे प्रयोग होता है; तथापि प्रकृतमें अग्रिम 'येन' इस एक-वचनसे 'तसिल्'को एकत्व अर्थमें ही मानना उचित है] । वह एकत्व अर्थमें आया हुआ 'तसिल्' प्रत्यय कारणकी एकताका निश्चय कराता है । यद्यपि 'यतः' इस पदके 'यत्' प्रातिपदिकका केवल जगत्कारणरूप जो अर्थ है, वह अनुमानसे भी सिद्ध हो सकता है; इसलिए उसका 'यत्' प्रातिपदिकसे अनुवाद ही प्राप्त होता है; तथापि प्रत्ययका एकत्वरूप अर्थ दूसरे प्रमाणसे सिद्ध नहीं है; अतः प्रत्ययको उस अर्थकी प्रमाका जनक मानना विरुद्ध नहीं है ।

शङ्का—एकत्व यहाँ लक्षण है ? या लक्ष्य है ? अथवा लक्ष्य और लक्षणसे भिन्न और कुछ है ? प्रथम कल्पमें कारणत्व और एकत्व इस प्रकार ब्रह्मके दो लक्षण व्यर्थ होंगे । दूसरे और तीसरे कल्पमें तो वाक्यभेदका प्रसङ्ग होगा, कारण कि एकत्व तथा ब्रह्म—इन दो लक्ष्योंका उसमें प्रतिपादन करना होगा ।

समाधान—उक्त दोष नहीं है, कारण कि प्रथम पक्ष माननेमें कारणत्व तटस्थ लक्षण होगा और एकत्व स्वरूप लक्षण होगा, इसलिए दोनों लक्षणोंकी सार्थकता सिद्ध होती है । दूसरे पक्षमें कारणका अनुवाद करके एकत्वविशिष्ट ब्रह्मका विधान किया जाता है, अतः उसमें वाक्यभेद होनेका प्रसङ्ग नहीं आ सकता । तीसरे पक्षमें तो जो कारण है, वह एक है, इस प्रकार पहले कारणका अनुवाद करके एकत्वका विधान करनेके अनन्तर जो एक कारण है; वह ब्रह्म है,

पश्चाद्यदेकं कारणं तद् ब्रह्मेति कारणमेकत्वसहितमनूद्य ब्रह्मत्वं बोध्यत इति वाक्यैकवाक्यत्वान्न वाक्यभेदः। तथा च सर्वजगत्कारणस्यैकत्वे सृज्यगोचरज्ञानशक्ती विहाय स्रष्टृत्वासंभवात्सर्वज्ञत्वसर्वशक्तित्वे अप्यस्मिन्नेव वाक्ये कारणस्याऽर्थात्सिद्ध्यतः ।

ननु 'यो गोसदृशः स गवयशब्दवाच्यः' इतिवद्यदेकं कारणं तद् ब्रह्मशब्दवाच्यमिति संज्ञासंज्ञिसम्बन्धपरं वाक्यं प्रतिभाति। तथा सति बृहत्यर्थरूपवस्तु प्रतिपादकं न स्यादिति चेद्, नः 'तद्विजिज्ञासस्व' इति जिज्ञास्यत्वेन प्रतिज्ञाय कीदृशं तदित्याकाङ्क्षायां तद् बृहत्यर्थरूपमिति स्वरूपप्रतिपादनात्। संज्ञासंज्ञिसंबन्धस्त्वार्थिको भविष्यति। एवं च सत्येकं सर्वज्ञं सर्वशक्तिकं सर्वतोऽनवच्छिन्नं च जगत्कारणं तच्च ब्रह्मशब्दाभिधेयमिति वाक्यार्थः संपद्यते ।

इस रीतिसे एकत्वविशिष्ट कारणका अनुवाद करके ब्रह्मत्वका प्रतिपादन किया जाता है, इसलिए वाक्यैकवाक्यतान्यायसे वाक्यभेद नहीं आता । इस रीतिसे जगत्के कारणमें एकत्वके सिद्ध होनेपर सृज्यमान जगत्के ज्ञान और शक्तिके बिना कर्ता द्वारा उसकी रचना असम्भव है, इसलिए कारणकी सर्वज्ञता और सर्वशक्तिमत्ता भी इसी वाक्यमें सिद्ध होती हैं ।

शङ्का—'जो गऊके सदृश आकारवाला है, वह गवयपदका अर्थ है' इसके समान जो एक कारण है, वह ब्रह्मशब्दका वाच्य (अर्थ) है; ऐसा संज्ञासंज्ञिसम्बन्धमें वाक्यका तात्पर्य प्रतीत होता है। परन्तु संज्ञासंज्ञिभावमें उसका तात्पर्य माना जाय, तो 'बृह' धातुके अर्थभूत वस्तुका प्रतिपादक वह वाक्य नहीं होगा ।

समाधान—'उसका विचार करना चाहिए' इस वाक्यसे ब्रह्म जिज्ञासाका विषय है, ऐसी प्रतिज्ञा की गई है, अनन्तर 'वह कैसा है' ऐसी आकांक्षा होनेपर वह 'बृह' धात्वर्थरूप है, इस प्रकार स्वरूपका प्रतिपादन किया गया है। संज्ञासंज्ञिभावरूप सम्बन्ध तो अर्थात् सिद्ध हो जायगा। इस निर्णयके अनुसार जो एक, सर्वज्ञ तथा सर्वशक्तिमान् और किसी प्रकारसे भी अवच्छिन्न न होकर संसारका कारण है; वह ब्रह्मशब्दका वाच्य अर्थ है, ऐसा वाक्यार्थ सम्पन्न होता है ।

ननु निरुपाधिकस्वरूपकथनमन्तरेण सोपाधिकतासर्वज्ञत्वादयो धर्मा न प्रतीयन्ते, यतो यत्सुषिरं तदाकाशं प्रकृष्टप्रकाशश्चन्द्र इतिवत् स्वरूपलक्षणमेव श्रुत्या किंचिद्वक्तव्यम्। ब्रह्मशब्दाभिधेयमेव स्वरूपलक्षणमिति चेद्, नः बृहत्त्वधर्ममात्राभिधानात्। यथा महान् घट इत्युक्ते महत्त्वस्य निरुपाधिः घटो धर्मितया प्रतीयते तथेहाऽपि वक्तव्यम्। सच्छब्दाभिधेयं लक्षणमिति चेद्, नः महासामान्यमात्राभिधानात्। यथा सन्नित्युक्ते घट इत्यवान्तरसामान्यव्यक्तिरपर्यवसानत्वेन महासामान्येनाऽपेक्ष्यते तथेहाप्यवान्तरसामान्यव्यक्तिर्वक्तव्या। ज्ञानमेव बृहत्त्वसर्वज्ञत्वादिधर्मवत्तया निरुपाधिब्रह्मस्वरूपलक्षणमिति चेद्, नः वेदान्तिमते विज्ञानत्वस्य सुखदुःखरागद्वेषापेक्षया महासामान्यरूपत्वेन तत्राऽप्यवान्तरसामान्याधारव्य-

---

शङ्का—उपाधिशून्य स्वरूपके कथनके बिना उपाधिविशिष्टत्व तथा सर्वज्ञत्व आदि धर्मोंकी प्रतीति नहीं हो सकती, कारण कि जो छिद्ररूप है, वह आकाश है, अधिक प्रकाशवाला चन्द्रमा है, इत्यादि वाक्योंके सदृश किसी स्वरूप लक्षणका ही श्रुतिके द्वारा प्रतिपादन होना चाहिए। केवल ब्रह्मशब्दके वाच्य अर्थको स्वरूप लक्षण नहीं मान सकते; क्योंकि ब्रह्मशब्दसे तो केवल बृहत्त्वधर्म वाच्यवृत्तिसे कहा जाता है। जैसे 'बड़ा घड़ा' ऐसा कहनेसे महत्त्वधर्मका उपाधिशून्य घड़ा ही धर्मीरूपसे प्रतीत होता है; वैसे ही प्रकृतमें भी बृहत्त्वधर्मशाली किसी निरुपाधि विशेष्यकी प्रतीति होती है, ऐसा कहना होगा। 'सत्' पदार्थको भी स्वरूप लक्षण नहीं मान सकते, कारण कि सत्शब्द भी महासामान्य—सत्ता जाति—मात्रका अभिधान करता है। [निरुपाधि धर्मीका नहीं।] जैसे 'सत्' इतना ही कहनेपर महासामान्यका (धर्मीके बिना) पर्यवसान नहीं हो सकता, इसलिए घट आदि महासामान्यके अवान्तर सामान्यवाली व्यक्ति अपेक्षित होती है, वैसे ही प्रकृतमें भी अवान्तर सामान्य व्यक्ति अपेक्षित होती है, ऐसा कहना होगा। बृहत्त्व, सर्वज्ञत्व आदि धर्मोंसे युक्त होनेके कारण ज्ञान ही निरुपाधि ब्रह्मका स्वरूप लक्षण है, ऐसा नहीं मान सकते, कारण कि वेदान्तीके मतमें सुख, दुःख, राग और द्वेषकी अपेक्षा ज्ञानत्व महासामान्य माना जाता है, इसलिए ज्ञानत्वमें भी अवान्तर सामान्यके आश्रयभूत धर्मीकी आकाङ्क्षा निवृत्त नहीं होती है। [इसलिए किसी निरुपाधिको स्वरूप लक्षण कहना आवश्यक ही है]।

त्त्यपेक्षाया अनिर्वचनादिति। अत्रोच्यते—'आनन्दाद्ध्येव खलु' इति श्रुत्याऽऽनन्द एव निरुपाधिब्रह्मरूपमिति निर्णीयते। श्रुत्यन्तरं च 'यो वै भूमा तत्सुखम्' इति सुखस्यैव ब्रह्मधर्मत्वमाह। एवं तर्हि 'विज्ञानमानन्दम्' इति सामानाधिकरण्याद्विज्ञानं निरुपाधिकं ब्रह्मगुणः स्यादिति चेत्, तत्र वक्तव्यम्—किं विज्ञानानन्दयोः सामानाधिकरण्यं नीलोत्पलवद् गुणगुणिभावविवक्षया किं वा द्रव्यं घट इतिवत्परापरसामान्यभावविवक्षया ? नाऽऽद्यः, 'केवलो निर्गुणश्च' इति श्रुतेः। गुणस्य गुणिना भेदाभेदयोरनिरूपणादुपपन्नं निर्गुणत्वम्।

अत्र भेदाभेदवादी न निर्गुणं द्रव्यमस्तीति जल्पति। मा भून्निर्गुणं द्रव्यम्, ब्रह्म तु न द्रव्यम्, प्रमाणाभावात्। समवायिकारणत्वाद्

समाधान—इस आक्षेपके उत्तरमें कहा जाता है—'आनन्दसे ही निश्चय' इत्याद्यर्थक श्रुतिके बलसे 'आनन्द ही ब्रह्मका निरुपाधि स्वरूप है' ऐसा निर्णय किया जाता है। दूसरी श्रुति भी 'जो महान्—बृहत्—है, वह सुख—आनन्द—स्वरूप है, इस प्रकार सुख—आनन्द—को ही ब्रह्मका धर्म कहती है।

शङ्का—ऐसा माननेसे तो 'विज्ञान, आनन्द' इस प्रकार एक विभक्त्यन्त होनेसे विज्ञान ही ब्रह्मका निरुपाधिक गुण माना जायगा।

समाधान—तब इस आशङ्काका उत्तर देते हुए हम प्रश्न करेंगे कि विज्ञान और आनन्दमें सामानाधिकरण्य—एक विभक्तिका होना—क्या 'नीला कमल' इस वाक्यके समान गुणगुणिभावकी विवक्षासे है ? अथवा 'द्रव्य घट है' इस वाक्यके समान परापरसामान्यभावकी—सामान्यविशेषभावकी—[द्रव्य यह द्रव्यत्वरूप परसामान्यका बोध कराता है, वह सामान्य हुआ और 'घट' यह घटत्वरूप अवान्तर सामान्यका बोध कराता है, अतः वह विशेष सामान्य हुआ] विवक्षासे है ? इनमें प्रथम कल्प युक्त नहीं है, कारण कि श्रुति कहती है कि वह 'केवल और गुणशून्य है'। गुणका गुणीके साथ भेद और अभेदका निरूपण न हो सकनेसे गुण और गुणीमें न तो भेदका और न अभेदका ही निरूपण किया जा सकता है, अतः ब्रह्मका निर्गुण होना युक्तियुक्त है।

इस विषयपर भेदाभेदवादी भास्कर कहता है कि गुणशून्य द्रव्य होता ही नहीं है। इसपर हमारा यह कहना है कि द्रव्य गुणशून्य न होता हो, तो मत हो,

द्रव्यमिति चेद्, न; आरम्भवादानभ्युपगमात् । उपादानकारणत्वात् द्रव्यमिति चेद्, न; गुणादीनामपि स्वगतज्ञेयत्ववाच्यत्वादिधर्मोपादानत्वात् । गुणो नाम धर्मः, तथा च न निर्धर्मकः पदार्थोऽस्तीति चेद्, न; कस्यचिद्धर्मस्यैव निर्धर्मकताया अङ्गीकार्यत्वात् । अन्यथाऽनवस्थापत्तेः । तस्मान्न निर्गुणं ब्रह्मेति वचनं दर्शनप्रद्वेषमात्रम् । द्वितीयपक्षोऽङ्गीकृत एव । विज्ञानं सामान्यपरं तद्विशेष आनन्दः, स एव हि ब्रह्म । न च सर्वज्ञत्वाद्वितीयत्वादिधर्मैः सद्वितीयत्वम्, प्रपञ्चोपाधिकतया तेषामनिर्वचनीयत्वात् । विज्ञानसामान्यमपि दुःखरागाद्युपाधिकत्वादनिर्वचनीयमेव । तादृशसामान्याधारे विज्ञानप्रयुक्तार्थक्रियाकारिण्यानन्दे विज्ञानव्यवहारोऽप्युपपन्न एव ।

परन्तु ब्रह्म तो द्रव्य नहीं है, कारण कि उसके (ब्रह्मके) द्रव्य माननेमें कोई प्रमाण नहीं है। यदि कहो कि ब्रह्म समवायिकारण है, इसलिए द्रव्य है, [क्योंकि द्रव्यसे इतर समवायिकारण कोई हो ही नहीं सकता] तो ऐसा भी नहीं कह सकते, कारण कि हम आरम्भवादका स्वीकार नहीं करते हैं। [यह नैयायिक मत है कि परमाणुद्वयसंयोग द्व्यणुकके आरम्भ द्वारा परम्परासे जगत्का आरम्भक है]। उपादान कारण होनेसे भी ब्रह्मको द्रव्य नहीं मान सकते, क्योंकि गुणादि भी अपने ज्ञेयत्व, वाच्यत्व आदि धर्मोंके प्रति उपादान कारण माने ही जाते हैं, [पर वे द्रव्य नहीं कहलाते]। गुण धर्मको कहते हैं, इसलिए धर्मशून्य कोई पदार्थ ही नहीं है, ऐसा भी कहना उचित नहीं है, कारण कि किसी धर्मको निर्धर्मक अङ्गीकार करना ही होगा, अन्यथा अनवस्था होगी। इसलिए निर्गुण ब्रह्म नहीं है, यह कहना एक दर्शनके ऊपर द्वेषका ही प्रदर्शन करना है। उपादानकारण होनेसे द्रव्य है, ऐसा दूसरा पक्ष तो हम मानते ही हैं। विज्ञान सामान्यपरक है, उसका विशेष है—आनन्द, वही ब्रह्म है। सर्वज्ञत्व, अद्वितीयत्व आदि धर्मोंके द्वारा द्वितीयसहित होना भी नहीं माना जा सकता, क्योंकि प्रपञ्चोपाधिक—प्रपञ्चरूप उपाधि द्वारा प्राप्त—सर्वज्ञत्व आदि सब अनिर्वचनीय (मिथ्या) हैं। विज्ञानसामान्य भी दुःख, राग आदि उपाधिसे युक्त होनेके कारण अनिर्वचनीय ही है। इससे अनिर्वचनीय विज्ञानत्वसामान्यके आधारभूत और विज्ञानप्रयुक्त

ननु यथा कल्पितरजतत्वाधारभूतायां शुक्तावमुख्यो रजतव्यवहारस्तथाऽऽनन्दे विज्ञानव्यवहारः स्यादिति चेद्, न; तद्वदत्र पारमार्थिकसामान्यान्तराभावेन वैषम्यात् । तदेवं विज्ञानस्वभाव आनन्दो ब्रह्मेति स्वरूपलक्षणस्य श्रौतत्वादशेषमतिमङ्गलम् ।


इति विवरणप्रमेयसंग्रहे द्वितीयसूत्रं समाप्तम् ।

व्यवहारके सम्पादक आनन्दके लिए विज्ञानशब्दका व्यवहार भी सङ्गत होता है ।

शङ्का—जैसे कल्पित रजतत्वके आधारभूत शुक्तिमें अमुख्य (गौण, अवास्तव) रजतव्यवहार होता है, वैसे ही आनन्दमें विज्ञानव्यवहार भी गौण (अवास्तव) ही होगा ।

समाधान—शुक्ति रजतके तुल्य प्रकृतमें दूसरा पारमार्थिक सामान्य न होनेसे विषमता है । [जैसे शुक्तिमें केवल अवास्तव रजत ही नहीं है, किन्तु व्यवहारदृष्टिसे पारमार्थिक शुक्तित्व भी है, वैसे ब्रह्ममें कोई दूसरा पारमार्थिक सामान्य नहीं है] । इस प्रकारके निर्णयसे 'विज्ञानस्वभाव आनन्द ब्रह्म है' ऐसा स्वरूप लक्षण श्रुतिसिद्ध होनेसे सम्पूर्ण अत्यन्त मङ्गलमय है ।

इति श्री पं० ललिताप्रसादडबरालविरचितविवरणोपन्यास-
भाषानुवादमें द्वितीयसूत्र समाप्त ।



अथ तृतीयं सूत्रम्

द्वितीयसूत्रे ब्रह्मणो लक्षणद्वयमभिहितम्। इदानीं सूत्रकारेण ब्रह्मणः सर्वज्ञत्वे हेतुरुच्यते—'शास्त्रयोनित्वात्' इति। पूर्वसूत्र एव श्रुतियुक्तिभ्यां सर्वज्ञत्वसाधनाद्व्यर्थमेतदिति चेद्, मैवम्;

शब्दोपादानभावाद् ध्वनिगतविषयद्योतनाशक्तयोन्त-
र्ब्रह्मण्येव स्युरग्नेर्विषयविषयिणी दीपशक्तिः खलूच्चैः।
द्रष्टुश्च ज्ञानशक्तिर्ननु न करणता किन्तु दीपप्रभाव-
त्संयुक्तद्योतनैवेत्यपरमिह पुनः साध्यते सर्ववित्त्वम्॥

तृतीय सूत्र

'जन्माद्यस्य यतः' इस द्वितीय सूत्रमें ब्रह्मके तटस्थ और स्वरूप (जगत्-कारणत्व तथा सत्यज्ञानानन्द) इस प्रकार दो लक्षण कहे गये हैं। अब सूत्रकार ब्रह्मके सर्वज्ञ होनेमें हेतु दिखलाते हैं—'शास्त्रयोनित्वात्'।

शङ्का—पूर्व सूत्रमें ही श्रुति तथा युक्तिके द्वारा सर्वज्ञत्वका साधन कर ही लिया गया है, इसलिए पुनः उसमें हेतु देना व्यर्थ है।

समाधान—उक्त आक्षेप उचित नहीं है, कारण कि ध्वनिमें—शब्दमें—विषय—घट, पट आदि अर्थ—का प्रकाश करनेकी जो शक्तियां हैं, वे सब ब्रह्ममें ही हैं, क्योंकि ब्रह्म ही शब्दरूप वेदका उपादान है। [नियम है—कार्यमें कारणसे ही गुण प्राप्त होता है] जैसे विषयको प्रकाशित करनेवाली दीपकी शक्ति अग्निकी ही शक्ति है, इसमें कोई सन्देह नहीं। [इस दृष्टान्तसे सिद्ध हुआ कि शब्दोंमें विषय-प्रकाश-शक्ति अपने उपादानभूत ब्रह्मसे ही प्राप्त है, इसलिए उस शक्तिको ब्रह्मशक्ति ही मानना चाहिए। यदि शङ्का हो कि शब्दोंमें विषयप्रकाश करनेकी कारणता है, अतः ब्रह्ममें भी कारणताका ही अनुमान होगा, इसलिए शास्त्रयोनित्वरूप हेतुसे भी सर्ववित्त्व सिद्ध नहीं हो सकता, तो इस आशङ्काका समाधान उत्तरार्द्धसे करते हैं—] द्रष्टामें—चेतनमें—ज्ञान-शक्तिका ही साधन करना उचित है, केवल कारणताका साधन करना उचित नहीं है। [दृष्टान्तमें समता दिखलाते हैं—] क्योंकि जैसे दीपकी प्रभा अपनेसे संयुक्त सम्पूर्ण पदार्थोंका प्रकाश करती है, वैसे ही ब्रह्म भी अपनेसे संयुक्त सम्पूर्ण

अयमर्थः—साधितमपि पुनर्हेत्वन्तरेण दृढीक्रियते। न च पुनरुक्तिप्रसङ्गः, जगत्कर्तृत्वशङ्कयाऽऽक्षिप्ते सर्वज्ञत्वे समाधीयमानत्वात्। विमतं ब्रह्म वेदगतसर्वविषयप्रकाशनशक्त्याधारः, वेदोपादानत्वाद्, यथा दीपगतप्रकाशनशक्त्याधारो दीपोपादानभूतोऽग्निरिति हि प्रयोगः। यद्यपि वेदे करणशक्तिरप्यस्ति, तथापि चेतनत्वाद् ब्रह्मणो ज्ञानशक्तिरेवाऽनुमेया। नहि चेतनस्य कर्तुः करणशक्तिः संभाव्यते। न चोपादानोपादेययोः

प्रपञ्चका प्रकाश करता है। ब्रह्म सबके प्रति उपादान होनेसे सबके साथ संयुक्त है, इसलिए इस सूत्रमें पूर्व सूत्रकी अपेक्षा विलक्षण ही सर्ववित्त्वका साधन किया जाता है। [अर्थात् पूर्व सूत्रमें जगत्कारणत्वसे सर्ववित्त्व सिद्ध किया गया है और इस सूत्रमें वेदोपादानत्व द्वारा विलक्षण सर्वज्ञत्व सिद्ध किया जायगा, इससे पुनरुक्त या सिद्धसाधनादि दोष नहीं आते। अतएव ब्रह्मके प्रपञ्चकारणत्वसे गृहीत होनेपर भी शास्त्रकारणत्वरूप हेतु दिया गया है। इसका स्वयं व्याख्यान करके स्पष्टीकरण करते हैं—]

तात्पर्य यह है कि सिद्ध किया गया भी 'सर्वज्ञत्व' दूसरे हेतुके द्वारा दृढ़ किया जा रहा है, इससे पुनरुक्ति दोषका प्रसङ्ग नहीं आता, कारण कि दूसरेमें जगत्कारणत्वकी आशङ्कासे सर्वज्ञत्व होनेमें आक्षेप हो सकता है, [अर्थात् ब्रह्म जगत्का कर्ता है, परन्तु वेद तो नित्य पदार्थ है, इसलिए उसका कर्ता तो ब्रह्म नहीं होगा, इसलिए वेदका अकर्ता होनेसे उसका ज्ञान भी उसको नहीं होगा, अतः केवल जगत्कर्तृत्वसे सर्वज्ञत्वमें आक्षेप हो सकता है। इसलिए उसका समाधान करना प्राप्त हो जाता है। [समाधानस्वरूप अनुमानप्रयोग दिखलाते हैं—] 'विमत ब्रह्म वेदमें विद्यमान सम्पूर्ण अर्थजातका प्रकाश करनेमें समर्थ शक्तिका मूल आधार है, कारण कि वह वेदका उपादान है। जैसे दीपकी प्रकाश देनेवाली शक्तिका मूल आधार दीपका उपादानभूत अग्नि है। यद्यपि वेदमें करणशक्ति (साधकत्व-सहायकत्व) भी है, उससे करणशक्तिको ही अनुमान द्वारा उसके उपादानभूत ब्रह्ममें भी मानना होगा। इससे सर्वज्ञत्व सिद्ध नहीं हो सकता, तथापि चेतन होनेके कारण ब्रह्मकी ज्ञानशक्तिका ही अनुमान द्वारा साधन करना उचित है। चेतनरूप कर्त्ताका करण होना सम्भव नहीं है। [वह तो स्वयं रचयिता ही है, साधनभूत कारक

सर्वशक्त्यनुगत्या भाव्यमिति नियमोऽस्ति, अग्निकार्यभूतायां प्रभायां प्रकाशशक्तेरेवाऽनुगमाद् दाहशक्तेरननुगमात्। एवं वेदोपादानेऽपि ब्रह्मणि बोधशक्तिरेवाऽनुगच्छतु को विरोध इति। न च वेदस्य सर्वप्रकाशकत्वे विवदितव्यम्, पुराणाद्यनेकविद्योपबृंहितेन वेदेनाऽविषयीकृतस्य वस्तुनः सत्त्वे मानाभावात्। न च वेदोपादानत्वमसिद्धम्, वेदस्य नामरूपप्रपञ्चान्तःपातित्वान्नामरूपप्रपञ्चोपादानत्वस्य च ब्रह्मणि सर्वोपनिषत्सिद्धत्वात्। ननु ब्रह्म न वेदोपादानम्, वेदोक्ताखिलाभिज्ञत्वात्, ऋष्यादिवत्, इति चेद्, न; वेदोक्तमात्राभिज्ञत्वस्योपाधित्वात्। ब्रह्म तु वेदोक्तादप्यधिकं जानाति। तथाहि—वेदः स्वविषयविज्ञाना-

---

नहीं हो सकता'। उपादान और उपादेय दोनोंमें सब प्रकारकी शक्तियोंका अनुगम होता है, ऐसा कोई नियम नहीं है। [इससे शङ्का नहीं कर सकते हैं कि उपादानमें उपादेय वेदगत करणशक्ति भी आनी चाहिए। दृष्टान्त द्वारा नियमका न होना सिद्ध करते हैं—] कारण कि अग्निके कार्यस्वरूप दीपकी प्रभामें (प्रकाशमें) प्रकाशशक्तिका ही अनुवर्तन है, दाहशक्तिका अनुवर्तन नहीं है। इसी प्रकार वेदके उपादानभूत ब्रह्ममें भी बोधशक्ति—ज्ञानशक्ति—का ही अनुगम होता है, यदि ऐसा माना जाय, तो क्या विरोध होगा? वेद सम्पूर्ण पदार्थोंका प्रकाश करता है, इसमें कोई विवाद ही नहीं करना चाहिए, कारण कि पुराण आदि अनेक विद्याओंसे परिपुष्ट किये गये वेदका जो विषय नहीं है, ऐसे पदार्थकी सत्तामें कोई प्रमाण ही नहीं है [अर्थात् वेदमें न आया हुआ पदार्थ आकाशपुष्पके समान है]। ब्रह्ममें वेदोपादानत्व असिद्ध भी नहीं है, कारण कि वेद भी नामरूपात्मक प्रपञ्चके ही अन्तर्गत है और सम्पूर्ण नामरूपात्मक प्रपञ्चका उपादान ब्रह्म ही है, इसका प्रतिपादन सभी उपनिषत् करती हैं।

शङ्का—ब्रह्म वेदका उपादान नहीं माना जा सकता, वेदमें प्रतिपादित सम्पूर्ण विषयोंका अभिज्ञ होनेसे, ऋषि आदिके समान।

समाधान—वेदोक्तमात्राभिज्ञत्वरूप उपाधिसे उक्त अनुमान दूषित है। [ऋषि आदि तो केवल वेदप्रतिपादित ही अर्थ जानते हैं] और ब्रह्म तो वेदप्रतिपादित अर्थसे भी अधिक जानता है। यथा—वेदको अपने विषयके विज्ञानकी अपेक्षा अधिक विषयको जाननेवालेने बनाया है, क्योंकि

दप्यधिकविषयवित्प्रणीतः, वाक्यप्रमाणत्वात्, पाणिनिप्रणीतशास्त्रवत्। संभाव्यते ह्येतत्साध्यम्, लोके वागविषयस्यापि क्षीरगुडादिमाधुर्यविशेषस्याऽनुभवगम्यत्वात्। तथा च वेदस्य व्यवहार्यसर्ववस्तुप्रकाशकत्वात्सर्वज्ञत्वम्। वेदोपादानं ब्रह्म तु व्यवहारातीतं निजस्वरूपमपि स्वचैतन्येनाऽभिव्यनक्तीति निरतिशयसर्वज्ञम्। अथ वेदोऽपि ब्रह्मस्वरूपं लक्षणया प्रकाशयेत् तथापि वेदः किंचिन्मुख्ययैव वृत्त्या प्रकाशयति किंचिल्लक्षणया किंचित्सामान्येन किंचिद्विशेषेण। ब्रह्म

वेद वाक्यस्वरूप प्रमाण है, पाणिनि द्वारा रचे गये व्याकरणशास्त्रके तुल्य। इस साध्यका सम्भव भी है, क्योंकि लोकमें वाणीके विषय न होनेवाली दूध और गुड़ आदिकी मधुरता (मिठास) का विशेष अन्तर केवल अनुभवसे ही जाना जाता है। [इस दृष्टान्तसे वाणीरूप वेदके विषय ऐसे भी कुछ पदार्थ हैं जिनका अनुभव ब्रह्मको है, यह सिद्ध किया गया। शङ्का उत्पन्न होती है कि अभी कहा गया है कि वेदबाह्य वस्तुके होनेमें कोई प्रमाण ही नहीं है और अब कहा जाता है कि वेदबाह्य भी वस्तु है, जिसका ज्ञान ब्रह्म करता है, इससे आपके कथनमें परस्पर विरोध होता है, इसके समाधानमें उत्तर है कि उक्त विरोध तात्पर्यको न समझनेसे प्रतीत होता है। वेदबाह्य वस्तु न माननेका तात्पर्य यह है कि जो कुछ भी वागिन्द्रियगोचर पदार्थ है, वह सब वेदका विषय है, ऐसा कोई वाग्विषय पदार्थ नहीं है कि जो वेदबाह्य माना जा सके, परन्तु वागविषय पदार्थ ही नहीं है, ऐसा इसका तात्पर्य नहीं है। इसी वागविषय पदार्थका भी ज्ञाता ब्रह्म है, ऐसा कहा गया है, इससे कोई विरोध नहीं आता।] इससे वेद भी व्यवहारके विषय सकल पदार्थोंका प्रकाशक है, इसलिए वह सर्वज्ञ माना जाता है। परन्तु वेदका उपादानभूत ब्रह्म तो वागादिके सम्पूर्ण व्यवहारके अविषय अपने स्वरूपको भी अपने चैतन्य द्वारा प्रकाशित करता है, इसलिए निरतिशय सर्वज्ञ है। [इससे अधिक सर्वज्ञ हो नहीं सकता, यह सर्वज्ञताकी सीमा है]। यद्यपि वेद भी ब्रह्मस्वरूपको लक्षणाके द्वारा ('तत्त्वमसि' आदि वाक्योंमें भागत्यागलक्षणा अथवा शुद्ध लक्षणाके द्वारा प्रातिपदिकार्थमात्र शुद्ध चैतन्यरूप अर्थमें तात्पर्यका निश्चय किया गया है) ब्रह्मके स्वरूपको प्रकाशित कर ही सकता है, तथापि वेद तो कुछ विषयको मुख्यवृत्ति (अभिधानशक्ति) के द्वारा और कुछ विषयको लक्षणावृत्तिके द्वारा प्रकाशित

तु सर्वं सर्वात्मना प्रकाशयतीति वेदादप्यधिकाभिज्ञमेव।

ननु वेदस्य ब्रह्मणा प्रणयनं नामोच्चारणमात्रं चेदुपाध्यायवद् ब्रह्माऽसर्वज्ञं स्यात्। अर्थं बुद्ध्वा रचितत्वे व्याकरणादिवद्वेदः पौरुषेयः स्यात्। अथ मन्यसे प्रमाणान्तरेणाऽर्थमुपलभ्य विवक्षित्वा रचिता व्याकरणादयो मानान्तरसापेक्षतया पौरुषेया भवन्तु नाम वेदस्य तु नित्यज्ञानजन्यनित्येच्छावता ईश्वरेण रचितस्य मानान्तरनिरपेक्षस्य कथं पौरुषेयत्वमिति। नैतत्सारम्, तादृगीश्वरे प्रमाणाभावात्। अनुमानानामीश्वरासाधकत्वस्य पूर्वसूत्रे दर्शितत्वात्। आगमस्तत्साधक इति चेद्, न; उक्तेश्वरसिद्धौ तत्प्रोक्तागमप्रामाण्यसिद्धिः, तत्सिद्धौ चोक्तेश्वरसिद्धिरित्यन्योन्याश्रयत्वात्।

कर सकता है, एवं कुछ विषयोंको सामान्यरूपसे और कुछको विशेषरूपसे प्रकाशित करता है, परन्तु ब्रह्म तो सबको ही सर्वस्वरूपसे (सामान्य विशेष सभी प्रकारसे) प्रकाशित करता है, इसलिए वेदकी अपेक्षा उसको अधिक सर्वज्ञ ही मानना उचित है।

यदि केवल ब्रह्म द्वारा शब्दोंका उच्चारणमात्र वेदकी रचना मानी जाय, तो उपाध्यायके—वेदशिक्षकके—समान ब्रह्म भी असर्वज्ञ होगा। अर्थज्ञानपूर्वक यदि वेदकी रचना मानी जाय, तो व्याकरण आदि शास्त्रोंकी भाँति वेद पौरुषेय—पुरुषप्रणीत—माने जायँगे। यदि कहो कि दूसरे प्रमाणोंके द्वारा प्राप्त अर्थकी विवक्षासे रचे गये व्याकरण आदि शास्त्र दूसरे प्रमाणोंकी अपेक्षा रखनेसे पौरुषेय भले ही माने जायँ, परन्तु वेद तो नित्यज्ञानसे उत्पन्न हुई नित्य इच्छावाले ईश्वरसे रचे गये हैं, इसलिए दूसरे प्रमाणकी अपेक्षा न रखनेसे पौरुषेय कैसे माने जा सकते हैं, तो यह भी कथन मूल्यवान् नहीं है, कारण कि नित्यज्ञानजन्य नित्य इच्छावाले ईश्वरके माननेमें कोई प्रमाण नहीं है। कथित अनुमान ईश्वरके साधक नहीं हैं, ऐसा पूर्व सूत्रमें ही प्रतिपादन किया गया है। आगम—शास्त्र—को ईश्वरके साधनमें प्रमाण कहा जाय, तो यह भी नहीं बनता, कारण कि कथित ईश्वरकी सिद्धि होनेके अनन्तर ही उससे कहे गये शास्त्रमें प्रामाण्य सिद्ध हो सकता है और आगममें प्रामाण्यसिद्धिके अनन्तर ही आगम-

वेदस्याऽनपेक्षत्वादेव प्रामाण्यं नेश्वरप्रोक्तत्वाद् अतो नेतरेतराश्रय इति चेद्, एवमपीश्वरेच्छा नित्या ज्ञानजन्या चेति व्याहतिर्दुष्परिहरा। अथाऽर्थं बुद्ध्वा रचितत्वे समेऽपि व्याकरणादीनां वक्त्रभिप्रायप्रयुक्तत्वात्पौरुषेयत्वं वेदानां त्वध्ययनविधिप्रयुक्तत्वादपौरुषेयतेति चेद्, न; विमता वेदा वक्त्रभिप्रायप्रयुक्ता नाऽध्ययनविधिप्रयुक्ता वा, अर्थं बुद्ध्वा रचितत्वाद्, व्याकरणादिवदिति पौरुषेयताया दुर्वारत्वात्। न च वेदानां चैतन्याख्यनिर्विकल्पकज्ञानपूर्वकत्वं व्याकरणादिवैषम्यमिति वाच्यम्, चैतन्यस्याप्यभिलषितसाधनोपरागे सविकल्पकत्वात्।

नन्वपौरुषेया वेदाः प्रवाहाविच्छेदे सत्यस्मर्यमाणकर्तृकत्वादात्मव-

---

प्रतिपादित ईश्वरकी सिद्धि हो सकती है, इस प्रकार अन्योन्याश्रय दोष आ जाता है।

यदि कहा जाय कि वेद दूसरे प्रमाणोंकी अपेक्षा न रखनेसे ही प्रमाण है, ईश्वररचित होनेके कारण नहीं, इसलिए अन्योन्याश्रय दोष नहीं आ सकता, तो भी ईश्वरकी इच्छा नित्य है और वह ज्ञानसे उत्पन्न होती है, इस प्रकारका व्याघात तो नहीं हटाया जा सकता [अर्थात् नित्यको जन्य मानना विरुद्ध है]।

शङ्का—अर्थज्ञानपूर्वक रचा जाना यद्यपि समान ही है, तथापि व्याकरण आदि शास्त्रोंका वक्ताके अभिप्रायके अनुसार प्रयोग होनेके कारण वे पौरुषेय माने जाते हैं, परन्तु वेदोंका प्रयोग अध्ययनविधिके द्वारा होता है, अतः वे पौरुषेय नहीं माने जा सकते।

समाधान—विमत वेद वक्ताके अभिप्रायसे प्रयुक्त हैं अथवा अध्ययनविधिसे प्रयुक्त नहीं हैं, कारण कि व्याकरणादि शास्त्रोंके सदृश वे अर्थज्ञानपूर्वक रचे गये हैं, इस प्रकार अनुमानके प्रयोगसे वेदोंका पौरुषेय होना नहीं हटाया जा सकता। व्याकरण आदि शास्त्रोंकी अपेक्षा वेदोंमें चैतन्यनामक निर्विकल्पज्ञानपूर्वकत्वरूप विषमता भी नहीं कही जा सकती, कारण कि चैतन्यका अभीष्ट उपायके साथ संसर्ग होनेपर उसे सविकल्पक ही मानना होगा। [क्योंकि निर्विकल्पसे कोई भी संसर्ग नहीं हो सकता।]

शङ्का—वेद पौरुषेय नहीं है, प्रवाहके विच्छेद न होते हुए इनके कर्ताका स्मरण न होनेसे, आत्माके तुल्य। [जैसे आत्माका प्रवाह बराबर

दिति चेत्, किमत्र स्मरणागोचरकर्तृकत्वं हेतुः उताऽप्रमीयमाणकर्तृकत्वम्? आद्यो जीर्णकूपादावनैकान्तिकः । द्वितीयोऽसिद्धः, वेदो विशिष्टबहुज्ञपुरुषप्रणीतः, बह्वर्थविषयवाक्यप्रमाणत्वाद्, भारतवत्; 'स इदं सर्वमसृजत ऋचो यजूंषि सामानि' इत्यनुमानागमाभ्यां वेदे कर्तुः प्रमीयमाणत्वात् । एवं तर्हि वेदस्य पौरुषेयत्वप्रसङ्ग इष्ट इति चेद्, न; प्रामाण्यभङ्गप्रसङ्गात् । न तावन्नित्येच्छादिमदीश्वररचितत्वात् प्रामाण्यम्, दूषितत्वात् । नापि महाजनपरिग्रहाद् देहात्मभावचन्द्रप्रादेशमात्रत्वादीनां महाजनपरिगृहीतानामेवाऽप्रामाण्यदर्शनात् । स्मृतिपुराणपित्रादिवाक्यवदर्थस्य

चला आ रहा है और उसके कर्ताका ज्ञान नहीं होता, अतः वह किसी पुरुष द्वारा प्रणीत नहीं है, वैसे ही वेदोंका भी प्रवाह बराबर चला आ रहा है, और कर्ताका पता नहीं है, अतः वे पुरुषप्रणीत नहीं माने जा सकते ।]

समाधान—इस अपौरुषेत्वके साधक अनुमानमें क्या कर्ताका स्मरण-विषय न होनारूप हेतु है? या कर्ताका निश्चय न हो सकनारूप हेतु है? इनमें प्रथम कल्प तो पुराने कूप आदिमें व्यभिचरित है । [बहुत पुराने कूपादि कार्योंके कर्ताका भी स्मरण नहीं रहता है ।] दूसरा कल्प असिद्धि दोषसे दूषित है, कारण कि 'वेद विशिष्ट और अधिक ज्ञानशाली पुरुष द्वारा रचा गया है, क्योंकि वह भारत ग्रन्थके समान अनेक अर्थोंको विषय करनेवाला वाक्यरूप प्रमाण है', इस अनुमान तथा 'उसने इस दृश्यमान सम्पूर्णको रचा, तथा ऋक्, यजु और साम वेदोंको' इस प्रकारके अर्थवाले आगमसे वेदकी रचनाके विषयमें कर्ताका निश्चय होता ही है ।

शङ्का—तब तो उक्त तर्कके अनुसार वेदमें पुरुषप्रणीतत्वका प्रसङ्ग ही हो जायगा ।

समाधान—नहीं, नहीं होगा, कारण कि ऐसा माननेसे वेदके प्रामाण्यका भङ्ग हो जायगा । नित्य इच्छा आदिवाले ईश्वरके द्वारा रचित होनेसे भी वेदका प्रामाण्य नहीं कह सकते, क्योंकि इसमें पहले ही दोष दे आये हैं । [अर्थात् इस प्रकारका ईश्वर प्रमाणसिद्ध ही नहीं है ।] महाजन—अधिक जनसमुदाय—के सम्मत होनेसे भी प्रामाण्य नहीं आ सकता, कारण कि चन्द्रमाके प्रादेश—वित्ता—मात्र परिमाण आदिका, जो कि महाजनके द्वारा परिगृहीत ही है, अप्रामाण्य देखा गया है ।

मानान्तरसिद्धतया प्रामाण्यं स्यादिति चेद्, मैवम्; किं वेदार्थभूतौ धर्माधर्मौ प्रत्यक्षेणाऽनुभूतौ उताऽऽगमान्तरेण। न चरमः, अनवस्थानात्। प्रथमेऽपि नहि तावदस्मदादिप्रत्यक्षेण धर्माधर्मावुपलभामहे। नापि योगिप्रत्यक्षं तद्ग्राहकम्, तस्य स्वविषयरूपादिष्वेवाऽतिशयकरत्वात्। न चाऽऽत्मसमवेततया धर्माधर्मौ मानसप्रत्यक्षाविति वाच्यम्, वेदसृष्टिकाले धर्माधर्मयोर्भाविनोरवर्तमानत्वात्। पूर्वकल्पानुष्ठितौ धर्माधर्मौ तदा वर्तेते एवेति

शङ्का—स्मृति, पुराण तथा पिता आदिके वाक्योंके सदृश अर्थके दूसरे प्रमाणसे सिद्ध होनेके कारण वेदोंका प्रामाण्य मान लिया जायगा [जैसे प्रमाणान्तरसे सिद्ध अर्थके प्रतिपादक स्मृति आदिके वाक्य प्रमाण होते हैं, वैसे ही वेदवाक्य भी प्रमाण मान लिए जायँगे]।

समाधान—वेदके तात्पर्यार्थस्वरूप धर्म और अधर्म [विधिवाक्यका तात्पर्य धर्ममें है और निषेधका अधर्ममें] क्या प्रत्यक्ष प्रमाण द्वारा जाने गये हैं? या दूसरे (वेदसे इतर) शास्त्र द्वारा?। दूसरा कल्प नहीं बन सकता, कारण कि इसमें अनवस्था दोष आ जाता है। [दूसरेसे आगमके तात्पर्यार्थका ज्ञान तीसरेसे, तीसरेका चौथेसे इत्यादि परम्परा न रुकेगी] प्रथम कल्पमें भी हम ऐसे साधारण मनुष्य प्रत्यक्षसे धर्म और अधर्मका ज्ञान नहीं प्राप्त कर सकते। योगियोंका प्रत्यक्ष भी धर्म और अधर्मका ज्ञान प्राप्त करानेवाला नहीं हो सकता, कारण कि योगीका प्रत्यक्ष अपने विषय रूप आदिमें ही अतिशय प्राप्त कर सकता है [चक्षुरादिके अगोचर धर्म और अधर्मका दर्शन नहीं कर सकता। 'दिव्यं ददामि ते चक्षुः—' इस भगवद्वाक्यमें दिव्यपदका भी इतना ही तात्पर्य है—सम्पूर्ण विराट्रूपके दर्शनकी सामर्थ्य उत्पन्न हो जाय। अविषयकी दर्शनसामर्थ्य नहीं हो सकती, अतएव अभियुक्तोंका वचन है—'न रूपे श्रोत्रवृत्तिता']। आत्मसमवेत होनेसे धर्म और अधर्म मानस प्रत्यक्षके विषय भी नहीं हो सकते, कारण कि वेदकी रचनाके अवसरपर आगे होनेवाले धर्म और अधर्म अनुवर्तमान ही नहीं थे। [धर्माधर्म तो वैदिक-प्रमाणगम्य हैं, वेदकी रचनाके पूर्व तो वे सिद्ध ही नहीं थे, अतः वेद-रचनाकालमें उनकी अनुवृत्ति कैसे होगी? अनुवृत्ति तो पूर्वसिद्ध पदार्थकी ही हो सकती है। अतः मानस प्रत्यक्षके विषय भी नहीं हो सकते।] पूर्व कल्पमें किये गये

